December. 1936.

THE

CHOWKHAMBA SANSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 468.

वादवारिधिः ।

महामहोपाध्याय-

श्रीगदाधरभट्टाचार्यादिविपश्चिद्वरैर्विरचितः ।

काशीविश्वविद्यालय-प्रधानाध्यापक-

महामहोपाध्याय श्रीबालकृष्णमिश्रेण निर्ध्यातः ।

नित्यानन्दवेदविद्यालय-प्रधानाध्यापक पण्डितवर

श्रीढुण्ढिराजशास्त्रिणा संशोधितः ।

VÂDA VÂRIDHI

By

M. M. S'RI GADÂDHARA BHATTÂCHÂRYA

and others.

Edited by

M. M. Pandit S'ri Bâlakrishna Mis'ra.

Vedānta Pradhānādhyāpak,

Hindu University, Benares, and

Pandit Dhundhirâja S'âstri.

Principal, N. Veda Vidyālaya, Benares.

FASCICULUS. III-३

PUBLISHED BY THE SECRETARY,

CHOWKHAMBA SANSKRIT SERIES OFFICE,

Benares City.

1940

श्रीः

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोदितम् ॥ २ ॥

स्तबकः ४६८.

Printed by Jaya Krishna Das Gupta
at the Vidya Vilas Press, Benares.
1940.

३९८२५ २२/६३

पटस्य स्पार्शनसामग्री च तत्र पटादिस्पार्शनमिष्टमेव, तत्र स्पार्शनस्यावश्यकतया घटपटोभयविषयकसमूहालम्बनरूपस्य तस्याभ्युपगमे क्षतिविरहादिति दिक्।

स्पार्शनेच्छाविशिष्टस्पार्शनसामग्रीकाले चाक्षुषसामग्रीसत्त्वे चाक्षुषगोचरेच्छायामसत्यां चाक्षुषापत्तेर्वारणाय स्पार्शनेच्छाविशिष्टस्पार्शनसामग्र्याश्चाक्षुषेच्छाविरहविशिष्टायाः प्रतिबन्धकत्वमुपदर्शितदिशा कल्पनीयम्।

केचित्तु चाक्षुषसामग्रीस्पार्शनसामग्रीयौगपद्ये स्पार्शनमेव स्वीकुर्वन्ति, चाक्षुषसामग्र्यपेक्षया स्पार्शनसामग्र्या आलोकसंयोगाघटितत्वेन लघुशरीरतया स्पार्शनं प्रति चाक्षुषसामग्र्याः प्रतिबन्धकत्वकल्पनापेक्षया चाक्षुषं प्रति स्पार्शनसामग्र्याः प्रतिबन्धकत्वकल्पने लाघवादिति।

तदसत्, चाक्षुषसामग्र्या हीनबलत्वेऽपि स्पार्शनं प्रति इच्छाविशिष्टायाश्चाक्षुषसामग्र्याः प्रतिबन्धकत्वकल्पनस्यावश्यकतया लाघवानवकाशात्। न च चाक्षुषसामग्र्या बलवत्त्वे स्पार्शनेच्छाभावं चाक्षुषेच्छाञ्च पृथक् पृथक् निवेश्य स्पार्शनं प्रति चाक्षुषसामग्र्याः प्रतिबन्धकताद्वयं कल्पनीयम्, मन्मते च तस्या एकमेव प्रतिबन्धकत्वमिति भवन्मते सामग्रीप्रतिबन्धकताया आधिक्यात् गौरवमिति वाच्यम्। भवन्मते स्पार्शनेच्छाभावचाक्षुषेच्छे एकत्र निवेश्य चाक्षुषसामग्र्याः प्रतिबन्धकत्वस्य कल्पनीयतया तयोः परस्परं विशेष्यविशेषणभावे विनिगमनाविरहेण चाक्षुषसामग्र्याः प्रतिबन्धकताधिक्यात्।

यत्तु घटादिस्पार्शनेच्छाविशिष्टस्पार्शनसामग्री—तच्चाक्षुषसामग्री पटादिचाक्षुषेच्छाविशिष्टचाक्षुषसामग्रीकाले घटादिचाक्षुषेच्छायामसत्यामपि घटपटादिविषयकसमूहालम्बनचाक्षुषोदयात् पटचाक्षुषगोचरेच्छाविशिष्टपटादिचाक्षुषसामग्र्यभावघटिता एव इच्छाविशिष्टघटादिस्पार्शनसामग्र्याः घटादिचाक्षुषप्रतिबन्धकत्वं स्वीकरणीयम्, इत्थञ्च स्पार्शनेच्छाविशिष्टस्पार्शनसामग्र्यभावघटितचाक्षुषसामग्र्यपेक्षया स्पार्शनसामग्र्येव गुरुशरीरा तस्याः प्रतिबन्धकताधिक्येन च सिद्धान्तमत एव गौरवं, तदाधिक्यञ्च चाक्षुषेच्छाभावस्पार्शनेच्छयोरेकत्र निवेशेन सामग्र्या बलवत्त्वमते पृथगेव तयोर्निवेशादिति।

तदसत्, उपदर्शितस्थले पटाद्यविषयकस्यैव घटादिस्पार्शनस्य स्वीकारेण सामग्र्यभावाघटिताया एव सामग्र्याः प्रतिबन्धकत्वोपगमात् चाक्षुषसामग्र्या एव गुरुशरीरत्वादिति॥

अत्राहुः—स्पार्शनत्वावच्छिन्नं प्रति चाक्षुषसामग्र्याः प्रतिबन्धकत्वे मानाभावः, तत्तदिन्द्रियजन्यज्ञाने तत्तदिन्द्रियमनोयोगस्य हेतुत्वात्, एकदा चक्षुरादिभिर्मनोयोगस्यैवानभ्युपगमात् चाक्षुषस्पार्शनादिसामग्रीयौगपद्यस्यैवासम्भवात्, नच जन्यज्ञानत्वावच्छिन्नं प्रति त्वङ्मनोयोगस्य हेतुत्वाच्चाक्षुषसामग्रीकाले त्वङ्मनोयोगस्यावश्यं स्वीकरणीयतया इन्द्रियमनोयोगस्य हेतुत्वेऽपि चाक्षुषसामग्रीकाले स्पार्शनापत्तिरस्त्येवेति वाच्यम्। विषयावच्छिन्नत्वङ्मनोयोगस्यैव स्पार्शनहेतुत्वोपगमात् चक्षुर्मनोयोगकालीनत्वङ्मनोयोगस्य च विषयावच्छिन्नत्वानभ्युपगमेन तदानीं स्पार्शनापत्त्यसम्भवात् ॥ * ॥

इति सामग्रीप्रतिबन्धकतावाद(१९)वीचिः ।

ॐ नमः शिवाय

श्री महामहोपाध्यायगदाधरभट्टाचार्यकृतः

कारणतावाद(२०)वीचिः ।

अथ किन्नाम कारणत्वं यदवच्छेदकावच्छिन्नसमुदायः सामग्री ?

अत्र प्राञ्चः-अनन्यथासिद्धनियतपूर्ववर्तिजातीयत्वं कारणत्वम् । तत्र येन रूपेण यादृशकार्यं प्रति पूर्ववर्तित्वमवगम्यते तादृशकार्यं प्रति तद्रूपमन्यथासिद्धम्, यथा घटादिकं प्रति दण्डत्वादिकम्(१) ॥ कारणान्तरेण सह यद्रूपावच्छिन्नस्य यादृशकार्यं प्रति पूर्ववर्तित्वमवगम्यते तद्रूपावच्छिन्नं तादृशकार्यं प्रति अन्यथासिद्धम्, यथा घटादिकं प्रति दण्डरूपत्वाद्यवच्छिन्नम्, दण्डसमवहितचक्रत्वाद्यवच्छिन्नञ्च(२) ॥ अन्यं प्रति पूर्ववर्तित्वे ज्ञात एव यद्रूपावच्छिन्नस्य प्रकृतकार्यं प्रति पूर्ववर्तिताग्रहस्तद्रूपावच्छिन्नं तत्कार्यं प्रत्यन्यथासिद्धम्, यथा ज्ञानादिकं प्रत्याकाशत्वाद्यवच्छिन्नम्, तत्र हि शब्दादिसमवायिकारणतयाऽऽकाशादिसिद्धावेव तस्य ज्ञानादिपूर्ववर्तित्वं ग्रहीतव्यमिति तत्र शब्दादिपूर्ववर्तिताग्रहापेक्षा । यथा वा घटादिकं प्रति कुलालपितृत्वाद्यवच्छिन्नं, कुलालपितृत्वादेः कुलालादिपूर्ववर्तिताघटितत्वात्तदवच्छिन्नस्य घटादिपूर्ववर्तित्वग्रहे कुलालादिपूर्ववर्तित्वग्रहस्यापेक्षितत्वात् । अपूर्वादिपूर्ववर्तित्वमगृहीत्वापि यागत्वाद्यवच्छिन्ने स्वर्गादिपूर्ववर्तित्वग्रहसम्भवादपूर्वद्वारा न यागत्वाद्यवच्छिन्नस्य स्वर्गादिकार्यं प्रत्यन्यथासिद्धत्वम् । एतादृशस्थल एव व्यापारेण व्यापारिणो नान्यथासिद्धिः। कुलालादिपितृत्वाद्यवच्छिन्नस्य कुलालादिव्यापारकत्वसम्भवेऽपि अन्यथासिद्धिरेव(३)॥ अवश्यक्लृप्तनि-

यतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतं यद्धर्मावच्छिन्नं तद्धर्मावच्छिन्नमपि तत्रान्यथासिद्धम्, यथा पाकजगन्धादौ रूपादिप्रागभावः, तत्र हि सुरभ्यसुरभिमद्वयवारब्धघटादौ पाकजगन्धप्रागभावाभाववति रूपादिप्रागभाववति गन्धोत्पादवारणाय तत्प्रागभावस्य तन्नियतपूर्ववर्तित्वस्य कल्पनात्(४)॥ प्रकृतकार्यं प्रति यद्धर्मव्याप्यधर्मस्यागुरोः कारणतावच्छेदकत्वसम्भवस्तदवच्छिन्नञ्च प्रकृतकार्ये अन्यथासिद्धम्, यथा घटादौ द्रव्यत्वाद्यवच्छिन्नम्, घटादिप्रकृतकार्यजनकतावच्छेदकञ्च दण्डत्वादि, तस्य द्रव्यत्वव्याप्यत्वात् ॥

वस्तुतस्तु नियतपूर्ववर्तितावच्छेदकयद्धर्मावच्छेदेन यादृशकार्यं प्रति न कारणत्वव्यवहारः प्रामाणिकानां तद्रूपावच्छिन्नमेव तादृशकार्ये अन्यथासिद्धम्; तेन शब्दादिपूर्ववर्तित्वमगृहीत्वापि शब्दसमवायित्वादिनाऽऽकाशादौ ज्ञानादिपूर्ववर्तित्वग्रहसम्भवेऽपि पूर्वसंयोगनाशादिपूर्ववर्तित्वमगृहीत्वापि विभागत्वाद्यवच्छिन्नस्योत्तरसंयोगादिपूर्ववर्तिताग्रहसम्भवेऽपि च तत्र तेषामन्यथासिद्धत्वमेव । अत एव लघुधर्मसमनियतगुरुधर्मावच्छिन्नस्य प्रतिबन्धकाभावनिष्ठतद्व्यक्तित्वावच्छिन्नस्य च न कारणत्वं, तद्रूपावच्छिन्नस्य निरुक्तान्यथासिद्धत्वात् । अधिकभेदनिवेशाद्गौरववारणाय नियतपूर्ववृत्तितावच्छेदकत्वं धर्मविशेषणम् । तच्च न कारणताशरीरघटकं किन्तु भेदप्रतियोगिपरिचायकमात्रम् । तादृशधर्माणाञ्च प्रातिस्विकरूपेण भेदकूटस्य कारणतावच्छेदकांशे विशेषणत्वं बोध्यम्, अतो न 'प्रक्षालनाद्धि पङ्कस्ये'त्यादिन्यायावतारः । एकस्यैव केनचिद्रूपेणान्यथासिद्धत्वात् रूपान्तरेण जनकत्वाच्च अन्यथासिद्धान्यत्वेन न कारणं विशेषणीयम्, किन्तु येन रूपेणान्यथासिद्धत्वं तदन्यधर्मवत्त्वमेव निवेशनीयम् ॥ कार्याव्यवहितप्राक्क्षणे कार्याधिकरणे यद्रूपावच्छिन्नासत्त्वेऽपि कार्यमुत्पद्यते तथाविधतत्तद्दण्डत्वाद्यवच्छिन्नस्य घटसामान्यजनकतावारणाय नियतपूर्ववर्तिजातीयतानिवेशः । अतीतानागतव्यधिकरणदण्डादीनामपि दण्डत्वादिना घटादिस्वरूपयोग्यत्वात् जातीयत्वनिवेशः । तथाचान्यथासिध्यनिरूपकनियतपूर्ववर्तितावच्छेदकतद्धर्मवत्त्वं तद्धर्मपुरस्कारेण कारणत्वमिति समुदायार्थः । अत एव कारणतावच्छेदकनिष्ठनियतपूर्ववर्तितानवच्छेदकत्वमेव व्यभिचार इति गीयते ॥

ननु किमिदं नियतपूर्ववर्तितावच्छेदकत्वम् ? न तावत्कार्याव्यवहितपूर्वत्वाश्रययावत्कालवृत्तितावच्छेदकत्वं, स्वर्गादिकार्यं प्रति यागत्वादेरतथात्वप्रसङ्गात्, स्वर्गाव्यवहितपूर्वक्षणे यागादीनां स्वतोऽसत्त्वात् ।

कालिकविशेषणताव्यापारान्यतरसम्बन्धेन तादृशकालवृत्तित्वनिवेशेनैतद्दोषस्य नावकाश इति चेत्। तर्हि विशिष्टबुद्धिविशेषणज्ञानयोः कार्यकारणभावे विशिष्टस्मृतौ व्यभिचारवारणायानुभवत्वस्य कार्यतावच्छेदके निवेशनं प्रामाणिकानां विरुद्धं स्यात् । विशेषणज्ञानत्वावच्छिन्नस्य अनुभवात्मकविशिष्टबुद्धिपूर्वकाले कालिकविशेषणतया तादृशस्मृतिपूर्वकाले च संस्कारात्मकव्यापारसम्बन्धेन वृत्तितया विशिष्टबुद्धित्वावच्छिन्ननिरूपितनियतपूर्ववर्तितावच्छेदकताया विशेषणज्ञानत्वादौ सत्त्वात् । एवं तादृशनियतपूर्ववर्तितावच्छेदकतायाः कारणतालक्षणे प्रवेशे घटत्वाद्यवच्छिन्नं प्रति तन्तुत्वतन्तुसंयोगत्वादिना हेतुत्वापत्तिः, तदवच्छिन्नस्य किञ्चिद्देशावच्छेदेन घटाद्यव्यवहितपूर्वकालेऽवश्यं सद्भावात् । कारणतावच्छेदकनिष्ठस्य यावत्कार्याधिकरणनिष्ठकारणताघटकसम्बन्धावच्छिन्नाधिकरणतानिरूपितनिरूपकतावच्छेदकत्वस्याधिकस्य निवेशेऽपि घटादौ घटतन्तुसंयोगान्यतरत्वादिना हेतुत्वापत्तिर्दुर्वारैव ॥

अथ कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्याधिकरणवृत्तिर्यः कारणतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावः तत्प्रतियोगितानवच्छेदकत्वरूपकालघटितदैशिकव्यापकतावच्छेदकत्वमेव तत् । तद्घटाद्यधिकरणे कपालादावुत्पत्तिकालावच्छेदेन विजातीयसंयोगाद्यभावसत्त्वात् तत्र तद्धेतुत्वानुपपत्तिरिति कार्याव्यवहितपूर्वक्षणावच्छिन्नत्वं वृत्तित्वविशेषणम् । एकघटाद्यव्यवहितपूर्वक्षणावच्छेदेनान्यघटाद्यधिकरणकपालादौ विजातीयसंयोगाद्यभावसत्त्वादव्याप्तिरिति तु नाशङ्कनीयम्, स्वाव्यवहितपूर्वक्षणावच्छिन्नस्वाधिकरणवृत्तित्वसम्बन्धेन कार्यवैशिष्ट्यस्याभावे निवेशनीयत्वात् । न चैवं घटत्वाद्यवच्छिन्नं प्रति तत्कपालत्वादिनापि तादात्म्यसम्बन्धेन हेतुतापत्तिः, घटाधिकरणकपालान्तरे व्याप्यवृत्तेस्तत्कपालत्वावच्छिन्नभेदस्य वृत्तौ कालविशेषस्यानवच्छेदकतया यत्पदेन तादृशाभावस्य ग्रहीतुमशक्यत्वादिति वाच्यम् । स्वाव्यवहितपूर्वक्षणावच्छिन्नत्वस्थलेऽवच्छिन्नत्व-तादृशक्षणानवच्छिन्नत्वोभयाभावस्यैव निवेशनीयत्वात्, तादृशाभावीयवृत्त्यवच्छिन्नत्वविरहेणोभयाभावस्याक्षतत्वात्। यागादेः स्वर्गादिकारणतानिर्वाहाय च तन्नियतपूर्ववर्तितावच्छेदकतन्नियतपूर्ववर्तितावच्छेदकावच्छिन्ननियतपूर्ववर्तितावच्छेदकान्यतरत्वमेव कारणतावच्छेदकधर्मं निवेशनीयम्, यागत्वादेः स्वर्गविशेषादिनियतपूर्ववर्तितावच्छेदकत्वविरहेऽपि तादृशकार्यनियतपूर्ववर्तितावच्छेदकापूर्वविशेषत्वावच्छिन्ननियतपूर्ववर्तितावच्छेदकत्वेनान्यतरत्वमक्षतमेवेति चेन्न ।

घटाद्यव्यवहितपूर्वक्षणेऽपि तदधिकरणकपालादौ किञ्चित्कपालिकाद्यवच्छेदेन विजातीयसंयोगाद्यभावसत्त्वात्, दैशिकाव्याप्यवृत्तीनां विजातीयसंयोगादीनां कारणत्वानुपपत्तेर्दुर्वारत्वात् । प्रतियोगिवैयधिकरण्यस्याभावविशेषणत्वोपगमे घटादिकं प्रति घटतन्तुसंयोगान्यतरत्वादिना हेतुताया दुर्वारत्वात्, घटाद्यधिकरणनिष्ठस्य तद्रूपावच्छिन्नाभावस्य प्रतियोगिसमानाधिकरणत्वात् । न चाभावनिष्ठकार्याधिकरणवृत्तित्वे देशनिरूपितावच्छेद्यत्वशून्यत्वं विशेषणं देयम्, तथाच देशविशेषावच्छिन्नदर्शिताभावमादाय नाव्याप्यवृत्तौ कारणतायाः क्षतिरिति वाच्यम् । तथासति समवायेन ज्ञानत्वावच्छिन्नं प्रति ज्ञानत्वादिना हेतुतापत्तिः, ज्ञानाद्यधिकरणात्मादिनिरूपितायाः ज्ञानानवच्छेदकक्षणावच्छिन्नाया ज्ञानाद्यभावीयवृत्तेः ज्ञानावच्छेदकक्षणावच्छिन्नज्ञानाद्यभावीयवृत्तिताभिन्नत्वे मानाभावात्, तादृशाभावस्य कार्याधिकरणे देशानवच्छिन्नवृत्तिकत्वविरहात् । न च कार्याधिकरणदेशावच्छिन्नकार्याव्यवहितपूर्वक्षणवृत्तिकाभावीयकालिकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वमेव नियतपूर्ववर्तितावच्छेदकत्वम् । विजातीयसंयोगाद्यधिकरणदेशावच्छेदेन तद्वति काले विजातीयसंयोगादेः कालिकसम्बन्धावच्छिन्नाभावो नास्ति तदवच्छेदेन प्रतियोगिमत्तायास्तदवच्छेदेनाभाववृत्तौ विरोधित्वादिति नोक्ताव्याप्यवृत्तिकारणत्वानुपपत्तिः ।

एतेन पूर्वोक्तनियतपूर्ववर्तितावच्छेदकताया निवेशे विषयतया लौकिकप्रत्यक्षत्वावच्छिन्नं प्रतीव ज्ञानत्वावच्छिन्नं प्रत्यपि विषयत्वेन तादात्म्यसम्बन्धेन हेतुतापत्तिः, विषयतया ज्ञानत्वावच्छिन्नानुमित्यादिमति अतीतादिविषये कार्याव्यवहितपूर्वक्षणावच्छेदेनापि कारणतावच्छेदकतादात्म्यसम्बन्धेनावच्छिन्नप्रतियोगिताकस्य विषयत्वावच्छिन्नाभावस्य भेदरूपस्यासत्त्वादिति निरस्तम् ।

तत्रातीतादिविषयावच्छेदेनानुमितिप्राक्काले कालिकसम्बन्धावच्छिन्नविषयत्वावच्छिन्नाभावसत्त्वादिति वाच्यम् । एवंसति कारणतावच्छेदकताघटकतया कारणतायाः सम्बन्धविशेषनियन्त्रितत्वानुपपत्तिः । तादृशसम्बन्धघटितदैशिकव्यापकतावच्छेदकतां स्यातन्त्र्येण निवेश्य तदुपपादनेऽपि घटादिकं प्रति समवायेनाभावघटान्यतरत्वादिना हेतुतापत्तेः, तत्र निरुक्तनियतपूर्ववर्तितावच्छेदकतायाः समवायघटितदैशिकव्यापकतावच्छेदकताया अक्षतत्वात् । एवमतीताद्यवच्छेदेन काले कालिकसम्बन्धावच्छिन्नप्रतियोगिताकविषयत्वावच्छिन्नाभावस्याप्रामाणिकत

या ज्ञानत्वावच्छिन्नं प्रति तादात्म्येन विषयत्वेन हेतुताप्रसङ्गस्यैतन्मतेऽपि दुर्वारत्वाच्च ॥

यत्तु स्वसामानाधिकरण्य-स्वाधिकरणक्षणाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसम्बन्धावच्छिन्नायाः कार्यनिष्ठभेदप्रतियोगितावच्छेदकताया अनवच्छेदकत्वमेव नियतपूर्ववर्तितावच्छेदकत्वम् । स्वसामानाधिकरण्यञ्च कार्यकारणभावघटकसम्बन्धाभ्याम् । घटाद्यधिकरणे यत्किञ्चिद्देशावच्छेदेन विजातीयसंयोगाद्यभावसत्त्वेऽपि न कुत्रापि घटादावुक्तोभयसम्बन्धेन विजातीयसंयोगादिमतो भेदो वर्तते इति विजातीयसंयोगत्वादौ निरुक्तप्रतियोगितावच्छेदकतानवच्छेदकत्वमक्षतमेव । एवमतीतादिमात्रविषयकानुमित्यादौ तादात्म्यविषयत्वोभयसम्बन्धघटितसामानाधिकरण्य–स्वाधिकरणक्षणाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसम्बन्धेन विषयवद्भेदस्याक्षततया ज्ञानत्वावच्छिन्नं प्रति तादात्म्येन विषयत्वेन हेतुताया न प्रसङ्गः । एवञ्च समवायेन विजातीयसंयोगं प्रति क्रियात्वेन हेतुत्वे उत्तरदेशे व्यभिचारवारणाय स्वाव्यवहितपूर्वक्षणवृत्तित्वविशिष्टसमवायस्य कार्यतावच्छेदकसम्बन्धत्वानुधावनमपि निरर्थकम् ; शुद्धसमवायस्य तथात्वेऽपि सर्वसांकर्यव्यक्तीनां किञ्चिदधिकरणेषु पूर्वक्षणावच्छेदेन कारणसत्त्वयैव निरुक्तनियतपूर्ववर्तितावच्छेदकतायाः कारणतावच्छेदके निर्वाहादिति ।

तदपि न, तथासति घटादिकं प्रति रूपात्यन्ताभावत्वादिनापि हेतुताप्रसङ्गात्, रूपात्यन्ताभावस्य सदातनया सर्वेष्वेव घटादिषु तदधिकरणक्षणाव्यवहितोत्तरक्षणोत्पन्नत्वसत्त्वात्, सर्वेषामेव तेषामधिकरणे कपालादावुत्पत्तिकालावच्छेदेन रूपात्यन्ताभावसत्त्वात् तत्सामानाधिकरण्यस्यापि तेषु सत्त्वात् ।

उच्यते—स्वाव्यवहितपूर्वक्षणावच्छिन्नस्वसमानाधिकरणवृत्तित्वसम्बन्धेन कार्यविशिष्टो योऽभावस्तदीयसामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वमेव नियतपूर्ववर्तितावच्छेदकत्वम् । अव्याप्यवृत्तीनां विजातीयसंयोगादीनां समवायेनैवाव्याप्यवृत्तितया सामानाधिकरण्यसम्बन्धेन न तथात्वमिति घटादिसमानाधिकरणे कपालादिवृत्तिधर्मे घटाद्यव्यवहितपूर्वक्षणावच्छेदेन सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकस्तदभावो नास्ति इति कारणतोपपत्तिः । अतीतादिमात्रविषयकानुमित्यादिसमानाधिकरणे तादृशविषयनिष्ठतद्व्यक्तित्वादौ तादृशानुमित्याद्यव्यवहितपूर्वक्षणावच्छेदेन तादात्म्यघटितसामानाधिकरण्यसम्बन्धेन विषयत्वावच्छिन्नाभावोऽक्षत

एवेति न ज्ञानत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन विषयत्वेन हेतुताप्रसङ्गः । प्रथमं सामानाधिकरण्यं कार्यतावच्छेदकसम्बन्धेन स्वाधिकरणे स्वरूपसम्बन्धेन वृत्तित्वम्, चरमञ्च कारणतावच्छेदकसम्बन्धेन स्वाधिकरणे स्वरूपसम्बन्धेन वृत्तित्वम्, अतः सम्बन्धभेदमादाय न दोषः । व्याप्यवृत्तेरवच्छेदकत्वानभ्युपगमे स्वाव्यवहितपूर्वक्षणावच्छिन्नत्वस्थाने पूर्वदर्शितोभयाभावो निवेशनीयः । यागादेः स्वर्गादिकारणत्वमपि पूर्ववदुपपादनीयम् इति वदन्ति ॥

अत्र च कारणत्वस्य निरुक्तरूपत्वे तद्घटकान्यथासिद्धिनिरूपकधर्मभेदकूटस्य प्रतिस्विकरूपेण युगसहस्रेणापि ज्ञातुमशक्यतया कारणत्वस्य दुर्ज्ञेयत्वापत्तिः । न च तादृशभेदकूटविशिष्टविशेषणताविशेषसम्बन्धेन निरुक्तनियतपूर्ववर्तितावच्छेदकतावत्त्वमेव कारणताशरीरे निवेशनीयं, तथाच सम्बन्धज्ञानस्य विशिष्टबुद्धावहेतुतयाऽनुपस्थितानामेव भेदानां सम्बन्धघटकतया भानसम्भव इति वाच्यम् । भेदकूटविशिष्टत्वेन विशेषणताविशेषस्य सम्बन्धत्वे मानाभावात् । एवं निरुक्तकारणतायाः कार्यतावच्छेदकघटिततया "स्वर्गकामो यजेते"त्यादिवाक्याद्यागादौ स्वर्गादिसाधनत्वग्रहानुपपत्तिः, यागादिजन्यतावच्छेदकस्य स्वर्गनिष्ठजातिविशेषादेः प्रागनुपस्थितत्वात् । तादृशविधिवाक्याधीनकार्यकारणभावग्रहानन्तरमेव कार्यतायाः किञ्चिदवच्छिन्नत्वनियमप्रवृत्तेन अतिप्रसक्तस्वर्गत्वाद्यवच्छिन्नत्वबाधसहकृतेन यागादिजन्यतायां स्वर्गत्वाद्यवान्तरधर्मविशेषावच्छिन्नत्वग्राहकानुमानेन जातिविशेषोपस्थापनात् । एवमेतन्मते प्रवृत्तौ ज्ञायमानपुरोवर्तिनि ज्ञायमानेष्टभेदाग्रहत्वादिना हेतुताकल्पने कारणतावच्छेदकगौरवात् विशिष्टज्ञानत्वेन हेतुतासिद्ध्यान्यथासिद्धिरित्यपि न स्यात् । तादृशगुरुधर्मस्य नियतपूर्ववर्तितावच्छेदकताया उभयवादिसिद्धत्वात् । अन्यथासिद्धिनिरूपका ये ये धर्मास्तत्तद्भेदकूटस्यापि तत्र सत्त्वात्, प्रवृत्तिकारणताशरीरे तादृशधर्मभेदस्य प्रयोजनविरहेणानिवेशनीयत्वात , इत्यादिबहुविधदुरुद्धरदोषदर्शिनः सिद्धान्तविरुद्धप्रवादकाः साम्प्रदायिकाः कारणत्वं स्वरूपसम्बन्धविशेष एवेति प्रलपन्ति ।

तदपि न साधीयः । घटादिकारणतायाः कारणीभूतदण्डादिस्वरूपत्वे तेन समं तस्याधाराधेयभावानुपपत्तिः, अभेदेऽपि तदुपगमे दण्डो घटकारणवानित्यादिप्रतीत्यापत्तेः, दण्डत्वादिस्वरूपत्वे च सप्रतियोगिकत्वानुपपत्तिः, जातेर्निष्प्रतियोगिकत्वात्, दण्डत्वाद्यवच्छिन्नत्वानुपपत्तिश्च, अभेदेऽवच्छेद्यावच्छेदकभावविरहात् । अभेदेपि तदुपगमे दण्ड-

त्वेन घटकारणत्वमितिवद्दण्डत्वेन दण्डत्वमित्यादिप्रतीत्यापत्तिः। तस्मात्कारणत्वं पदार्थान्तरमेव। तच्चावच्छेदकभेदाद्भिद्यते। तदनुगमककारणतात्वमप्यतिरिक्तमेव। एवं कार्यत्वकार्यतात्वे अपि। इति दीधितिकृदुक्तं युक्तमालोचयामः॥

कारणतावच्छेदकदण्डत्वादिकमेव कारणत्वं, तस्य च कारणतात्वेन घटादिप्रतियोगिकत्वं, जातेः स्वरूपत एव निष्प्रतियोगिकत्वोपगमात् कारणतात्वेनावच्छेद्यता, स्वरूपतश्चावच्छेदकता, अभेदेऽपि भिन्नरूपेणावच्छेद्यावच्छेदभावोपगमे क्षतिविरहादित्यपि कश्चित्॥

कारणत्वन्तु त्रिविधं समवायिकारणत्वमसमवायिकारणत्वं निमित्तकारणत्वञ्चेति। तत्र समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणता समवायिकारणता, यथा घटादिकं प्रति कपालादेः। समवायसम्बन्धावच्छिन्नकार्यतानिरूपितसमवायस्वसमवायिसमवेतत्वान्यतरसम्बन्धावच्छिन्नकारणता असमवायिकारणता, यथा घटादिकं प्रति कपालद्वयसंयोगादेः यथावा घटरूपादिकं प्रतिकपालरूपादेः। विभागानुमित्यादौ संयोगपरामर्शादीनामसवायिकारणताव्यवहाराभावात्, तत्तत्कार्यनिरूपिततत्तत्कारणनिष्ठकारणतानां भेदकूटस्याप्यसमवायिकारणताशरीरघटकत्वं बोद्धव्यम्॥ समवाय्यसमवायिकारणताभिन्नकारणता निमित्तकारणता, यथा घटादिकं प्रति दण्डादेरिति सङ्क्षेपः॥

इति महामहोपाध्यायश्रीगदाधरभट्टाचार्यविरचितः
कारणतावाद(३०)वीचिः समाप्तः॥-॥

अथ कारणतावाद(३१)वीचिः।

कर्पूरकुन्दकुमुदकैलासोदरसोदरम्।
विघ्नध्वंसकरं धाम नमामः शैवदैवतम्॥
अन्यैरनुचितविविधक्षोदैः कलुषीकृतः कविभिः।
न्यायादर्शं इदानीं श्रीजगदीशप्रकाशितः स्फुरतु॥
यस्मादृशे समुपदिष्टमजुष्टमान्यश्रीसार्वभौमगुरुणा करुणामयेन।
सिन्धाग्तसारमिदमादरतस्तदन्यविद्यार्थिनां गुणकृते प्रकृते वदामः॥

अथ निखिलेषु वैदिकेषु लौकिकेषु च कर्मसु तत्तत्फलस्य कारणत्वं निर्णयन्त एव सन्तः प्रवर्तन्ते न तु तदपलपन्तः। तत्र किं नाम कारणत्वम्? न तावत् तत्तत्फलाव्यवहितपूर्वसत्त्वम्, अतिप्रसङ्गात् क्वचिदप्रस-

ङ्गाच्च । नापि तदभावप्रयोजकीभूताभावप्रतियोगित्वं , प्रयोजकत्वं हि न व्यापकत्वं, घटारम्भकसंयोगादिकं प्रत्यपि घटादेर्जनकत्वापत्तेः । नापि स्वरूपसम्बन्धविशेषः, प्रमाणाभावात् । दण्डाभावप्रयुक्तो घटाभाव इत्यादिप्रतीतौ दण्डाभावप्रतियोगिजन्यप्रतियोगिकत्वादिलक्षणस्य दण्डाभावप्रयुक्तत्वस्य घटाभावेऽवगाहनात् । अन्यथावश्यकतया स्वरूपसम्बन्धविशेषमेव कारणत्वं किमिति न ब्रूषे । न चात्र निर्भरः कर्तव्यः, स हि स्वरूपसम्बन्धविशेषो न कारणस्वरूपः, तत्तदवच्छेदकीभूतधर्मस्वरूपो वा, तन्मात्रग्रहेऽपि कारणत्वाप्रत्ययात् , दण्डः कारणमित्यादिसहप्रयोगानुपपत्तेश्च इति चेत् ।

अत्रोच्यते—यदवच्छिन्नं प्रति यादृशसंसर्गेण नियताव्यवहितपूर्ववर्त्तितावच्छेदकं यदन्यथासिद्ध्यनिरूपकं रूपं तद्वत्त्वमेव तदवच्छिन्नं प्रति तादृशसंसर्गेण कारणत्वम् । तत्र यद्यपि घटत्वावच्छिन्नसामान्यस्याव्यवहितपूर्वत्वमप्रसिद्धं घटसामान्यप्रागभावाधिकरणसमयप्रागभावानधिकरणत्वे सति घटप्रागभावाधिकरणकालत्वरूपस्य तस्य क्वचिदप्यसत्त्वात् । प्रसिद्धं वा न कारणत्वस्य निर्वाहकम् , महाप्रलयप्राक्कालीनतत्तद्दण्डत्वादिनापि घटत्वावच्छिन्नं प्रति हेतुत्वप्रसङ्गेनाव्यावर्तकत्वात् । अत एव यत्किञ्चित्घटाव्यवहितपूर्वत्वमपि दुर्निवेश्यं, घटसामान्यं प्रत्यपि तत्कपालत्वेन हेतुतापत्तेः, तद्धर्मावच्छिन्नसकलकार्याव्यवहितपूर्ववर्त्तित्वावच्छिन्नवत्ताकधर्मस्यैवान्यथासिद्ध्यनिरूपकत्वदलेन वारणीयत्वात् , अन्यथा तन्मात्रस्यैव सम्यक्त्वेऽव्यवहितपूर्ववर्त्तितावच्छेदकत्वांशवैयर्थ्यापत्तेः । न च तद्धर्मविशिष्टस्य यावतः प्रत्येकाव्यवहितप्राक्कालावच्छेदेन तत्प्रत्येकस्याधिकरणे वर्त्तमानस्याभावस्य यत्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदको यो धर्मः तद्वत्त्वमेव तद्धर्मावच्छिन्नं प्रति तत्सम्बन्धेन कारणत्वमिति साम्प्रतम् । घटत्वावच्छिन्नं प्रति तादात्म्येन कपालत्वादिना हेतुतायामव्याप्तिप्रसङ्गात् । घटाव्यवहितप्राक्कालावच्छेद्यस्य कपालादौ तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्धत्वात्, अन्योन्याभावमात्रस्यैव देशे व्याप्यवृत्तित्वात् । तथापि तद्धर्मविशिष्टा यावन्तः तत्प्रत्येकाधिकरणदेशावच्छेदेन तत्प्रत्येकाव्यवहितप्राक्काले वर्त्तमानस्य तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य प्रतियोगितानवच्छेदकत्वमेव तद्धर्मावच्छिन्नं प्रति तत्सम्बन्धेन नियताव्यवहितपूर्ववर्त्तितावच्छेदकत्वं विवक्षितम् , घटाव्यवहितप्राक्काले तदधिकरणीभूतकपालाद्यवच्छेद्यस्य पटादिभेदस्यैव सुलभत्वात् । निरुक्तप्रत्येकाधिकरणत्वञ्च देशस्य कार्यताघटकसम्बन्धेनैव ग्राह्यम्,

त्वेन घटकारणत्वमितिवद्दण्डत्वेन दण्डत्वमित्यादिप्रतीत्यापत्तिः। तस्मात्कारणत्वं पदार्थान्तरमेव। तच्चावच्छेदकभेदाद्भिद्यते। तदनुगमककारणतात्वमप्यतिरिक्तमेव। एवं कार्यत्वकार्यतात्वे अपि। इति दीधितिकृदुक्तं युक्तमालोचयामः॥

कारणतावच्छेदकदण्डत्वादिकमेव कारणत्वं, तस्य च कारणतात्वेन घटादिप्रतियोगिकत्वं, जातेः स्वरूपत एव निष्प्रतियोगिकत्वोपगमात् कारणतात्वेनावच्छेद्यता, स्वरूपतश्चावच्छेदकता, अभेदेऽपि भिन्नरूपेणावच्छेद्यावच्छेदभावोपगमे क्षतिविरहादित्यपि कश्चित्॥

कारणत्वन्तु त्रिविधं समवायिकारणत्वमसमवायिकारणत्वं निमित्तकारणत्वञ्चेति। तत्र समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणता समवायिकारणता, यथा घटादिकं प्रति कपालादेः। समवायसम्बन्धावच्छिन्नकार्यतानिरूपितसमवायस्वसमवायिसमवेतत्वान्यतरसम्बन्धावच्छिन्नकारणता असमवायिकारणता, यथा घटादिकं प्रति कपालद्वयसंयोगादेः यथावा घटरूपादिकं प्रतिकपालरूपादेः। विभागानुमित्यादौ संयोगपरामर्शादीनामसमवायिकारणताव्यवहाराभावात्, तत्तत्कार्यनिरूपिततत्तत्कारणनिष्ठकारणतानां भेदकूटस्याप्यसमवायिकारणताशरीरघटकत्वं बोद्धव्यम्॥ समवाय्यसमवायिकारणताभिन्नकारणता निमित्तकारणता, यथा घटादिकं प्रति दण्डादेरिति सङ्क्षेपः॥

इति महामहोपाध्यायश्रीगदाधरभट्टाचार्यविरचितः
कारणतावाद(३०)वीचिः समाप्तः॥-॥

अथ कारणतावाद(३१)वीचिः।

कर्पूरकुन्दकुमुदकैलासोदरसोदरम्।
विघ्नध्वंसकरं धाम नमामः शैवदैवतम्॥
अन्यैरनुचितविविधक्षोदैः कलुषीकृतः कविभिः।
न्यायादर्शं इदानीं श्रीजगदीशप्रकाशितः स्फुरतु॥
यन्मादृशे समुपदिष्टमजुष्टमान्यश्रीसार्वभौमगुरुणा करुणामयेन।
सिन्धाग्तसारमिदमादरतस्तदन्यविद्यार्थिनां गुणकृते प्रकृते वदामः॥

अथ निखिलेषु वैदिकेषु लौकिकेषु च कर्मसु तत्तत्फलस्य कारणत्वं निर्णयन्त एव सन्तः प्रवर्तन्ते न तु तदपलपन्तः। तत्र किं नाम कारणत्वम्? न तावत् तत्तत्फलाव्यवहितपूर्वसत्त्वम्, अतिप्रसङ्गात् क्वचिदप्रस-

ङ्गाच्च। नापि तदभावप्रयोजकीभूताभावप्रतियोगित्वं, प्रयोजकत्वं हि न व्यापकत्वं, घटारम्भकसंयोगादिकं प्रत्यपि घटादेर्जनकत्वापत्तेः। नापि स्वरूपसम्बन्धविशेषः, प्रमाणाभावात्। दण्डाभावप्रयुक्तो घटाभाव इत्यादिप्रतीतौ दण्डाभावप्रतियोगिजन्यप्रतियोगिकत्वादिलक्षणस्य दण्डाभावप्रयुक्तत्वस्य घटाभावेऽवगाहनात्। अन्यथावश्यकतया स्वरूपसम्बन्धविशेषमेव कारणत्वं किमिति न ब्रूषे। न चात्र निर्भरः कर्तव्यः, स हि स्वरूपसम्बन्धविशेषो न कारणस्वरूपः, तत्तदवच्छेदकीभूतधर्मस्वरूपो वा, तन्मात्रग्रहेऽपि कारणत्वाप्रत्ययात्, दण्डः कारणमित्यादिसहप्रयोगानुपपत्तेश्च इति चेत्।

अत्रोच्यते—यदवच्छिन्नं प्रति यादृशसंसर्गेण नियताव्यवहितपूर्ववर्त्तितावच्छेदकं यदन्यथासिद्ध्यनिरूपकं रूपं तद्वत्त्वमेव तदवच्छिन्नं प्रति तादृशसंसर्गेण कारणत्वम्। तत्र यद्यपि घटत्वावच्छिन्नसामान्यस्याव्यवहितपूर्वत्वमप्रसिद्धं घटसामान्यप्रागभावाधिकरणसमयप्रागभावानधिकरणत्वे सति घटप्रागभावाधिकरणकालत्वरूपस्य तस्य क्वचिदप्यसत्त्वात्। प्रसिद्धं वा न कारणत्वस्य निर्वाहकम्, महाप्रलयप्राक्कालीनतत्तद्दण्डत्वादिनापि घटत्वावच्छिन्नं प्रति हेतुत्वप्रसङ्गेनाव्यावर्तकत्वात्। अत एव यत्किञ्चित्घटाव्यवहितपूर्वत्वमपि दुर्निवेश्यं, घटसामान्यं प्रत्यपि तत्कपालत्वेन हेतुतापत्तेः, तद्धर्मावच्छिन्नसकलकार्याव्यवहितपूर्ववर्त्तित्वावच्छिन्नवत्ताकधर्मस्यैवान्यथासिद्ध्यनिरूपकत्वदलेन वारणीयत्वात्, अन्यथा तन्मात्रस्यैव सम्यक्त्वेऽव्यवहितपूर्ववर्त्तितावच्छेदकत्वांशवैयर्थ्यापत्तेः। न च तद्धर्मविशिष्टस्य यावतः प्रत्येकाव्यवहितप्राक्कालावच्छेदेन तत्प्रत्येकस्याधिकरणे वर्त्तमानस्याभावस्य यत्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदको यो धर्मः तद्वत्त्वमेव तद्धर्मावच्छिन्नं प्रति तत्सम्बन्धेन कारणत्वमिति साम्प्रतम्। घटत्वावच्छिन्नं प्रति तादात्म्येन कपालत्वादिना हेतुतायामव्याप्तिप्रसङ्गात्। घटाव्यवहितप्राक्कालावच्छेद्यस्य कपालादौ तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्धत्वात्, अन्योन्याभावमात्रस्यैव देशे व्याप्यवृत्तित्वात्। तथापि तद्धर्मविशिष्टा यावन्तः तत्प्रत्येकाधिकरणदेशावच्छेदेन तत्प्रत्येकाव्यवहितप्राक्काले वर्त्तमानस्य तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य प्रतियोगितानवच्छेदकत्वमेव तद्धर्मावच्छिन्नं प्रति तत्सम्बन्धेन नियताव्यवहितपूर्ववर्त्तितावच्छेदकत्वं विवक्षितम्, घटाव्यवहितप्राक्काले तदधिकरणीभूतकपालाद्यवच्छेद्यस्य पटादिभेदस्यैव सुलभत्वात्। निरुक्तप्रत्येकाधिकरणत्वञ्च देशस्य कार्यताघटकसम्बन्धेनैव ग्राह्यम्,

अतः सम्बन्धान्तरेण यत्कार्यस्याधिकरणं तादृशदेशावच्छेदेन कार्यस्य-प्राक्काले कारणाभावस्य सत्त्वेऽपि न क्षतिः । इच्छाव्यक्तीनामव्यवहित-प्राक्काले घटाद्यवच्छेदेन तदुत्तरकाले वा तत्तदिच्छाद्यधिकरणपुरुषाव-च्छेदेन ज्ञानादिसामान्याभावस्य सत्त्वेऽपि न तत्तदिच्छाद्यधिकरणपुरुषाव-च्छेदेन तत्तदिच्छाव्यवहितप्राक्काले समवायेन ज्ञानादेः सामान्याभाव इति इच्छाद्यवच्छिन्नं प्रति समवायेन ज्ञानत्वादिना हेतुतायां नाव्याप्तिः। अत एव घटाद्यधिकरणकपालाद्यवच्छेदेन तदव्यवहितप्राक्काले संयो-गादिसंसर्गावच्छिन्नप्रतियोगिताकस्य कपालाद्यभावस्य सत्त्वेऽपि तादा-त्म्यसंसर्गावच्छिन्नप्रतियोगिताकतदभावस्या सत्त्वात् घटत्वाद्यवच्छिन्नं प्रति तादात्म्येन कपालत्वादिना हेतुतायामपि नाव्याप्तिः, घटाद्यवच्छे-देन तदव्यवहितप्राक्काले कपालभेदस्यासत्त्वात् । नचैवं प्रतियोगित्वा-दिसंसर्गेण द्रव्यनाशादिकं प्रति आरम्भकसंयोगनाशादेः स्वप्रतियोगिज-न्यत्वादिसंसर्गेण कारणत्वं न स्यात् तादृशसंसर्गावच्छिन्नप्रतियोगित्वा-प्रसिद्धेरिति वाच्यम् । तादात्म्यस्येव सम्बन्धान्तरस्यापि वृत्त्यनियामक-स्य प्रतियोगिताच्छेदकत्वे बाधकाभावात् । यद्धर्मविशिष्टनिरूपितयादृ-शसम्बन्धत्वं यद्धर्मावच्छिन्नस्य यावतः प्रत्येकाधिकरणदेशावच्छेदेन तत्प्रत्येकाव्यवहितप्राक्काले वर्त्तमानस्य कालिकसम्बन्धावच्छिन्नप्रति-योगिताकाभावस्य प्रतियोगितानवच्छेदकं तद्धर्मवत्त्वमेव वा तादृश-सम्बन्धेन तदवच्छिन्नं प्रति कारणत्वं वाच्यम्, अत एव रूपादिनिरूपि-तसंयोगाप्रसिद्ध्यैव घटादिकं प्रति संयोगसम्बन्धेन रूपत्वादिना न हेतु-त्वम्, अन्यथा रूपत्वादेरपि घटाद्यधिकरणकपालाद्यवच्छेदेन तदव्यवहि-तप्राक्काले वर्त्तमानस्य संयोगसंसर्गावच्छिन्नप्रतियोगिताकस्य घटाद्य-भावस्यैव प्रतियोगितानवच्छेदकतया तद्वारणानुपपत्तेः कार्यं प्रति व्या-पकतावच्छेदकधर्मस्यैवान्यथासिद्ध्यनिरूपकत्वदलेन वारणीयत्वस्य प्रागुक्तत्वात् ।

वस्तुतः तद्धर्मावच्छिन्नस्य यावतः प्रत्येकाधिकरणदेशावच्छेदेन तत्-प्रत्येकाव्यवहितप्राक्कालवृत्तिस्वविशिष्टप्रतियोगिकतादृशसम्बन्धवत्ता-कान्यथासिद्ध्यनिरूपकधर्मवत्त्वं तद्धर्मावच्छिन्नं प्रति तादृशसम्ब-न्धेन कारणत्वं वाच्यम्, उक्तापेक्षया लघुत्वात् । अत एव कर्मजवि-लक्षणसंयोगस्य निष्क्रियाधिकरणावच्छेदेन तदव्यवहितप्राक्काले कर्मत्वविशिष्टप्रतियोगिकसमवायाभावसत्त्वेऽपि संयोगं प्रति सम-वायेन कर्मणः कारणतायां नाव्याप्तिः । अत एवाश्रयान्तरस्यैकत्व-मादायैवासमवायिकारणत्वस्य निर्वाहात् घटादौ द्वितीयक्षण एव द्वि-

त्वाद्युत्पादेऽपि न क्षतिः । नचैवं घटसामान्यं प्रत्येव स्ववृत्तिजातिमदीयसंयोगादिसंसर्गेण तत्तद्दण्डत्वादिना हेतुतापत्तिः, घटमात्रस्यैवाव्यवहितप्राक्काले तद्दण्डीयतादृशसंयोगस्य सत्त्वादिति वाच्यम् । तादृशसंयोगसंसर्गे मानस्याभावात्, भावे वा तद्दण्डत्वस्य तादृशसम्बन्धेन घटसामान्यं प्रत्यन्यथासिद्ध्यनिरूपकत्वेनैव वारणीयत्वात् । स्वर्गं प्रति यागस्य स्मृतिं प्रति चानुभवस्य कारणत्वग्रहदशायां तदीयसम्बन्धत्वेन गृहीतोऽप्यपूर्वसंस्कारादिको व्यापारोऽनतिरिक्तभावत्वगुणत्वादिना यागादिव्यापारत्वादिना वा लभते इति ताद्रूप्येणैव तस्योत्तरकालकल्प्यत्वमतो नापसिद्धान्तः। स्वस्वप्रतियोगिव्यधिकरणहेतुसमानाधिकरणयावदभावानामनुपस्थितिदशायां तद्गर्भव्याप्तेरिव घटत्वादिविशिष्टयावद्व्यक्तीनां विशिष्यानुपस्थितिदशायामपि तद्घटितस्य घटत्वाद्यवच्छिन्नं प्रति कारणत्वस्याग्रहो न क्षतिकरः, समुपस्थितयावदभावावगाहिव्याप्तिग्रहस्यैवानुमितिहेतुत्वे घटत्वादिमत्तयोपस्थितयावद्व्यक्त्यन्तर्भावेणैव घटादिकारणत्वग्रहस्य घटाद्यर्थिप्रवृत्तिहेतुतायाः सुवचत्वात् प्रमेयत्वसामान्यलक्षणया ताद्रूप्येण तत्तद्घटत्वस्योपस्थित्यनन्तरं जायमानात् प्रमेयवदित्यनुभवादेव स्वरूपतस्तत्तद्घटत्वेन निखिलघटानां स्मृतिसम्भवाच्च घटांशे तत्तद्व्यक्तित्वस्य स्मृतिदशायां तत्तद्व्यक्तित्वांशे प्रमेयत्वस्योद्बोधकविरहादेवास्मरणसम्भवात् । न चैवमपि विशिष्टबुद्धित्वावच्छिन्नं प्रति विशेषणज्ञानादेः कारणत्वं न स्यात् तादृशबुद्धित्वाश्रययावदन्तर्गतस्य नित्यज्ञानादेरव्यवहितप्राक्कालाप्रसिद्धेरिति वाच्यम् । इष्टत्वात्, कार्यमात्रवृत्तिधर्मस्य कार्यतावच्छेदकतया जन्यविशिष्टबुद्धित्वावच्छिन्नं प्रत्येव तथात्वात्, कालिकसम्बन्धसहितेनैव कार्यतावच्छेदकताघटकसमवायादिसम्बन्धेन तद्धर्मावच्छिन्नस्यैव वा तद्धर्मावच्छिन्नं प्रति कारणतायां निवेश्यत्वेन कार्यवृत्तिधर्मावच्छिन्नं प्रत्युक्तक्रमेण कारणत्वस्य सुवचत्वात् । प्रायश्चित्तं च न प्रागभावपर्यवसितस्य दुःखानुत्पादस्य हेतुः किन्तु गोहत्यादिजनितपापनाशस्यैव, अतस्तदव्यवहितपूर्वत्वाप्रसिद्धावपि न क्षतिः । न च लौकिकविषयतासंसर्गेण साक्षात्कारसामान्यं प्रति विषयत्वेन हेतुतायामव्याप्तिः, कार्यताघटकलौकिकविषयतासम्बन्धेन तत्तत्साक्षात्कारस्याधिकरणं घटादि तदवच्छेदेन तत्तत्साक्षात्काराव्यवहितप्राक्काले विषयत्वविशिष्टप्रतियोगिकतादात्म्यविरहात् विषयतादात्म्यस्य काले व्याप्यवृत्तित्वेन तत्र देशस्यानवच्छेदकत्वादिति वाच्यम् । प्रत्यक्षत्वावच्छिन्नं प्रति सामान्यतो विषयत्वेन हेतुतायां मानाभावात् साक्षात्-

करोमीतिप्रतीतिनियामकविलक्षणविषयत्वेनैव हेतुत्वस्य वक्ष्यमाणत्वात् तादृशविषयत्वविशिष्टप्रतियोगिकतादात्म्यस्य च तादृशविषयावच्छेदेनैव कालवृत्तित्वात् । न च विषयतामात्रस्य स्वनिरूपकज्ञानसमानकाल-स्थायित्वात् प्रत्यक्षविषयीभूतघटाद्यवच्छेदेन प्रत्यक्षाव्यवहितप्राक्काले साक्षात्कारत्वनिरूपितविषयताविशिष्टस्यासत्त्वात् तादृशविषयत्वेनापि तत्र हेतुत्वं दुर्घटमिति वाच्यम् । साक्षात्कारत्वनिरूपितविलक्षणविषय-तावदवृत्तिधर्मशून्यत्वपर्यवसितेनैव तादृशविषयत्वेन हेतुत्वस्य वाच्य-त्वात् । घटादौ स्वसाक्षात्कारप्राक्काले निरुक्तविषयत्वमपि तादृश-विषयतावदवृत्तिधर्मशून्यत्वस्यानपायात् । अत एव पिठराद्यारम्भ-दशायां पार्थिवादीनां निःस्पर्शत्वोपगमेऽपि स्पर्शवन्निष्ठद्रव्यत्वव्याप्य-जातिमत्पर्यवसितेन स्पर्शवत्त्वेन द्रव्यारम्भकत्वं प्राचीनमते सम-वायेन द्रव्यत्वावच्छिन्नं प्रति स्पर्शवत्त्वेन हेतुत्वमिति कार्यकारणभावः सुवच इति वक्ष्यते ।

कालिकसम्बन्धेन कार्यत्वावच्छिन्नं प्रति महाकालत्वेन तद्व्य-क्तित्वेन वा तादात्म्येन महाकालस्य हेतुत्वं न तु कालत्वमात्रेण कालो-पाधीनां कार्यत्वावच्छिन्नं प्रति हेतुतायां मानाभावात्, कालजन्यवस्तु-साधारणस्य कालत्वस्याभावादिदानीमितिप्रतीतिसिद्धाधिकरणत्वरूप-कालत्वस्य सर्वसाधारण्यात् महाकालदिशोरेव सर्वोत्पत्तिमतां निमि-त्तकारणत्वस्य भाष्यादिसम्मतत्वाच्च ।

अस्तु वा कालिकसम्बन्धावच्छिन्नाधिकरणत्वपर्यवसितेन कालत्वे-नैव तत्र जन्यानामपि हेतुत्वं तथापि न क्षतिः, घटादौ पटाद्युत्पत्तेः सम-वायिकारणाभावादेव वारणीयत्वात् । समवायेन कार्यत्वावच्छिन्नं प्रति विषयतया ज्ञानत्वेन न हेतुत्वं किन्तु घटत्वावच्छिन्नं प्रत्येव कपालत्वा-दिप्रकारकप्रत्यक्षत्वेन तथात्वम्, अन्यथा कपालत्वाग्रहेऽपि रूपान्तरेण कपालग्रहे घटाद्यापत्तेः । अतः कार्यसमवाय्यवच्छेदस्य काले प्रत्यक्ष-विषयत्वस्यासत्त्वेऽपि न क्षतिरिति वदन्ति ।

न चैवमपि तद्व्यक्तित्वावच्छिन्नं प्रति हेतुतायामव्याप्तिः, तदवच्छि-न्नस्य यावतोऽप्रसिद्धेरिति वाच्यम् । व्यक्तिस्थलीयकार्यकारणभावस्य प्राचीनैरस्वीकारात्, कार्यतावच्छेदकभेदेन कारणत्वस्य विभिन्नतया तादृ-शस्थले यावत्त्वस्यानुपादेयत्वाच्च, शब्दैक्यस्याकिञ्चित्करत्वात् । नचैवं तदवच्छिन्नसमानाधिकरणवृत्त्यन्यथासिद्धघनिरूपकधर्मवत्त्वमेव तदव-च्छिन्नं प्रति कारणत्वं लाघवादुचितम्, तदग्रहेऽपि कार्यव्यभिचारिणः कारणत्वेनाग्रहात्, अन्यथा व्यधिकरणस्यापि अन्यथासिद्ध्यनिरूपकत्व-

दलेनैव वारणसम्भवे सामानाधिकरण्यांशस्यानुपादेयत्वापत्तेः।घटत्वावच्छिन्नं प्रति जनकतावच्छेदकदण्डत्वादिव्यापकतया द्रव्यत्वादेर्दण्डत्वाद्यपेक्षया गुरुत्वेन प्रमेयदण्डत्वादेरन्यजनकतात्वेन शब्दसमवायिकारणत्वादेश्चान्यथासिद्धिनिरूपकत्वात् ताद्रूप्येण घटत्वावच्छिन्नं प्रति हेतुतावारणार्थमन्यथासिद्धयनिरूपकत्वस्य प्रवेशः । तद्धर्मावच्छिन्नं प्रत्यन्यथासिद्धयनिरूपकत्वञ्च तद्धर्मावच्छिन्नं प्रति नियतपूर्ववर्त्तितावच्छेदकेन यद्रूपेण प्रामाणिकानां कारणत्वव्यवहारस्तदन्यत्वम् । अवश्यक्लृप्तनियतपूर्ववर्त्तिन एव कार्यसंभवे तत्सहभूतत्वमित्यादिना त्रिधान्यथासिद्धयभिधानस्य दिगुपदर्शनात् । अत एव शब्दवत्वादिनापि गगनादेर्न घटादिकं प्रति हेतुत्वम्, दण्डत्वादिकमपि घटादेः कारणतावच्छेदकत्वेनान्यथासिद्धत्वात् न तत्र हेतुः । नचैवं चाक्षुषादौ चक्षुरादेः कारणत्वं न स्यात् चक्षुःसंयोगत्वादिना तद्धेतुतायां चक्षुरादेरवच्छेदकत्वादिति वाच्यम् । चाक्षुषत्वाद्यवच्छिन्नं प्रति चक्षुःसंयोगत्वादिना हेतुतायां मानाभावात्, द्रव्यप्रत्यक्षसामान्यं प्रत्येव इन्द्रियसंयोगत्वेन संयोगत्वेनैव वा चक्षुरादिसंयोगस्य हेतुत्वेन व्यापारत्वसम्भवात् । द्रव्यचाक्षुषत्वाद्यवच्छिन्नं चाक्षुषसामान्यं प्रत्येव वा संयोगादिसम्बन्धेन चक्षुष्ट्वादिना हेतुत्वकल्पनयैवातिप्रसङ्गभङ्गात् चाक्षुषमात्रस्यैव विषयतासम्बन्धेन कस्याञ्चिदधिकरणव्यक्तौ तत्पूर्वं संयोगसंयुक्तसमवेतत्वाद्येकतरसम्बन्धेनावश्यं चक्षुषः सत्वात् द्रव्यचाक्षुषत्वादिना गुरुधर्मेण तज्जन्यतानवच्छेदेऽपि क्षत्यभावात्, एवञ्च दण्डत्वेन घटजनकत्वमित्यादावभेदस्य तृतीयोपस्थापनात् घटत्वावच्छिन्नं प्रत्यन्यथासिद्धयनिरूपको नियतपूर्ववर्त्तितावच्छेदकश्च धर्मो दण्डत्वस्वाभिन्न इत्याकारकस्तत्र बोधः ।ते न निरुक्तधर्मस्य दण्डत्वानवच्छेद्यत्वेऽपि न क्षतिः ।

वस्तुतः यद्यदवच्छिन्नं प्रति नियतपूर्ववर्त्तितावच्छेदकेन यादृशरूपेण प्रामाणिकानां न कारणत्वव्यवहारः तादृशधर्मानवच्छिन्नप्रकारतावच्छेदकत्वमेव तत्तदवच्छिन्नं प्रत्यन्यथासिद्ध्यनिरूपकत्वं वाच्यं न तु तादृशधर्मान्यत्वं, घटं प्रत्यन्यथासिद्धिनिरूपकं यत् प्रमेयदण्डत्वं तदन्यत्वस्य दण्डत्वादौ विरहात् ताद्रूप्येण घटजनकतानुपपत्तेः, अस्माकन्तु दण्डत्वेन घटजनकत्वमित्यादावच्छेदकत्वमेव तृतीयार्थः, स चान्यथासिद्ध्यनिरूपकत्वघटिकायां प्रकारतायामन्वेतीति न काप्यनुपपत्तिः । अत एव घटं प्रत्यन्यथासिद्ध्यनिरूपकस्य नियतपूर्ववर्त्तितावच्छेदकस्य च दण्डत्वादेः प्रमेयदण्डत्वाद्यभिन्नत्वेऽपि घटजनकत्वं प्रमेयदण्डत्वेनेत्यादिको न प्रयोग इति युक्तमुत्पश्यामः ।

ननु दण्डत्वसमशरीरेण घटोपधायकतावत्तद्दण्डान्यतरत्वलक्षणाखण्डभेदव्यक्तिमत्त्वेन घटं प्रति जनकताया आवश्यकत्वे तद्व्यापकधर्मतया द्रव्यत्वेनेव दण्डत्वेनापि जनकतायामन्यथासिद्धिप्रसङ्ग इति चेन्न।

रक्तदण्डत्वादातिरिक्तस्य तावद्दण्डान्यतरत्वलक्षणाखण्डानुगतभेदस्य प्रमाणविरहेणासत्त्वात्, सत्त्वे वा प्रतियोग्यविशेषितरूपेणाखण्डाभावानां जनकतायामिव जनकतावच्छेदकतायामप्यन्यथासिद्धत्वात्, अन्यथा तावद्दण्डगगनाद्यन्यतमत्वलक्षणाखण्डभेदव्यक्तिमत्त्वेनापि घटादिजनकतापातात्। अत एव गन्धादिकं प्रति गन्धत्वाद्यवच्छिन्नप्रतियोगिताकाभावस्येव रूपरसगन्धान्यतमत्वावच्छिन्नप्रतियोगिताकाभावस्याखण्डस्य तद्व्यक्तित्वेन हेतुत्वम्, अन्यथा रूपादिकमिव शब्दबुद्ध्यादिकमन्तर्भाव्य चतुःपञ्चकान्यतमत्वं तदवच्छिन्नप्रतियोगिताकाभावव्यक्तीनामप्यखण्डतत्तद्व्यक्तित्वेन गन्धादिहेतुतायामनन्तकार्यकारणभावापत्तेः। न चैवं गन्धत्वावच्छिन्नप्रतियोगिताकाभावस्यापि तद्व्यक्तित्वेन गन्धहेतुत्वं न स्यात्, इष्टत्वात्। गन्धत्वावच्छिन्नप्रतियोगिताकाभावत्वेनैव तथात्वात् तद्रूपापेक्षया यादृशरूपं गुरुतरं तद्रूपावच्छिन्नप्रतियोगिताकाभावव्यक्तेस्तद्व्यक्तित्वेन हेतुत्वसम्भवः, तत एव तादृशरूपावच्छिन्नप्रतियोगिताकाभावव्यक्तेस्तद्व्यक्तित्वेन हेतुतायामन्यथासिद्धिरित्यभिधाने गन्धत्वावच्छिन्नप्रतियोगिताकाभावव्यक्तेस्तद्व्यक्तित्वेन हेतुतायाः सम्भावितत्वाच्च। तत्र गन्धत्वाद्यपेक्षया लघुतरधर्मावच्छिन्नप्रतियोगिताकाभावस्य तद्व्यक्तित्वेन गन्धादिहेतुत्वस्यासम्भावितत्वात्। नीलघटत्वावच्छिन्नं प्रत्यपि नीलकपालत्वेनान्यथासिद्धत्वात् न तादृरूप्येण हेतुत्वम्। घटसामान्यं प्रत्यपि कपालत्वेन अवयविनीलं प्रति चावयवनीलत्वादिना हेतुत्वस्यावश्यकतया तत्प्रत्येकावच्छिन्नसामग्रीसमाजादेव नीलघटत्वावच्छिन्नस्योत्पत्तिसम्भवे तदवच्छिन्नं प्रत्यर्थसमाजग्रस्तत्वेन नीलकपालत्वादेरन्यथासिद्धिनिरूपकत्वात्, अन्यथा यावान्नेव घटमात्रवृत्तिरनुगतो धर्मः तत्प्रत्येकावच्छिन्नं प्रति नियतपूर्ववर्त्तितावच्छेदकैर्दण्डमात्रवृत्तियावद्धर्मैः कारणत्वकल्पनेऽनन्तकार्यकारणभावप्रसङ्गात्। व्यापकधर्मावच्छिन्नं प्रति जनकतावच्छेदकरूपेणापि व्याप्यधर्मावच्छिन्नं प्रति जनकतायामन्यथासिद्धिरेव, अत एव जन्यभावत्वावच्छिन्नं प्रति जनकतावच्छेदकीभूतेन द्रव्यत्वेन स्पन्दत्वावच्छिन्नं प्रति न हेतुत्वं किन्तु मूर्त्तत्वेनैव सामान्यविशेषयोरेकप्रयोजकप्रयोज्यत्वनियमस्य सत्त्वादित्यग्रे वक्ष्यते॥

स्वाव्यवहितोत्तरक्षणोत्पन्नकार्यकत्वं तत्तत्कार्य्याव्यवहितपूर्वक्षणवृ-

त्तित्वविशिष्टत्वम्, एवं तत्कार्याव्यवहितपूर्वत्वानधिकरणक्षणवृत्तित्वावच्छिन्नप्रतियोगिताकाभावत्वादिकमपि तत्तत्कार्यं प्रत्यन्यथासिद्धिनिरूपकत्वादेव न कारणतावच्छेदकम्, अन्यथा निरुक्तरूपेण दण्डादेर्घटादिकार्यं प्रति हेतुत्वसम्भवात् दण्डत्वादिप्रकारेण तत्र हेतुत्वं न स्यात्, न स्याच्च मण्यभावत्वादिना दाहादिकं प्रति हेतुत्वम्, तथाच कार्याणां कारणसमाजाधीनोत्पत्तिकालनियमस्य भङ्गप्रसङ्गः। एवं प्रत्यव्यवहितपूर्ववर्त्तित्वादिकज्ञान्यं प्रति जनकतावच्छेदकत्वेपि न क्षतिकरं तत्तदनुमित्यव्यवहितपूर्ववर्त्तिताविशिष्टत्वपर्यवसितेन तदनुमितिसामग्रीत्वेन प्रत्यक्षत्वाद्यवच्छिन्नं प्रति विरोधित्वस्य घटाद्यव्यवहितपूर्ववर्तित्वादिविशिष्टबुद्धित्वावच्छिन्नं प्रति च तादृशपूर्ववर्तिज्ञानत्वेन हेतुत्वस्य च सर्वसम्मतत्वादित्यपि वदन्ति ॥

अथ 'व्रीहिभिर्यजेत यवैर्वा' इति श्रुतिलभ्यायां पुण्यविशेषं प्रति व्रीहिकरणकयवकरणकदर्शयोर्वैकल्पिककारणतायां तथाप्यव्याप्तिः, तादृशदर्शयोरेकं विनाप्यन्यतः पुण्यविशेषस्योत्पादेन तत्र व्रीहिकरणकत्वादिना हेतुत्वासम्भवादिति चेन्न।

तादृशपुण्यत्वावच्छिन्नं प्रति दर्शत्वेन हेतुत्वं, तदवान्तरवैजात्यद्वयावच्छिन्नं प्रत्येव व्रीहिकरणकदर्शत्वादिना हेतुत्वसम्भवात्। नचैवमुभयकरणकादपि दर्शात् पुण्यविशेषस्य तदधीनस्वर्गस्य च प्रसङ्गः, व्रीहिप्रयोज्यवैजात्यावच्छिन्नपुण्यं प्रति यवकरणकदर्शत्वेन यवप्रयोज्यवैजात्यावच्छिन्नपुण्यं प्रति च व्रीहिकरणकदर्शत्वेन प्रतिबन्धकत्वस्यापि वक्तव्यत्वात्। विकल्पमुख्याकाङ्क्षया प्रवृत्तस्य विधेरेकैकमात्रकरणकत्वप्रत्यायकत्वेन विकल्पस्थले उभयस्य शास्त्रार्थत्वात्। अत एव वाजपेयाश्वमेधयोः स्वर्गत्वावान्तरवैजात्यद्वयावच्छिन्नं प्रत्येव वाजपेयत्वादिना हेतुत्वेऽपि स्वर्गं प्रति तयोर्न वैकल्पिकहेतुता। यदुभयोरेकजन्यतावच्छेदकधर्मावच्छिन्नं प्रत्यपरस्य विरोधित्वं तादृशवैजात्यावच्छिन्नं प्रति यवकरणकदर्शत्वेन यवकरणकदर्शप्रतिबध्यतावच्छेदकजात्यवच्छिन्नपुण्यविशेषं प्रति च व्रीहिकरणकदर्शत्वेन हेतुतायां मानाभावः। नच तादृशजातिद्वयव्यापकविलक्षणपुण्यत्वावच्छिन्नं प्रति दर्शत्वेन सामान्यहेतुत्वकल्पनयैवातिप्रसङ्गभङ्ग इति वाच्यम्। तथात्वेऽपि क्षत्यभावात्। यत्र यादृशधर्मद्वयव्यापकरूपावच्छिन्नं प्रत्यनुगतरूपेण कारणीभूतयोस्तादृशधर्मद्वयावच्छिन्नं प्रति मिथः प्रतिबन्धकत्वं तत्रैव वैकल्पिककारणत्वस्य व्यवहर्तव्यत्वात्। सत्प्रतिपक्षस्थले च विरोधिपरामर्शयोः प्रतिबध्यतावच्छेदकं यत् साध्यादिविशिष्टबुद्धित्वं तद्व्यापकरूपावच्छिन्नं प्रति तयोरनुगतरूपेण न हेतुत्वं

किन्तु साध्यविषयकानुमितित्वावच्छिन्नं प्रत्येव साध्यादिपरामर्शत्वेन तथात्वमिति तयोर्व्युदासः । नच व्रीहिभिर्यजेत यवैर्वा इति श्रुत्या यागं प्रत्येव व्रीहियवयोरुक्तक्रमेण वैकल्पिकं हेतुत्वमुचितम् , इच्छासामान्यं प्रत्यकारणस्य व्रीह्यादेः तद्विशेषात्मनि यागे कारणत्वासम्भवेन बाधितार्थस्य वेदेनापि बोधयितुमशक्यत्वात् । व्रीह्यादिनिर्मितपुरोडाशविषयकत्वलक्षणेन व्रीह्यादिविषयकत्वरूपेणैव व्रीह्यादिकरणत्वेनापूर्वविशेषं प्रति दर्शस्य हेतुतायाः प्रतिबन्धकतायाः वा व्रीह्याद्यजन्यत्वेऽपि सम्भवात् । अत एव 'यादृशस्वर्गत्वावच्छिन्नं प्रति दर्शत्वेन कारणत्वं तदवान्तरवैजात्यद्वयावच्छिन्नं प्रत्येव व्रीहियवकारणकयागयोर्विशिष्य हेतुत्वं मिथो विरोधित्वमेव वा तयोर्वैकल्पिककारणतायां नियामकमित्यपि न युक्तम्, उभयकरणकादपि दर्शात् स्वर्गविशेषस्योत्पत्तिप्रसङ्गात्, व्रीह्यादिकरणकयागस्याशुतरविनाशित्वेन यवादिकरणकयागजन्यस्वर्गं प्रति साक्षात् विरोधित्वासम्भवात्, स्वजन्यापूर्वद्वारा तद्विरोधित्वकल्पने च व्रीह्यादिकरणकयागोत्तरमतिचिरेण कृतादपि यवकरणकयागात् स्वर्गानुत्पत्तिप्रसङ्गात् । न च तथापि व्रीह्याहुतेरनन्तरक्षणे कृतात् यवहोमात् पुण्यविशेषानुपपत्तिः व्रीहियागस्य नाशोत्तरमेव तत्र यवयागे नापूर्वस्य जननीयत्वात् ।

यत्तु व्रीहियवोभयकरणकहविस्त्यागे पुण्यविशेषजनकतावच्छेदकत्वेनैव सिद्धस्य दर्शत्वस्य विरहादेव ततः फलानुत्पत्तिसम्भवात् उक्तक्रमेण मिथो विरोधित्वकल्पनमप्रामाणिकमिति ।

तन्न, याज्ञिकानामुभयकरणकेऽपि यागे दर्शव्यवहारेण तस्यापि दर्शत्वात् , अन्यथा अश्वमेधजन्यापूर्वं प्रत्यपि तदङ्गक्रियाणामहेतुतापत्तेः, अङ्गहानिस्थलीययागस्य पुण्यविशेषप्रयोजकाश्वमेधत्वविरहेणैव ततः फलानुत्पादस्य सुवचत्वात् इति । विकल्पस्थले द्वयोरुपस्थितिदशायामैच्छिकमेकस्य ग्रहणम् । अनुकल्पस्थले तु यवाद्यप्राप्तिस्तदनुकल्पेन गोधूमादिना क्रियमाणयागजन्यापूर्वं प्रति हेतुः,

यथोक्तवस्त्वसम्प्राप्तौ ग्राह्यं तदनुकारि यत् ।
यवानामिव गोधूमा व्रीहीणामिव शालयः ॥

इति कात्यायनवचनात्

प्रभुः प्रथमकल्पस्य योऽनुकल्पे प्रवर्त्तते ॥
न साम्परायिकं तस्य दुर्मतेर्विद्यते फलम् ॥

इति स्मृत्यन्तराच्च इति विकल्पानुकल्पयोर्भेद इति संक्षेपः ॥

एकदेशिनस्तु सामान्यतः कारणत्वेन निश्चिते वस्तुनि कस्येदं

कारणमित्यवान्तरजिज्ञासानुरोधात् कारणत्वं नोक्तरूपं कार्यविशेषगर्भं, किन्तु पदार्थान्तरं, तच्चावच्छेदकीभूतस्य धर्मस्येव सम्बन्धस्यापि भेदाद्भिन्नमेव, दण्डश्चक्रत्वेन घटजनक इत्यस्येव दण्डः समवायेन घटजनक इत्यस्याप्यप्रमात्वेन सर्वसिद्धत्वात्। नचैवं समवाय्यसमवायिनिमित्तकारणेषु अनुगताकारप्रतीत्यनुपपत्तिः, घटवस्त्रादिप्रत्ययस्य घटत्वादिनेव कारणत्वप्रत्ययस्यापि कारणतात्वेन अखण्डधर्मान्तरेण वा अनुगताकारत्वात्। कार्यतावच्छेदकभेदस्तु न सर्वत्र कारणताभेदनियामकः, मानाभावात्। भिन्नधर्मावच्छिन्नकार्यताप्रतियोगिकयोरप्येकरूपसम्बन्धाभ्यामवच्छिन्नकारणत्वद्वयोरभेदे क्षतिविरहात्, सुखत्वावच्छिन्नं प्रति आत्मत्वेन समवायिकारणव्यक्तेरेव दुःखत्वावच्छिन्नं प्रति समवायिकारणत्वकल्पने बाधकाभावात्। न च कारणतायाः कार्यताप्रतियोगिकत्वे मानाभावः, पटत्वावच्छिन्नं प्रत्येव तन्तुत्वेन हेतुत्वं न तु जन्यत्वावच्छिन्नं प्रति इत्यादिप्रतीतेरेव मानत्वात्। यद्यप्येतावता घटत्वावच्छिन्नप्रतियोगिकत्वमेव कारणत्वस्य आयाति न तु तदवच्छिन्नकार्यताप्रतियोगिकत्वम् उक्तप्रतीत्या कार्यत्वस्यानुल्लेखात्, तथापि समवायेन पटत्वावच्छिन्नं प्रति तादात्म्येन तन्तुत्वेन हेतुत्वमित्यादिप्रतीत्यैव तत्सिद्धिः, पटत्वावच्छिन्नप्रतियोगिकत्वस्य समवायादिसम्बन्धावच्छेद्यतायाः कस्याप्यननुभवेन कार्यताया एव तथात्वात्।

वस्तुतः कारणतायाः कार्यताप्रतियोगिकत्वे पटत्वावच्छिन्नं प्रति तन्तुत्वेन कारणत्वमित्यपि प्रत्ययापत्तिरतः कारणत्वं न कार्यताप्रतियोगिकं, किन्तु समवायेन पटत्वावच्छिन्नं प्रति तन्तुत्वेन कारणत्वमिति प्रतीत्या पटत्वावच्छिन्नप्रतियोगिकत्वस्यैव समवायसंसर्गावच्छेद्यत्वमुपेतव्यमिति दिक्॥

न च कारणत्वस्यातिरिक्तत्वे दण्डत्वादेर्घटादिनियतपूर्ववर्त्तितानवच्छेदकत्वग्रहेऽपि ताद्रूप्येण घटादिजनकत्वस्यापि ग्रहापत्तिः, तद्रूपेण कारणत्वग्रहं प्रति तद्रूपधर्मिकघटादिनियतपूर्ववर्त्तितावच्छेदकत्वनिश्चयस्य हेतुत्वात्। न चैवमावश्यकतया तदेवास्तु कारणत्वमिति वाच्यम्। घटादिकार्यस्यानुपस्थितावपि दण्डः कारणं न वा दण्डः कारणमित्यादिप्रतीत्यनुरोधेनैव पदार्थान्तरस्य तस्योपेयत्वात्।

अस्तु वा भ्रमत्वादिज्ञानं प्रति प्रमात्वस्येव घटादिजनकतावच्छेदकत्वग्रहं प्रति घटादिनियतपूर्ववर्त्तितानवच्छेदकत्वस्य निश्चयस्तद्भाववत्कधर्मदर्शनत्वेनैव विरोधीति तदानीं न दण्डत्वादिना घटादिजनकत्वस्य ग्रहः। कारणत्वमिव तदवच्छेदकत्वमप्यतिरिक्तः पदार्थः स्वरूपसम्बन्ध-

विशेषो वा, तस्य च लघौ सम्भवे गुरावसत्त्वस्वाभाव्यान्न प्रमेयदण्डत्वादिना घटादिहेतुत्वम्। अत एव व्याप्यादिधर्मस्य तथात्वसम्भवे न व्यापकधर्मस्य तथात्वम्। फलानुपधायकस्य च न कारणत्वम्, मानाभावात्, अन्यथा अरण्यस्थदण्डो न घटं जनयति इति प्रतीतेर्भ्रमत्वापत्तिः, किन्तु जनकतावच्छेदकधर्मवत्त्वलक्षणं जननयोग्यत्वमेव, परैरप्युक्तप्रत्ययानुरोधेनान्यथासिद्ध्यनिरूपकतत्तद्धर्मविशिष्टे प्रागुक्तकार्याव्यवहितपूर्वसत्त्वस्यैव कारणतात्वेनोपेयत्वात्। प्रात्यक्षिके च दण्डत्वादिना घटत्वाद्यवच्छिन्नं प्रति कारणत्वस्य ग्रहे दण्डघटयोरन्वयव्यतिरेकज्ञानमप्यपेक्षितमतस्तदसत्त्वदशायां न दण्डत्वादिना घटादिजनकत्वस्य साक्षात्कारः। युज्यते चातिरिक्तं कारणत्वं, कथमन्यथा इष्टसाधनत्वबोधकानां स्वर्गकामो यजेत इति विधीनां प्रामाण्यं, यागादौ धर्मिणि स्वर्गादिप्रतियोगिककारणतासामान्यबोधकतयैव तेषां तथात्वात्, अन्यथा स्वर्गत्वावच्छिन्नाव्यवहितपूर्ववर्तितावच्छेदकीभूतान्यथासिद्ध्यनिरूपकधर्मवत्त्वस्याप्रसिद्ध्या विजातीयस्वर्गत्वावच्छिन्ननियतपूर्ववर्तितावच्छेदकत्वे सत्यन्यथासिद्ध्यनिरूपकस्याश्वमेधत्वादेः सतोऽपि च स्वर्गगतवैजात्यानुपस्थितौ बोधयितुमशक्यत्वात् तादृशविधीनामप्रामाण्यापत्तेः। एवं दण्डादेः कार्यत्वमपि घटादावतिरिक्तपदार्थः, न तु दण्डादिनियतोत्तरवर्तिताविशेषः, दण्डाद्यनुपस्थितावपि घटः कार्यं इत्याद्यनुभवस्य सर्वसिद्धत्वादित्यास्तां विस्तरः॥

तच्चेदं कारणत्वं त्रिविधं समवाय्यसमवायिनिमित्तकारणत्वभेदात्।तत्र समवायसंसर्गावच्छिन्नकार्यताप्रतियोगिकतादात्म्यसंसर्गावच्छिन्नकारणत्वं समवायिकारणत्वम्। प्रत्यक्षादौ विषयादेस्तादात्म्यसंसर्गावच्छिन्नमपि कारणत्वं न समवायसंसर्गावच्छिन्नकार्यताप्रतियोगिकम्, समवायेनेच्छादिकं प्रति च ज्ञानत्वादिना समवायेन कारणत्वं न तादात्म्यसंसर्गावच्छिन्नमिति तयोर्व्युदासः।तद्धर्मावच्छिन्नस्य समवायित्वे सति कारणत्वन्तु न तद्धर्मावच्छिन्नसमवायिकारणत्वं, जन्यत्वावच्छिन्नं प्रतिकालत्वादिनानिमित्तकारणतायामतिव्याप्त्यापत्तेः। तत्र जन्यभावत्वावच्छिन्नं प्रति न गुणवत्त्वेन समवायिकारणत्वं, गुणविशिष्टस्य घटादेः प्रागसत्त्वेन तत्र रूपाद्यनुत्पत्तिप्रसङ्गात्, गुणत्वजातौ प्रमाणाभावात् संख्यापरिमाणाद्येकैकमादाय विनिगमनाविरहप्रसङ्गाच्च, किन्तु द्रव्यत्वेनैव, निरुक्तकारणतावच्छेदकत्वेनैव तज्जातिसिद्धेः। न च घटत्वादिविशिष्टं प्रति कपालत्वादिना विशेषतः समवायिकारणत्वस्यावश्यकत्वात् उक्तक्रमेण सामान्यतः कारणतायां मानाभाव इति वाच्यम्। तदसत्त्वे नीलपीतादीनां स्वाश्रयसमवेतत्व-

प्रत्यासत्त्या स्वाश्रयवृत्तिगुणादिष्वपि सत्त्वेन तेष्वपि कारणगुणपूर्वकाणां नीलपीतादीनामुत्पादस्य दुर्वारत्वापत्तेः । यदि च स्वाश्रयसमवायित्वसम्बन्धेन रूपादिकं प्रति समवायेनैव रूपत्वादिना हेतुत्वस्य वाच्यत्वाञ्चोक्तदोषः, समवायेन गुणादौ रूपाद्यसत्त्वात् समवायस्वाश्रयसमवायित्वान्यतरसंसर्गावच्छिन्नकार्यताप्रतियोगिकसमवायसम्बन्धावच्छिन्नकारणतावत्त्वेनैव रूपादेरसमवायिकारणत्वसम्भवात् । न चैवं घटाद्यन्त्यावयविष्वपि समवायेन नीलादिसत्त्वात् तत्रापि स्वाश्रयसमवायित्वसम्बन्धेन नीलाद्युत्पत्तिप्रसङ्गः, स्वाश्रयसमवायित्वसम्बन्धेन नीलाद्युत्पत्तिं प्रति समवायेन रूपत्वाद्यवच्छिन्नोत्पादस्य व्यापकतया तद्धेतुभूतस्य समवायसम्बन्धावच्छिन्नप्रतियोगिताकरूपादिसामान्याभावस्य रूपदशायां घटादावसत्त्वात् व्यापकसामग्रीविरहादेव तादृशसमवायित्वसम्बन्धेन नीलाद्युत्पत्तेरसम्भवात्, रूपरसादिकं प्रति रूपत्वरसत्वादिना एककार्थसमवायेन प्रतिबन्धकत्वस्यावश्यकत्वात्, अन्यथा रूपादिसत्त्वेऽपि घटादौ रूपाद्युन्तरापत्तेरित्यादिकं विभाव्यते, तदापि संयोगत्वविभागत्वाद्यवच्छिन्नं प्रति समवायिकारणत्वं द्रव्यत्वेनैव वक्तव्यं, कार्यमात्रवृत्तिजातेः समवायावच्छिन्नकार्यताया अवच्छेदकत्वनियमस्यान्यथोपपादयितुमशक्यत्वात् । न च समवायेनेव कालिकेनापि सम्बन्धेन यः संयोगत्वावच्छिन्नः तं प्रति द्रव्यत्वेन समवायिकारणतायामव्यभिचारात् जन्यभावमात्रं प्रत्येव द्रव्यत्वेन समवायिकारणत्वं स्यादिति वाच्यम् । तथापि क्षत्यभावात्, जातेः कालिकसम्बन्धेन जन्यतावच्छेदकताया मन्यथासिद्धेश्च, अन्यथा घटत्वपटत्वादीनां निखिलजातीनामुक्तकारणतायां कालिकसम्बन्धेन जन्यतावच्छेदकत्वे तद्भेदेनानन्तकार्यकारणभावकल्पनापत्तेरिति ॥ जन्यद्रव्यत्वावच्छिन्नं प्रति च न स्पर्शवत्त्वेन समवायिकारणत्वं गौरवात्, अनुद्भूतस्पर्शवत्त्वे प्रमाणाभावेन पिशाचाद्यवयवस्य निष्पर्शतदनारम्भकत्वप्रसङ्गाच्च । नापि स्पन्दवेगयोः समवायिकारणतावच्छेदकत्वेन सिद्धाया मूर्त्तत्वजात्या एव तथात्वं, मनसोऽपि द्रव्यारम्भकत्वापत्तेः, नित्यस्य स्वरूपयोग्यस्य फलावश्यम्भावनियमेन सहकार्यभावस्य तत्र वक्तुमशक्यत्वात्, किन्तु क्षित्यादिद्रव्यचतुष्कवृत्तिना जात्यन्तरेणैव तथात्वं, तादृशकारणतावच्छेदकत्वेनैव तेषु जात्यन्तरसिद्धेः । नचैवं जन्यसंस्कारत्वावच्छिन्नं प्रति समवायिकारणतावच्छेदकत्वेनात्मन्यविभुवृत्तिजात्यन्तरसिद्धिप्रसङ्गः, सुखसमवायिकारणतावच्छेदकत्वेन सिद्धस्यात्मत्वस्य ईश्वरावृत्तित्वेन तत्साङ्कर्यायोगादिति वाच्यम् । वेगस्थितिस्थापकभावनानुगतसंस्कारत्वजातौ प्रमाणाभावेन त-

द्वच्छिन्नस्य समवायिकारणतावच्छेदकत्वेन जातिसिद्धेर्वांयसदृशनदंशनतुल्यत्वात्, अनुगतधर्मावच्छिन्नकार्यतानिरूपितस्यैव कारणत्वस्य जातिव्यवस्थापकत्वात् अन्यथाऽतिप्रसङ्गात्। अस्तु वा मूर्त्तत्वेनैव जन्यद्रव्यत्वावच्छिन्नं प्रत्यारम्भकत्वम्, मनसि विलक्षणसंयोगविरहादेव द्रव्यारम्भासम्भवात्, नित्यस्येत्यादिनियमे प्रमाणाभावात्। नचैवं स्पन्दत्वावच्छिन्नं प्रत्यपि द्रव्यत्वेनैव समवायिकारणत्वसम्भवात् मूर्त्तत्वमपि जातिर्न स्यात् गगनादौ स्पन्दानुत्पादस्यापि सहकार्यभावप्रयुक्तत्वसम्भवादिति वाच्यम्। स्पन्दहेतोर्दण्डाद्यभिघातस्य गगनेऽपि सत्त्वात् तत्र सहकार्यभावस्य दुर्वचत्वात्, अन्यथा दण्डाद्यभिघातासमवायिकारणकस्य विलक्षणशब्दस्य तत्रानुत्पत्तिप्रसङ्गात्।

यत्तु विजातीयैकत्ववत्त्वेनैव जन्यद्रव्यत्वावच्छिन्नं प्रति समवायिकारणत्वं, न तु मूर्तत्वेन, नियताजनकव्यावृत्तरूपस्य सुवचत्वे तत्साधारणधर्मेण (१)कारणत्वस्यान्याय्यत्वात्, द्रव्यारम्भप्रयोजकस्य विलक्षणैकत्वस्यावयवमात्रनिष्ठत्वोपगमेन गगनादिष्विव अन्त्यावयविष्वपि प्रमाणविरहेणासत्त्वात् कारणतावच्छेदकादेर्यथाकार्यमुन्नयनादिति।

तत्तुच्छम्, एकत्वजन्यतावच्छेदिकया निखिलजन्यैकत्वनिष्ठजात्या साङ्कर्येण उक्तवैजात्यासिद्धेः मूर्तत्वजात्यपेक्षया विलक्षणैकत्वानां गुरुत्वेन अनकतानवच्छेदकत्वाच्च, नियताजनकव्यावृत्तस्य लघुनः सम्भव एव तत्साधारणरूपेण जनकत्वस्य न्याय्यत्वात्, अन्यथा दण्डत्वादेर्नियताजनकसाधारण्यात् आरण्यकान्यदण्डत्वादिनैव घटत्वाद्यवच्छिन्नं प्रतिहेतुतापत्तेः। तुल्यन्यायेन द्रव्यचाक्षुषत्वाद्यवच्छिन्नं प्रति विषयस्य जन्यस्पर्शत्वावच्छिन्नं प्रति च समवायिनो विलक्षणैकत्वेन हेतुत्वसिद्ध्या तादृशवैलक्षण्यैरपि साङ्कर्येण जन्यद्रव्यजनकतावच्छेदकतावच्छेदकतया एकत्वगतवैजात्योपगमासम्भवाच्च। न चान्त्यावयविनामप्येकत्वेषु द्रव्यारम्भप्रयोजकं वैजात्यमुपेतव्यम्, नित्यानामेव स्वरूपयोग्यानां फलोपधायकत्वनियमेन तेषां सहकार्यभावेनापि कार्याजनकत्वसम्भवादिति वाच्यम्। तथासति क्षित्यादिचतुष्क एव लाघवेन द्रव्यारम्भप्रयोजकजातेः सम्बन्धकल्पनाया उचितत्वात्। इत्थञ्च जन्येषु रूपस्पर्शेष्वपि मूर्त्तत्वेन भूतचतुष्टयवृत्त्यवान्तरवैजात्येनैव वा समवायिकारणत्वं स्वीकार्यम्। पाकजरूपादिकं प्रति विलक्षणतेजःसंयोगवत्त्वेन पाकाजन्यजन्यरूपादिकं प्रति च स्वाश्रयसमवेतत्वप्रत्यासत्त्या रूपत्वादिना हेतुत्वस्यावश्यकत्वेन तादृशविशेषसामग्रीविरहादेव वायवीयपरमाणौ रूपरसाद्यनुत्पत्तिसम्भवात्, स्पर्शत्वाद्यवच्छिन्नं

(१) जनकतदितरवृत्तिधर्मेण।

प्रति स्पर्शत्वादिना एकार्थसमवायेन प्रतिबन्धकताध्रौव्येणापि तत्र स्पर्शोत्पादायोगाच्च । न च जन्यानां रूपरसस्पर्शानां समवायिकारणतावच्छेदकत्वेन पार्थिवान्यपरमाणुभिन्नेषु यावन्मूर्तेषु जातिविशेष एव कल्प्यतां, तथाच नित्यस्येत्यादिव्याप्तिरपि निर्वहतीति वाच्यम् । प्रत्यक्षप्रमाणसिद्धैर्जलत्वतेजस्त्ववायुत्वजातिभिः साङ्कर्येण तादृशवैजात्यस्यासिद्धेः । जन्यजलत्वावच्छिन्नं प्रति जलत्वादिनैव समवायिकारणत्वेन जलत्वजातेः परमाणुवृत्तितया तादृशवैजात्यव्याप्यत्वासम्भवात्, न हि स्पन्द इव जलादित्रिकेऽपि मूर्त्तत्वेनैव समवायिकारणत्वं, पार्थिवादिपरमाणावपि जलाद्युत्पत्तिप्रसङ्गात्, नित्यस्येत्यादिव्याप्तिवादिनां सहकार्यभावेन तत्र तदनुत्पादस्य वक्तुमशक्यत्वात् । न च जन्यं जलं प्रति शीतस्पर्शवत्त्वेन तेजः प्रति उष्णस्पर्शवत्त्वेन वायुं प्रति च क्षितिव्यावृत्तविलक्षणानुष्णाशीतस्पर्शवत्त्वेनैव समवायित्वसम्भवात् जलत्वादिकं न परमाणुवृत्तीति वाच्यम् । जलत्वाद्यपेक्षया शीतस्पर्शवत्त्वादेर्गुरुतया तद्रूपेण जलादिकं प्रत्यहेतुत्वात्, अनुद्भूतस्पर्शे प्रमाणाभावेन रसनचक्षुस्त्वगादीनामवयवस्य निःस्पर्शतया तेषामनुत्पत्तिप्रसङ्गात्, जलं प्रति शीतस्पर्शवत्त्वेनेव स्नेहवत्त्वेन तेजः प्रति च उष्णस्पर्शवत्त्वेनेव भास्वररूपवत्त्वेनापि विनिगमकाभावेन कारणत्वप्रसक्तौ लाघवेन जन्यजलतेजोजनकतावच्छेदकतया प्रमाणसिद्धाभ्यां परमाणुसाधारणजातिभ्यामेव रूपादित्रिकसमवायिकारणतावच्छेदकजातेः साङ्कर्यस्य दुर्वारत्वाच्च ।

एतेन जन्ययोरेव गुरुत्वयोः समवायिकारणतावच्छेदकतया पाथःपृथिव्योरेकजातिसिद्धिरित्यप्यपास्तम्, जलत्वपृथ्वीत्वाभ्यां जलत्वेनैव वा साङ्कर्येण तादृशजातेरसम्भवात्, तस्मिन्नित्यस्येत्यादिव्याप्तेः प्रामाणिकत्वे परमाणुभिन्नमूर्तत्वेनैव जन्यस्पर्शादिकं प्रति समवायित्वेन तत्त्वं वाच्यम् । न च जन्यस्पर्शत्वादेर्जन्यजलत्वादेर्वा कार्यतावच्छेदकत्वे मानाभावात् तदवच्छिन्नं प्रति मूर्त्तत्वादिना समवायिकारणत्वाभावेऽपि न क्षतिः, कार्यमात्रवृत्तिजातेः समवायिकारणजन्यतावच्छेदकत्वनियमादेव स्पन्दत्वावच्छिन्नं प्रति मूर्त्तत्वादिना तथात्वस्वीकारादिति वाच्यम् । स्पर्शादिमति स्पर्शाद्यनुत्पत्त्या जन्यस्पर्शत्वादेः स्पर्शादिप्रतिबध्यतावच्छेदकत्वेन कार्यतावच्छेदकत्वध्रौव्यात् । यदि च शब्दासमवायिकारणीभूतसंयोगस्याभिघातत्वे प्रमाणाभावः शब्दस्य भेरीदण्डाद्यभिघातनिमित्तकारणकत्वेनैवाभिघातजन्यत्वादिति स्पन्दासमवायिकारणस्याभिघातादेरसत्त्वादेव गगनादौ न तस्य उत्पाद इत्युच्यते । तदापि स्पन्दत्वावच्छिन्नं प्रति न द्रव्यत्वेन समवायिकारणत्वं, जन्यभावत्व-

स्पन्दत्वयोः समान्यविशेषयोरेकप्रयोजकप्रयोज्यतायामन्यथासिद्धेः, किन्तु मूर्त्तत्वेनैव तथात्वमिति वदन्ति ॥

नीलादिरूपे तिक्तादिरसे गन्धादिसामान्ये च पृथिवीत्वेनैव समवायिकारणत्वं तादृशकारणतावच्छेदकतयैव पृथिवीत्वजातिसिद्धेः, अन्यथा द्रव्यत्वेन मूर्त्तत्वादिना वा तथात्वे जलप्रभृतौ गन्धस्य तेजःप्रभृतौ तिक्तादिरसस्य वायुप्रभृतौ च नीलादिरूपस्याप्युत्पत्तिप्रसङ्गात् । न च पाकजे गन्धे विलक्षणतेजःसंयोगत्वेन तद्भिन्ने च तत्र स्वाश्रयसमवेतत्वसम्बन्धेन गन्धत्वादिना हेतुत्वात् तदुभयविशेषसामग्रीविरहादेव नोक्तातिप्रसङ्ग इति वाच्यम् । विलक्षणतेजःसंयोगत्वेनैव पाकजगन्धरसादिकं प्रत्यसमवायिकारणतया तादृशसंयोगस्य तेजस्यपि सत्त्वात् तत्रापि पाकजगन्धरसाद्यापत्त्या पृथिवीत्वेनैव तदुभयसमवायिकारणत्वस्यावश्यकत्वात् । तेजःप्रतियोगिकत्वविशिष्टेन विलक्षणसंयोगत्वेन तादृशगन्धादिहेतुत्वे विलक्षणसंयोगत्वविशिष्टेन तेजःप्रतियोगित्वेनापि तथात्वापत्तौ गुरुतरकार्यकारणभावद्वयापत्तेः । न च पाकान्यविलक्षणसंसर्गेण तेजस्त्वेनैव पाकजं प्रति निमित्तकारणत्वात् तेजसि च तेजसस्तादृशसम्बन्धेनासत्त्वान्नोक्तातिप्रसङ्ग इति वाच्यम् । पूर्वपाकस्य तैजात्यासिद्धौ तादृशसंयोगेन तेजसि कारणत्वकल्पनस्यायोगात् गन्धनीलादिजनकतावच्छेदकतयैव तस्योपेयत्वात् । कारणतावच्छेदकतया संसर्गस्येव तद्गतधर्मस्याप्रसिद्धेः, अन्यथा गुरुतरेण नानाविधेन वा क्लृप्तसम्बन्धेन चाक्षुषादिकार्यं प्रति चक्षुरादेः कारणत्वं न स्यात् तादृशकार्यस्य जनकतावच्छेदकत्वेनैव चक्षुरादेः स्वग्राह्येषु संसर्गान्तरस्य सिद्धेः सुवचत्वादिति ॥ न च जम्बीरनिम्बादिजलेष्वपि अम्लतिक्तादिरसोत्पत्तेर्न तत्र पृथिवीत्वेन समवायिकारणत्वं सम्भवतीति वाच्यम् । जम्बीरादिजलेषु तदुपष्टब्धस्य जम्बीरादिभागस्यैवाम्लादिरसस्य परम्परया प्रत्ययात्, अन्यथा पलतोलकादिमितेन जम्बीरादिजलेन समं घटाश्रितजलान्तरस्य संयोगात् जायमानस्य महाजलस्यापि कारणगुणक्रमेणाम्लादिरसोत्पत्तौ तदनुभवस्य ब्रह्मणोऽपि दुर्वारतापत्तेः ॥ निबिडादौ संयोग इव कोमलकठिनादौ स्पर्शेऽपि पृथिवीत्वेनैव समवायिकारणत्वं तादृशसंयोगस्पर्शादेः तत्र तत्रासमवायिकारणत्वाच्च नातिप्रसङ्गः । अनुष्णाशीतस्पर्शसामान्यं प्रति पृथिवीत्वेन समवायिकारणत्वमिति तु रिक्तं वचः । शीतोष्णभिन्नस्पर्शत्वावच्छिन्नं प्रति पृथिवीत्वेन हेतुत्वे वायोरपि पृथिवीत्वापत्तेः पृथिवीस्पर्शमात्रवृत्त्यनुगतैकजातेरसत्त्वेन जन्यतावच्छेदकत्वायोगात्, कोमलकठिनौ च स्पर्शाविव, न तु संयोगप्रभेदौ, त्वचेव चक्षुषापि प्रत्यक्षापत्तेरि-

ति॥ स्वर्णत्वपद्मरागत्वाद्यवच्छिन्ने तत्तद्विलक्षणरूपवत्त्वेन दधिदुग्धत्वाद्यवच्छिन्ने विलक्षणरसवत्त्वेन चम्पकत्वाद्यवच्छिन्ने च विलक्षणगन्धवत्त्वेनैव समवायिकारणत्वं, कारणतावच्छेदकविशिष्टस्य पूर्वसत्त्वापेक्षणाच्च परमाणौ द्व्यणुकान्तरस्योत्पाददशायां तज्जातीयद्व्यणुकस्य नोत्पादः । पृथिवीत्वेनैव द्रव्यत्वेनैव वा तेष्वपि समवायिकारणत्वम्, सामान्यविशेषयोरेकधर्मावच्छिन्नाप्रयोज्यत्वप्रवादस्य गाथामात्रत्वात् , रूपविशेषादेरेकार्थसमवायेन निमित्तकारणत्वकल्पनयैवातिप्रसङ्गभङ्गादित्यपि वदन्ति ।

स्वर्णपद्मरागादिगतविलक्षणरूपत्वावच्छिन्नं प्रति न स्वर्णत्वादिना हेतुत्वं, स्वर्णाद्यारम्भकपरमाणौ तादृशरूपाद्यनुत्पत्तिप्रसङ्गात् , द्रव्यत्वसाक्षाद्व्याप्याया एव जातेर्नित्यवृत्तित्वात् । नचेष्टापत्तिः, पद्मरागादिद्व्यणुकरूपाद्युत्पत्त्यर्थं तदारम्भकपरमाणौ तादृशरूपादेरवश्याभ्युपेयत्वात् , किन्तु पृथिवीत्वेनैव द्रव्यत्वेनैव वा तत्रापि तथात्वं, तादृशरूपत्वाद्यवान्तरवैजात्यावच्छिन्नं प्रति तादृशरूपत्वादिना विलक्षणपाकत्वादिना च हेतुताद्वयस्यावश्यकतया तथाविधविशेषसामग्रीविरहादेव घटादौ न तादृशरूपरसादेरुत्पादापत्तिप्रसङ्गः ।

स्वतन्त्रास्तु–स्वर्णत्वपद्मरागत्वदधित्वदुग्धत्वाद्यवच्छिन्नं प्रत्यपि विभिन्नजातीयसंस्थानवत्त्वेनैव समवायिकारणत्वम् , अन्यथा रूपरसादिमत्त्वेन तथात्वे स्वर्णरजतयोः पद्मरागचूर्णयोः सक्तुदुग्धयोर्दधिशर्करायोश्च मिथः संयोगेन द्रव्यान्तरस्योत्पत्तिदशायां सुवर्णपद्मरागदुग्धाद्युत्पादस्य दुर्वारत्वापत्तेः । न च तत्र द्रव्यान्तरमेव नोत्पद्यते, प्रत्यक्षबाधापत्तेः, दुग्धादिव्यावृत्तविलक्षणरसस्याननुभवप्रसङ्गाच्च । न च स्वर्णादेर्नाशोत्तरं तदारम्भकैः परमाणुभिरेव तत्र द्रव्यान्तरस्योत्पादः, तन्नाशकस्यासत्त्वात् तादृशद्रव्यस्यावयवेषु स्वर्णत्वाद्यनुभवस्य सर्वजनसिद्धत्वाच्च । नचैवं विजातीयानामारम्भकत्वेऽपसिद्धान्तः । द्रव्यत्वसाक्षाद्व्याप्यजात्या द्रव्यविभाजकजात्या वा विजातीयानामेव मिथः संयोगेन द्रव्यानारम्भस्य सिद्धान्तसिद्धत्वात् , अन्यथा सुवर्णरजतयोः शणकार्पासादिसूत्रयोश्च मिथः संयोगेन द्रव्यानुत्पत्तिप्रसङ्गात् । एवञ्च पद्मरागदुग्धादिगतविलक्षणरूपरसत्वाद्यवच्छिन्नं प्रति पद्मरागत्वदुग्धत्वादिनैव समवायिकारणत्वं, पद्मरागाद्यारम्भकपरमाणौ तादृशरूपाद्यसत्त्वेऽपि क्षतिविरहात् । नचैवं स्वर्णादिद्व्यणुकस्य रूपविशेषादावसमवायिकारणालाभ इति वाच्यम् । रूपध्वंसाभावविशिष्टं पीतरक्तादिकं प्रति पीतत्वरक्तत्वादिना रसध्वंसाभावविशिष्टं मधुरतिक्तादिकं प्रति च मधुरतिक्तत्वादिना रूपरसादेरसमवायिकारणतया स्वर्णदुग्धादीनामारम्भक-

परमाणौ पीतादिरूपस्य मधुरादिरसस्य सत्त्वेव स्वर्णादौ विलक्षण-पीतादेः दुग्धादौ च विलक्षणमाधुर्यादेरसमवायिकारणतानिर्वाहात् इति प्राहुः । तच्चिन्त्यम् ॥

विलक्षणमाधुर्ये शीतस्पर्शे च सांसिद्धिकद्रवत्वेन स्नेहे च जन्यजल-त्वेनैव समवायिकारणत्वम् । न च जलरसस्य वैलक्षण्यमनुपलम्भबाधि-तं, हरीतक्यादिकषायसम्पर्कस्य तद्व्यञ्जकत्वात् । न च हरीतक्या ए-वासौ माधुर्यप्रकर्षः जलसंयोगेन व्यज्जित इति साम्प्रतम् । हरीत-क्यामलक्यादेरनुभूतकषायरसवत्वेन तत्र मधुररसस्यासम्भवात्, कषाय-भिन्नानां तदवयवानां प्रमाणबाधितत्वात् 'षड्रसा हरीतकी' इत्यादिभिषग्-व्यवहारस्य षड्रसकार्यकारित्वेनाप्युपपत्तेः । ननु हरीतक्यादावेव सजल-शरीरोष्णसंयोगेन कषायरसविनाशपूर्वकमुत्पादितो मधुरो रसो रस-नया गृह्यते इत्येव किं न स्यात्, न स्यात् येषामेव दन्तदष्टानां कषायख-ण्डानां जलसंपर्केण माधुर्यमवधार्यते तेषामेव निर्जलानामप्युत्तरकालं मधुरताप्रतीत्यापत्तेः । न च पाकादुत्पन्नोऽपि कषायद्रव्यस्य मधुरो रसः पयसैव व्यञ्जनीय इति नोक्तदोषः । तावतापि तदानीं कषायरसास्वाद-स्यानुपपादनात् प्रत्यक्षे विषयस्यापि हेतुत्वात् एतावत्कल्पनाजालम-पेक्ष्य लाघवादनुभूयमाने जलरस एव मधुरत्वादिजातेः कषायवस्तुस-म्पर्कव्यङ्ग्यतया कल्पनौचित्याच्च ।

ननु घृष्टे श्रीखण्डपिण्डेपि शीतस्पर्शस्य सत्त्वान्न तत्र जलत्वेन स-मवायिकारणत्वं, न च घर्षकजलस्यैवासौ शीतस्पर्शः, तज्जलशैत्यापेक्ष-याऽतिशयितस्यानुभवेन तदीयत्वासम्भवात् । न च घर्षणाद्बहिरागतस्य श्रीखण्डान्तर्गतजलान्तरस्यैव शैत्यातिशयस्तत्रोपलभ्यते इति साम्प्रतम् । जलान्तरकल्पनमपेक्ष्य क्लृप्तश्रीखण्डस्यैव शैत्यकल्पनाया लघुत्वात् । न च घर्षकजलस्यैव शैत्यप्रकर्षः श्रीखण्डक्षोदैरभिव्यज्यते इति पूर्वं न तद्-ग्रह इति वाच्यम् । श्रीखण्डादिक्षोदस्यैव शैत्यप्रकर्षो घर्षकजलसंयोगेना-भिव्यज्यते इत्यस्यापि सुवचत्वात् एकशेषस्य दुष्करत्वात् इति चेन्न ।

चन्दनखण्डस्यानुभूयमानानुष्णाशीतस्पर्शवत्त्वानुरोधेन तदवयवी-भूतक्षोदानामपि तादृशस्पर्शध्रौव्येण तदारभ्यस्य घृष्टचन्दनपिण्डस्य शीतस्पर्शवत्त्वासम्भवात् अवयविशैत्यं प्रति अवयवशैत्यस्य हेतुत्वात् । न च घर्षकजलस्य सम्पर्क एव चन्दनक्षोदेषु प्राक्तनमनुष्णाशीतस्पर्शं विनाश्य सातिशयं शीतस्पर्शं जनयिष्यत इति वाच्यम् । अनन्तस्पर्श-तन्नाशतद्धेतुत्वादिकल्पनामपेक्ष्य क्षोदानामेव घर्षकजलनिष्ठशैत्यातिशय-व्यञ्जकत्वकल्पनायां लाघवादिति सम्प्रदायः ।

न च घर्षकजलस्य शैत्यप्रकर्षोपगमे श्रीखण्डपेषणात् पूर्वं जलमिदं शीतमेव न तु शीततरमित्यादिस्पार्शनप्रतीत्यनुपपत्तिः, पूर्वं जलस्य शैत्यप्रकर्षव्यञ्जकचन्दनक्षोदसम्पर्कविरहेण तत्र सतोऽपि तस्याग्रहात्, उक्तप्रत्ययस्य भ्रमत्वस्वीकारे तु पूर्वं श्रीखण्डशैत्यातिशयव्यञ्जकजलसम्पर्कस्यासत्त्वेन तत्र सतोऽपि शैत्यातिशयस्य तदानीमग्रहेण श्रीखण्डक्षोदो न शीतः किन्त्वनुष्णाशीत इत्यादिप्रत्ययानामपि भ्रमत्वं सुवचम् । न च घर्षकपयस्तु पूर्वं न शीततरमित्यादिप्रत्ययस्य प्रामाण्यानुरोधेन श्रीखण्डमध्यवर्तिनो जलान्तरस्य घर्षणाद्बहिरागतस्य शैत्यातिशयो गृह्यते इत्युपेयम् । तथासति घृष्यमाणचन्दनक्षोदेषु क्षोदोऽयं न शीतः किन्त्वनुष्णाशीतः इत्यादिमतेरसाध्यतानुरोधेन जलसम्पर्कात् क्षोदेष्वनुष्णाशीतस्पर्शविनाशशीतस्पर्शोत्पादयोरप्युपगन्तुमौचित्यात् कल्पनागौरवस्य उभयमतेऽप्यविशिष्टत्वादिति पुनरुक्तानाः ।

ननु स्वाभाविकद्रवत्वसामान्यं प्रति न जलत्वेन समवायित्वं तैलादिद्रवत्वे व्यभिचारात् । न च तैलेऽनुभूयमानद्रवत्वं तदुपष्टम्भकजलस्यैवेति वाच्यम् । तादृशजले प्रमाणाभावात् । दुग्धेन पच्यमानस्य तण्डुलादेः दाहप्रतिबन्धार्थमेव दुग्धस्य जलोपष्टभ्यत्वस्वीकारात्, अन्यथा दुग्धेनेव तैलेनापि पच्यमानस्य वस्तुनः तदुपष्टम्भकजलेन प्रतिबन्धात् दाहप्रसङ्गात्, न ह्युपष्टम्भकान्यस्यैव जलस्य संयोगो दाहविरोधी, दुग्धादिना पच्यमानस्य तण्डुलादेस्तदुपष्टम्भकेनापि जलेन दाहप्रतिबन्धात् इति चेन्न ।

तिलाद्यारम्भकैरेव परमाणुभिर्लाघवेन तन्नाशोत्तरं तैलाद्यारम्भात् तेषां स्वाभाविकद्रवत्वसत्त्वे तदारब्धतिलादेरपि तादृशद्रवत्वस्य दुर्वारत्वापत्तेः । न च तिलाद्युत्पत्तेः पूर्वं पाकाद्विनष्टद्रवत्वैरेव तिलाद्यारम्भकाणुभिः पाकान्तरोपजातद्रवत्वविशिष्टैः तैलमारभ्यते इत्युक्तदोषानवकाशः, कल्पनागौरवापत्तेः, साक्षात् परम्परया वा पाकाप्रयोज्यस्यैव द्रवत्वस्य सांसिद्धिकत्वेन तावतापि तैलस्य तादृशद्रवत्वानिर्वाहाच्च, अन्यथा पाकजन्यद्रवत्वस्यैव सांसिद्धिकत्वे कारणगुणपूर्वकस्य घृतादिद्रवत्वस्यापि सांसिद्धिकत्वापत्तेः । नचैवं तैलस्य जलोपष्टम्भ्यत्वे दाहो न स्यात् जलसम्बन्धस्य दाहविरोधित्वादिति वाच्यम् । स्निग्धतमान्यस्यैव जलस्य दाहप्रतिकूलत्वात् तैलेऽनुभूयमानस्नेहस्य प्रकृष्टतमत्वाभावात् । एतेन तैलघृतादौ स्नेहसत्त्वात् न तत्र जलत्वेन समवायित्वमित्यपि नाशङ्कनीयम्, तैलघृतादेः समवायेन स्नेहवत्त्वे तदारम्भकैः परमाणुभिरारब्धस्य तिलदध्यादेरपि स्नेहोत्पत्तिप्रसङ्गात् । नहि मेरैवपाकाद्विन-

घृस्नेहैरणुभिस्तिलादिरारब्धस्तैरेव पाकान्तरादुपजातस्नेहोपहितैस्तैला-दिकं जन्यते येन तैलादौ स्नेहः तदर्जकतिलादौ च स्नेहविरहः सम्पद्यते, पाकस्य स्नेहतद्विनाशौ प्रत्यजनकत्वात्, जनकत्वे वा कल्पनागौरवापत्तेरित्यास्तां विस्तरः ॥

भास्वररूपमुष्णस्पर्शं च जन्यं प्रति तेजस्त्वादिना समवायित्वम्, निदाघोष्मप्रभृतीनामपि रूपं भास्वरमेव किन्त्वनुद्भूतम्, अतो न तेषां चक्षुषा ग्रहः। न च वह्न्यादियोगात् जलेऽप्युष्णस्पर्शस्योत्पत्त्या न तत्र तेजस्त्वेन समवायित्वमिति वाच्यम्। वह्न्यादिगतस्पर्शेनैव परम्परया जलादावुष्णत्वप्रतीत्युपपत्तौ समवायेन तस्योष्णस्पर्शवत्त्वे प्रमाणाभावात्, स्पर्शसामान्यं प्रति एकार्थसमवायेन स्पर्शस्य विरोधितया शैत्यवतो जलस्य उष्णोत्पत्त्यसम्भवाच्च। न च वह्न्यादिसंयोगेनैव जलादौ शैत्यादिकं विनाश्य उष्णस्पर्शं उत्पादयिष्यते निमित्तीभूतस्य तादृशसंयोगस्य नाशादेव च उष्णस्पर्शविनाश उत्पस्यते, सम्पत्स्यते च पुनः कारणशैत्यक्रमेण शैत्यान्तरस्य ग्रह इति साम्प्रतम्। कल्पनागौरवापत्तेः। न चोष्णशीतौ द्वावपि स्पर्शौ जलस्य स्वाभाविकावेव, शीतं जलमुष्णं जलमिति कालभेदेन स्पार्शनप्रतीत्योरेकत्र प्रमात्वस्य नियन्तुमशक्यत्वात्, तादृशस्पर्शयोश्च तेजःसंयोगतदभावव्यङ्ग्यत्वादेव नैकदाऽनुभव इति वाच्यम्। पयस्युष्णस्पर्शान्तरस्य तत्प्रत्यक्षे तेजःसंयोगहेतुत्वस्य च कल्पनामपेक्ष्य लाघवेन उष्णं जलमितिप्रतीतेस्तैजसोष्णतामादाय परम्परया प्रमात्वकल्पनाया एव युक्तत्वात्। तेजोविगमदशायां नेदमुष्णं जलमिति स्पार्शनप्रमानुपपत्तेश्च ॥

समवायसम्बन्धावच्छिन्नकार्यतानिरूपितं समवायस्वाश्रयसमवायान्यतरप्रत्यासत्त्या कारणत्वमसमवायिकारणत्वम्। द्रव्यतत्समवेतादिचाक्षुषं प्रति रूपादेः महत्त्वस्य वा समवायेन स्वाश्रयसमवायेन च निमित्तकारणत्वं न समवायावच्छिन्नया कार्यतया निरूपितं किन्तु विषयतासम्बन्धावच्छिन्नया, समवायेन घटत्वावच्छिन्नं प्रति च कपालत्वादिना समवायिकारणत्वं न समवायेन स्वाश्रयसमवायेन वाऽवच्छिन्नं, किन्तु तादात्म्येनैव इति तयोर्व्युदासः। इच्छादिकं प्रति ज्ञानादेः कारणत्वस्यालक्ष्यतायाः सकलतान्त्रिकसिद्धत्वात् तद्वारणार्थमात्मविशेषगुणावृत्तित्वेन कारणत्वं विशेषणीयम्। विभागं प्रत्यपि संयोगस्य कारणत्वमसमवायिकरणत्वमेव, विभागत्वाद्यवच्छिन्नकार्यताप्रतियोगिकसंयोगादिवृत्तिकारणतान्यत्वं वा विशेषणं देयम्, अत एवाभिघातादिकं प्रति स्पर्शवेगादेरेकार्थसमवेतत्वप्रत्यासत्त्या निमित्तकारणतायामपि नातिव्याप्तिः।

अथ जन्यद्रव्यत्वावच्छिन्नं प्रति आरम्भकसंयोगस्य न संयोगत्वेनासमवायिकारणत्वं कपालद्वयस्य परमाणुद्वयस्य वा यथाकथञ्चित्संयोगादेव द्रव्योत्पत्तिप्रसङ्गात् । (अपूर्णः)

शरीरकारणतावाद (३२) वीचिः ।

शरीराद्यतिरिक्तस्य ज्ञानाद्यवच्छेदकत्वेऽतिप्रसङ्गस्तद्वारणायावच्छेदकतासम्बन्धेन जन्यज्ञानत्वावच्छिन्नं प्रति आत्मसमवेतजन्यविशेषगुणत्वावच्छिन्नं प्रति वा शरीरत्वेन शरीरस्य तादात्म्यप्रत्यासत्त्या हेतुत्वं कल्प्यते । अत्राप्यनुमिन्यादौ परामर्शादीनां विशिष्टबुद्धौ विशेषणधियः सामानाधिकरण्यप्रत्यासत्त्या इव समानावच्छेदकत्वप्रत्यासत्त्यापि हेतुत्वं व्यवस्थापनीयम् । निर्विकल्पस्यावच्छेदकतानियमार्थमेव तादृशकल्पनम् । शरीरत्वादिकन्तु न जातिविशेषः पृथिवीत्वादिना सङ्करात् । नापि ज्ञानावच्छेदकत्वं, तस्यैव नियामकत्वे आत्माश्रयप्रसङ्गात् । अपि तु चेष्टावदन्त्यावयवित्वम् । चेष्टात्वञ्च प्रयत्नाधीनक्रियानिष्ठजातिविशेषः । शरीरावयवस्य ज्ञानावच्छेदकत्वोपगमे तु ज्ञानजनकतावच्छेदककोटौ अन्त्यावयवित्वं न निवेशनीयम् । अत एव खण्डशरीरोत्पत्तिकालेऽपि महाशरीरावयवावच्छेदेन ज्ञानाद्युत्पद्यते । चेष्टावत्त्वमुपलक्षणतया जनकतावच्छेदकमतो ज्ञानाव्यवहितप्राक्काले नियमतः शरीरे चेष्टाया असत्त्वेपि न क्षतिः ।

इदमत्रावधेयम् । मैत्रीयचक्षुःसंयोगादितो यदा मैत्रात्मनि चाक्षुषादिकं समवायेन उत्पद्यते तदा चैत्रशरीरे कथमवच्छेदकतया तन्नोत्पद्यते । न चावच्छेदकतासम्बन्धेन तदात्मसमवेतज्ञानं प्रति तन्मनःसंयोगस्यापि हेतुत्वान्न तदापत्तिः मैत्रीयमनःसंयोगस्य चैत्रशरीरेऽसत्त्वादिति वाच्यम् । यतो ज्ञानत्वावच्छिन्नोत्पत्तौ चैत्रीयमनोयोगरूपविशेषसामग्रीसमवहितशरीराद्यात्मकसामान्यसामग्र्या अपि नियामकत्वात् तस्याश्च तदानीं चैत्रशरीरे सत्त्वादुक्तापत्तिर्दुर्वारैव, तस्मात्तत्पुरुषीयचक्षुर्विषयसंयोगादेर्जन्यतावच्छेदककोटौ चाक्षुषाद्यंशे तत्तदात्मसमवेतत्ववत्तच्छरीरावच्छिन्नत्वमपि निवेश्यं तथाच शरीरहेतुत्वं निर्युक्तिकम् ।

अथ चक्षुःसंयोगजन्यतावच्छेदककोटौ तत्तदात्मसमवेतत्ववत्तच्छरीरावच्छिन्नत्वनिवेशे आत्मभेदेन शरीरभेदेन च तद्धेतुताबाहुल्यमिति अविशेषितचक्षुःसंयोगत्वादिनैव हेतुता कल्प्यते, यथा च विषयनिष्ठविषयतासमवाययोः कार्य्यकारणप्रत्यासत्तित्वं तथात्मनिष्ठसमवायस्वजनका·

दृष्टसमवाययोः शरीरनिष्ठावच्छेदकत्वस्वजनकादृष्टावच्छेदकत्वयोरपि तथात्वमुपेयते अतो नातिप्रसङ्ग इति चेत् ।

तथापि शरीरहेतुत्वमकिञ्चित्करमेव शरीरभिन्ने स्वजनकादृष्टावच्छेदकत्वसम्बन्धेन तादृशकारणविरहादेवातिप्रसङ्गनिरासात् ।

यदि च स्वजनकादृष्टावच्छेदकत्वस्य जनकताघटितत्वेन अतिगुरुशरीरतया तदुपेक्ष्य स्वसमवायिसंयुक्तमनःसंयोगसम्बन्धेनैव चक्षुःसंयोगादेर्हेतुता स्वीक्रियते, तदापि शरीरस्य स्वतन्त्रहेतुताकल्पनमपेक्ष्य शरीरमनोयोगवृत्तिजातिविशेषं स्वीकृत्य तेन रूपेण तस्य सम्बन्धता स्वीकरणीया, तादृशसंयोगस्य शरीरभिन्नेऽसत्त्वान्नातिप्रसङ्गः । न च तादृशसंयोगस्य शरीर इव मनस्यपि सत्त्वात्तत्रावच्छेदकतया ज्ञानापत्तिर्दुर्वारैव इति शरीरहेतुताकल्पनमावश्यकमिति वाच्यम् । शरीरत्वात्मकोपाधिपुरस्कारेण शरीरहेतुताकल्पनमपेक्ष्य तादृशापत्तिवारणाय संयोगसम्बन्धेन मनस्त्वजात्यवच्छिन्नस्यैवावच्छेदकत्वसम्बन्धेन ज्ञानं प्रति हेतुतायाः कल्पयितुमुचितत्वादिति ।

यत्तु अवच्छेदकतासम्बन्धेन ज्ञानं प्रति तादात्म्यसम्बन्धेन शरीरस्य हेतुत्वे महाशरीरनाशकालोत्पन्नज्ञानस्यापि महाशरीरमवच्छेदकं स्यात् तादृशज्ञानाव्यवहितप्राक्काले तत्र मनःसंयोगसत्त्वेन निरुक्तपरम्परासम्बन्धेन चक्षुःसंयोगादेः सत्त्वात् । न चेष्टापत्तिः, भिन्नकालीनयोराधाराधेभावस्येवावच्छेद्यावच्छेदकभावस्याप्यनुभवविरुद्धत्वात् इति कार्यसहभावेन तादृशशरीरहेतुत्वमावश्यकमिति ।

तदसत्, संयोगसम्बन्धेन मनसः कार्यसहभावेन हेतुतयैव तादृशापत्तिवारणसम्भवात् । न च कार्याधिकरणक्षणावच्छेदेन शरीरमनःसंयोगनाशोत्पत्तिक्षणेऽपि ज्ञानोत्पत्त्या संयोगेन मनसः तादृशहेतुत्वं न सम्भवतीति वाच्यम् । तदा ज्ञानोत्पत्तेरेवाप्रामाणिकत्वादिति समासः ॥

* इति शरीरकारणतावाद (३२) वीचिः ॥ *

अथ महामहोपाध्यायहरिरामभट्टाचार्यविरचितः

काशीमरणकारणतावाद (३३) वीचिः ।

काशीमरणं मोक्षकारणं तत्त्वज्ञानद्वारा इति सिद्धान्तः ।

अत्राक्षिपन्ति-काशीमरणस्य साक्षादेव मुक्तिहेतुत्वे किं तत्त्वज्ञानेन । न च

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥

इतिश्रुत्या तत्त्वज्ञानस्य मोक्षत्वावच्छिन्नं प्रति हेतुत्वे सिद्धे तत्रापि तत्त्वज्ञानं कल्पनीयमिति वाच्यम् । यथा "स्वर्गकामोऽश्वमेधेन यजेत" इत्यादौ स्वर्गत्वसामानाधिकरण्येन यागजन्यत्वं प्रतीयते, तथा तादृशश्रुत्यापि मोक्षत्वसामानाधिकरण्येन तत्त्वज्ञानजन्यत्वप्रत्यायनात् । न च काशीमरणस्य मोक्षविशेषकारणत्वे कारणवैशिष्ट्यमेव कार्यतावच्छेदकं वाच्यम्, तत्त्वज्ञानस्यापि मोक्षविशेषे तदेव कार्यतावच्छेदकमिति गौरवात् तत्त्वज्ञानस्य मोक्षसामान्ये काशीमरणस्य विजातीयतत्त्वज्ञाने श्रवणादीनां विजातीयतत्त्वज्ञाने हेतुत्वकल्पनमुचितमिति वाच्यम् । तत्त्वज्ञानगतजातेरप्रामाणिकत्वेन कारणविशिष्टत्वमेव कार्यतावच्छेदकं भवद्भिरपि वाच्यम्, एवञ्च मयापि तदेव कार्यतावच्छेदकं मोक्षेऽपि काशीमरणस्य वाच्यम् इत्युक्तानाः ।

तन्न, कार्यतावच्छेदकग्राहकप्रमाणमेव शरीरलाघवसहकृतं तत्त्वज्ञानगतजातिं साधयति इति सैव काशीमरणजन्यतावच्छेदिका, विशिष्टत्वस्य बहुतरपदार्थघटितत्वेनातिगुरुत्वात् । न च मयापि विजातीयदुःखध्वंसत्वमेव जन्यतावच्छेदकं वाच्यं न विशिष्टत्वमिति वाच्यम् । विजातीयदुःखध्वंसत्वापेक्षया तत्त्वज्ञानगतवैजात्यस्य लघुत्वात् दुःखनिष्ठवैजात्ये साङ्कर्याच्च, तथाहि–काशीमरणनाश्ये गोवधजन्यदुःखे गोवधजन्यतावच्छेदिका जातिर्वर्तते न तु तत्त्वज्ञाननाश्यतावच्छेदिका जातिः, तत्त्वज्ञाननाश्यब्रह्मवधजन्यदुःखे सा जातिर्वर्तते न तु गोवधजन्या जातिः, एकत्र तत्त्वज्ञाननाश्ये गोवधजन्यदुःखे द्वयोः समावेश इति सिद्धं काशीमरणस्य तत्त्वज्ञानद्वारा मोक्षहेतुत्वम् ।

अथ काशीमरणत्वेन हेतुत्वमनुगतं तदा स्यात्, यदि मरणत्वं नाम किञ्चिदनुगतं स्यात्, तदेव न सम्भवति तथाहि—न तावत् शरीरात्मसंयोगनाशत्वं तत्, जीवति चैत्रे तथाविधकसंयोगनाशे चैत्रो मृत इति व्यवहारापत्तेः । न च विजातीयशरीरात्मसंयोगनाशत्वं तत् इति वाच्यम् । यतः क्रियाजन्यतावच्छेदकजातीनां क्रियाव्यक्तिभेदेन भेदात् तदाश्रयस्यान्तरापि नाशसम्भवात् उक्तप्रतीत्यापत्तिर्दुर्वारा । अत एव प्राणात्मसंयोगनाशत्वं तत् इत्यपि निरस्तम् । सत्यपि जीवने मृत इति व्यवहारापत्तेः । नापि प्राणशरीरसंयोगनाशत्वं तदिति, प्राणशरीरसंयोगनाशस्य काश्यवच्छिन्नस्य केन सम्बन्धेन कारणत्वम् ? स्वाश्रयसंयोगसम्बन्धेन तु न सम्भवति, तेन सम्बन्धेन काश्यां मृत इव

तत्र जीवत्यात्मनि तस्य सत्त्वात् तत्रापि तत्त्वज्ञानापत्तेः, एकस्य क्रियया सकलविभौ संयोगसम्भवात् तस्य मरणपदार्थत्वे तादृशसंयोगस्यान्तरापि नाशसम्भवेन जीवति पुरुषेऽपि मृत इति व्यवहारापत्तेश्च । न च स्वसामानाधिकरण्यस्वसमानकालीनत्वोभयसम्बन्धेन प्राणशरीरसंयोगप्रागभाववदन्यतादृशसंयोगध्वंसो मरणम्, अन्तरा तादृशध्वंसासम्भवेन तादृशप्रतीत्यापत्तेरसम्भवादिति वाच्यम् । तथाविधध्वंसस्य स्वाश्रयसंयोगसम्बन्धेन हेतुत्वे पूर्वोक्तदोषापत्तितादवस्थ्यात् इति चेत् ।

नैवम्, स्वाश्रयशरीरावच्छिन्नादृष्टवत्त्वसम्बन्धेन तादृशध्वंसस्य कारणत्वे न कोऽपि दोषः, काश्यधिकरणकस्य तथाविधध्वंसस्य स्वाश्रयशरीरावच्छिन्नादृष्टवत्त्वसम्बन्धेन तदात्मन्येव सत्त्वात् आत्मान्तरे चासत्त्वात् न तत्र तत्त्वज्ञानापत्तिः, जीवनकालीनस्य प्राणशरीरसंयोगनाशस्य तादृशोभयसम्बन्धेन प्राणशरीरसंयोगप्रागभाववदन्यत्वविरहादेवान्तरा न मरणव्यवहारः ॥

इति महामहोपाध्यायश्रीहरिरामभट्टाचार्यकृतः काशीमरण कारणतावाद (३३) वीचिः समाप्तः ॥

अथ महामहोपाध्याय श्रीगदाधरभट्टाचार्यविरचितः

अपेक्षाबुद्धिकारणतावाद (३४) वीचिः ।

अपेक्षाबुद्धिशून्यकाले द्वित्वाद्यनुपलम्भात् अपेक्षाबुद्धेरेकत्वभिन्नसंख्याहेतुत्वं स्वीक्रियते, तत्र एकत्वान्यसंख्यात्वावच्छिन्नं प्रति अपेक्षाबुद्धित्वेन न हेतुता अपेक्षाबुद्धित्वस्यानुगतस्य दुर्वचत्वात् । तथाहि अपेक्षाबुद्धित्वं न जातिः, चाक्षुषत्वादिना सङ्करात् । नापि नानैकत्वावगाहिज्ञानत्वं तत्, एकत्वनिष्ठनानात्वस्य दुर्वचत्वात् ।

यच्च स्वभिन्नैकत्वविषयकत्वस्वविषयकत्वोभयसम्बन्धेन एकत्ववज्ज्ञानत्वेन हेतुता । विशेषणदलप्रवेशात् एकैकत्वमात्रावगाहिज्ञानान्न द्वित्वापत्तिः । एकैकत्वावगाहिज्ञानस्यापि स्वभिन्नएकत्वविषयकत्वसम्बन्धेन तादृशज्ञानाविषयैकत्ववत्त्वात् तस्मात् द्वित्वाद्यापत्तिवारणाय विशेष्यदलम् । स्वभिन्नत्वञ्च स्वसामानाधिकरण्यस्वनिरूपकत्वोभयसम्बन्धेन प्रतियोगिताविशिष्टान्यस्वभेदवत्त्वम्, अतः स्वस्मिन्नपि व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकस्वभेदसत्त्वेपि नापत्तिः, प्रत्यासत्तिश्च स्वीयैकत्ववृत्तिप्रकारतानिरूपितविशेष्यता कारणस्य, कार्यस्य च समवायः,

अतो न एकद्रव्ये एकत्वावगाहिज्ञानात् अपरत्र द्रव्ये द्वित्वाद्युत्पत्तिप्रसङ्ग इति ।

तदपि न, एवमपि एकत्वद्वयावगाहिज्ञानात् द्वित्वाद्यापत्तेः । एवमतीतपटाद्यंशे विद्यमानघटाद्यंशे च एकत्वप्रकारकज्ञानस्यापि तथात्वात् ततो विद्यमानघटे द्वित्वाद्यापत्तिः । न च कारणतावच्छेदकविशिष्टस्य पूर्वसत्ताया एव प्रकृते फलोपधानप्रयोजकतया तादृशज्ञानविषयीभूतैकत्वस्य तदानीमसत्त्वेन निरुक्तसम्बन्धेन एकत्वविशिष्टं ज्ञानं न तत्रास्तीति नापत्तिरिति वाच्यम । एवमपि पटनाशकालीनात् तत्प्राक्क्षणोत्पन्नाद्वा नानैकत्वावगाहिनो विद्यमानघटैकत्वावगाहिज्ञानात् घटे द्वित्वापत्तेर्वारयितुमशक्यत्वात् तदानीं उभयोरेकत्वयोरेव सत्त्वात् निरुक्तसम्बन्धेन एकत्वविशिष्टज्ञानस्य तदानीं सत्त्वात् । न च तदानीं तद्घटमात्रसमवेतं द्वित्वमापादयितुं न शक्यतेऽप्रसिद्धेः किन्तु घटपटोभयसमवेतं द्वित्वं, तत्र च पटस्यापि हेतुतया तदानीं च तस्यासत्त्वात् कथमापत्तिरिति वाच्यम् । तद्घटमात्रसमवेतद्वित्वत्वावच्छिन्नं घटपटोभयसमवेतद्वित्वत्वावच्छिन्नं वा नापाद्यते, किन्तु सामान्यसामग्रीबलात् द्वित्वत्वावच्छिन्नं, तादृशधर्मावच्छिन्नस्य च तत्पटादिरूपविशेषसामग्रीं विनापि सामान्यसामग्र्या जननात् तदसत्त्वस्याकिञ्चित्करत्वात् । न च तद्घटादिवृत्त्येकत्वान्यसंख्यात्वावच्छिन्नं प्रति तद्घटादिविशेष्यकैकत्वप्रकारकज्ञानत्वेन विशिष्यैव हेतुता, तत्तद्घटादिसमवेतत्वावच्छिन्नं प्रति तत्तद्घटत्वादिनापि हेतुता, एकमात्रविशेष्यकैकत्वप्रकारकज्ञानकाले न तत्र द्वित्वाद्यापत्तिः, घटान्तरविशेष्यकतादृशज्ञानानाञ्च तद्घटादिसहकृतानां तत्र विशेषसामग्रीत्वाभ्युपगमात् इति वाच्यम । तथासति अयमेक इत्याकारकज्ञानद्वयादपि द्वित्वोत्पादप्रसङ्गात् , नानैकत्वादिज्ञानस्यैवापेक्षाबुद्धितया तत्र तथाविधज्ञानाभावेन द्वित्वानुत्पादात् इष्टापत्तेरसम्भवात् ।

अत्रोच्यते–तद्घटपटोभयसमवेतद्वित्वत्वावच्छिन्नं प्रति तद्घटपटोभयविशेष्यकैकत्वप्रकारकज्ञानत्वेन हेतुता, एवं त्रित्वादिस्थलेऽपि । एवं तद्घटसमवेतद्वित्वत्वावच्छिन्नं प्रति तद्घटत्वादिनापि हेतुता, अतो न तद्घटनाशकालीनतद्घटपटोभयविशेष्यकज्ञानात् पटे द्वित्वापत्तिः तद्घटपटविशेष्यकापेक्षाबुद्ध्या द्वित्वजनने तद्घटपटयोः विशेषसामग्रीत्वात् । एवमनयोरेकत्वमित्याकारकात् एकत्वविशेष्यकज्ञानादपि द्वित्वाद्युत्पादात् तादृशज्ञानस्यापि हेतुता कल्पनीया, द्वित्वत्वादिव्याप्यजातिविशेषाणां जन्यतावच्छेदकत्वाभ्युपगमात् न व्यभिचारः । न चोभयविधा-

पेक्षाबुद्ध्योः तद्घटपटोभयविषयित्वावच्छिन्नैकत्वविषयिताशालिज्ञानत्वेनैव हेतुता आस्तां किं पृथक् हेतुतया इति वाच्यम् । तथा सति एकत्वनिरूपिताधेयत्वसम्बन्धेन एकत्वप्रकारकात् एकत्वे इमावित्याकारकज्ञानादपि द्वित्वापत्तेः । एकत्वाधिकरणत्वावगाहिज्ञानत्वेनानुगमे घटपटोभयनिरूपिताधेयत्वावगाहित्वेनापि अनुगमापत्तौ कार्यकारणभावद्वयापत्तेः, अवच्छेदकगौरवञ्च, एतदपेक्षया पृथक्कारणत्वमेव लघु ।

एवमपेक्षाबुद्धिनाशोत्तरं द्वित्वादेरनुपलम्भात् अपेक्षाबुद्धिनाशस्य द्वित्वादिनाशकताभ्युपेयते, तस्य नाशत्वेनैव हेतुत्वं, स्वप्रतियोग्यपेक्षाबुद्धिजन्यत्वं कारणतावच्छेदकसंसर्गः, प्रतियोगित्वं च कार्यतावच्छेदकसम्बन्धः । कार्यतावच्छेदकञ्च संख्यानाशत्वम् एकत्वान्यसंख्यानाशत्वं वा, कारणनियमादेवान्यस्मात् नाशवारणसम्भवात् । अत एव अपेक्षाबुद्ध्यादेः त्रिक्षणावस्थायित्वमुपेयते, अन्यथा तृतीयक्षणे तस्य नाशे चतुर्थक्षणे द्वित्वनाशात् द्वे द्रव्ये इति लौकिकद्वित्वत्वविशिष्टबोधो न जायेत, तथाहि—अपेक्षाबुद्धिद्वितीयक्षणे द्वित्वोत्पत्तौ तृतीयक्षणे द्वित्वद्वित्वत्वनिर्विकल्पकं ततश्चतुर्थक्षणे द्वित्वत्वविशिष्टबुद्धौ सत्यां पञ्चमक्षण एव तादृशविशिष्टवैशिष्ट्यबुद्धिर्भविष्यति, सा च न भवितुमर्हति कार्याव्यवहितप्राक्काले द्वित्वरूपविषयाभावात् विषयस्य च लौकिकप्रत्यक्षहेतुत्वात् , अपेक्षाबुद्धेः चतुर्थक्षणे विनाशे च पञ्चमक्षणे द्वित्वस्य नाशे तादृशविशिष्टवैशिष्ट्यबोधः सूपपाद एव ।

वस्तुतस्तु अपेक्षाबुद्धिनाशस्य स्वप्रतियोगिजन्यत्वसम्बन्धेन द्वित्वनाशकता नाभ्युपेयते, किन्तु द्वित्वनाशं प्रति स्वप्रतियोग्यधिकरणसमयप्रागभाववत्त्वसम्बन्धेन नाशत्वेनैव हेतुत्वं स्वीक्रियते, प्रागभाववत्त्वं च कालिकविशेषणतया, एतादृशकारणतावच्छेदकप्रत्यासत्त्या स्वतृतीयक्षणोत्पन्नस्य यस्य कस्यचिन्नाश एव द्वित्वे वर्तते तत एव चतुर्थक्षणे तन्नाशः । एवञ्चापेक्षाबुद्धेः स्वोत्पत्तितृतीयक्षणे विनाशेऽपि न क्षतिः । तथा सत्यपि स्वोत्पत्तिचतुर्थक्षण एव द्वित्वनाशेन द्वे द्रव्ये इत्येतादृशविशिष्टवैशिष्ट्यबुद्ध्यनुपपत्त्यसंभवात् । नच यत्र द्वित्वोत्पत्तिद्वितीयक्षणे आश्रयविनाशात् तृतीयक्षण एव द्वित्वनाशः तत्र व्यभिचारवारणाय स्वाश्रयनाशाजन्यत्वस्य कार्यतावच्छेदकत्वे गौरवम्, अपेक्षाबुद्धिनाशस्य हेतुत्वे च तादृशद्वित्वोत्पादकापेक्षाबुद्धेः तृतीयक्षण एव नाशाभ्युपगमात् न व्यभिचार इति वाच्यम् । भवन्मते सर्वासामपेक्षाबुद्धीनां ज्ञानान्तरादिना तृतीयक्षणे विनाशवारणाय तत्र सामग्र्यन्तरकल्पने गौरवात्(१) । न च

(१) द्वित्वनिर्विकल्पकसामग्र्याः अपेक्षाबुद्धिनाशप्रतिबन्धकत्वोपगमादेव न

स्वोत्तरोत्पन्नस्वसमानाधिकरणगुणस्यैव योग्यविभुविशेषगुणनाशकतया ऽपेक्षाबुद्धिद्वितीयक्षणे च तदधिकरणआत्मनि विशेषगुणानुत्पादात् नापेक्षाबुद्धेः तृतीयक्षणे नाशापत्तिरिति वाच्यम् । अपेक्षाबुद्धिद्वि ीयक्षणे हि संस्कारादिविशेषगुणोत्पादे बाधकाभावः, प्रतिबन्धकादिकल्पने गौरवात् । न च विभुसमवेतविशेषगुणनाशत्वावच्छिन्नं प्रति स्वोत्तरोत्पन्नविभुविशेषगुणत्वेनानुगतरूपेण हेतुत्वं न सम्भवति स्वत्वाननुगमात्, किन्तु तत्तद्गुणनाशत्वावच्छिन्नं प्रति तत्तद्गुणत्वेन हेतुत्वम्, तथाच अपेक्षाबुद्धिनाशस्थले तृतीयक्षणोत्पन्नानामेव गुणानां हेतुत्वं कल्पनीयमिति न तृतीयक्षणेतन्नाशापत्तिरिति वाच्यम् । नाशत्वावच्छिन्नं प्रति स्वप्रतियोगिमत्त्वस्वपूर्वत्वैतदुभयसम्बन्धेन नाशत्वेनैवानुगतेन हेतुतायाः सम्भवात्, एतदनुरोधेन तत्तद्व्यक्तित्वेन हेतुत्वे च महागौरवात् ।

अत्राहुर्मीमांसकाः—यावद्द्रव्ये नित्यमेकमेव द्वित्वादिकमभ्युपेयते । न च यावद्द्रव्ये एकद्वित्वाऽभ्युपगमे यावन्तो द्वावित्यादिप्रत्ययानां प्रमात्वप्रसङ्गः, प्रतिद्विकं प्रतित्रिकं द्वित्वत्रित्वादीनां भेदे तु व्यासज्यवृत्तिधर्मावच्छिन्नविशेष्यताकबुद्धौ विशेष्यतावच्छेदकावच्छेदेनैव विधेयभानस्य व्युत्पत्तिसिद्धत्वात् यावत्त्वावच्छेदेन कस्यापि द्वित्वस्यासत्वात् तादृशप्रत्ययानां न प्रमात्वापत्तिरिति वाच्यम् । द्वित्वादीनामभेदेऽपि प्रतिद्विकं प्रतित्रिकं तत्पर्याप्तीनां भेदात् यावत्त्वाद्यवच्छिन्नोद्देश्यताकद्वित्वादिबुद्धौ यावत्त्वादिव्यापकीभूतपर्याप्तेरेव सम्बन्धतया द्वित्वादिपर्याप्तेश्च यावत्त्वाऽव्यापकतया तादृशप्रत्ययानां भ्रमत्वोपपत्तिः । न च एतन्मते द्वित्वादीनां नित्यानेकसमवेतत्वरूपजातिलक्षणाक्रान्ततया जातिव्यवहारापत्तिरिति वाच्यम् । असमवायित्वे सति तादृशसमवेतत्वस्याऽऽकृतिव्यंग्यत्वस्य वा जातिव्यवहारनियामकत्वाभ्युपगमात् । यदि च संयोगादिवत् द्वित्वादीनामपि उत्पत्तिविनाशप्रत्ययोऽनुभवसिद्धः, तदा प्रतिद्विकं प्रतित्रिकं भिन्नभिन्नमेवाश्रयोत्पत्तिद्वितीयक्षणोत्पत्तिकमाश्रयनाशनाश्यमेकैकमेव द्वित्वत्रित्वादिकमस्तु, तेषामपेक्षाबुद्धिजन्यत्वे तन्नाशनाश्यत्वे वा मानाभावः, अपेक्षाबुद्धिसमसंख्यकनानाद्वित्वादिकल्पनेऽपेक्षाबुद्धितन्नाशयोः तदुत्पत्तिविनाशहेतुत्वे महागौरवात् । न च मीमांसकमते आश्रयोत्पत्तिद्वितीयक्षणे द्वित्वाद्युत्पत्तिस्वीकारे अपेक्षाबुद्धिशून्यकालेऽपि तत्साक्षात्कारप्रसङ्ग इति वाच्यम् । अपेक्षाबुद्धेः द्वित्वादिसाक्षात्कारहेतुत्वोपग-

---

तृतीयक्षणे नाशसम्भव इति नव्याः । अत एव संख्याग्रन्थे द्वित्वनिर्विकल्पकसामग्र्याः प्रतिबन्धकत्वस्यावश्यकत्वे लाघवात् द्वित्वप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वस्य स्वीकारात् द्वित्वप्रत्यक्षसन्तानोऽपि सूपपन्न इति दीधितिकार एव विवेचयिष्यति ।

मात्, अस्मन्मतेऽपि एकपुरुषीयापेक्षाबुद्धिजन्यद्वित्वादीनामपेक्षाबुद्धि-शून्ये पुरुषान्तरे प्रत्यक्षवारणाय विषयतया तत्पुरुषीयैकत्वान्यसंख्याप्रत्य-क्षत्वावच्छिन्नं प्रति तत्पुरुषीयापेक्षाबुद्धिजन्यसंख्यात्वेन समवायेन तत्पु-रुषीयापेक्षाबुद्धिजन्यसंख्यायाः तादात्म्यसम्बन्धेन वा हेतुत्वकल्पनाया आवश्यकत्वात्।

एतेनापेक्षाबुद्धेः व्यञ्जकत्वे चक्षुःसंयुक्तसमवायरूपसामान्यसामग्री-बलात् व्यञ्जकशून्यदशायामपि द्रव्यसमवेतचाक्षुषापत्तिः, अपेक्षाबुद्धि-रूपविशेषसामग्रीं विनापि सामान्यसामग्रीबलात् द्रव्यसमवेतचाक्षुषोद-येन तादृशविशेषसामग्रीविरहस्याकिञ्चित्करत्वात् अपेक्षाबुद्धेः उत्पाद-कत्वमेव सम्यक् इति निरस्तम्।

उत्पादकत्वमतेऽपि एकपुरुषीयापेक्षाबुद्धिजन्यद्वित्वादीनां सामा-न्यसामग्रीबलात् प्रत्यक्षप्रसङ्गात्।

अथास्मन्मते तत्पुरुषीयैकत्वान्यसंख्याप्रत्यक्षं प्रति तत्पुरुषीयापेक्षा-बुद्धिजन्यसंख्यात्वेन हेतुत्वं न स्वीक्रियते, तादृशविशेषसामग्रीं विनापि रूपादिषु सामान्यधर्मावच्छिन्नस्य सामान्यसामग्र्या उत्पादेन द्वित्वा-दावपि तदापत्तिः स्यात्, किन्तु तत्पुरुषीयप्रत्यक्षं प्रति तदन्यपुरुषीया-पेक्षाबुद्धिजन्यसंख्यात्वेन प्रतिबन्धकता कल्प्यते, तादृशप्रतिबन्धकाभा-वरूपविशेषसामग्रीविनिर्मोकेण तत्पुरुषीयचक्षुःसंयुक्तसमवायादिघटित-सामान्यसामग्र्या कुत्रापि फलाजननात् नापत्तिरिति चेत्।

न, मन्मतेऽपि द्वित्वादिप्रत्यक्षेऽपेक्षाबुद्धेरिव रूपादिप्रत्यक्षे तादात्म्ये-न रूपादीनामपि विशेषसामग्रीत्वात् तावदन्यतमसहकारेण च सामान्य-सामग्र्या फलजननात् नापत्तिः। न च रूपादिप्रत्यक्षे रूपादीनां विशेष-सामग्रीत्वकल्पनमधिकमिति वाच्यम्। तदकल्पने व्यञ्जकशून्यकालेऽपि सामान्यसामग्रीबलात् ब्राह्मणत्वप्रत्यक्षापत्तिवारणाय तत्कल्पनाया आ-वश्यकत्वात्।

अथ सामान्यतः एकत्वान्यसंख्याप्रत्यक्षं प्रति अपेक्षाबुद्धित्वेन हेतु-ता न सम्भवति, अपेक्षाबुद्धित्वस्यानुगतस्य दुर्वचत्वात् घटादिविषय-कापेक्षाबुद्धिदशायां पटादिवृत्तिद्वित्वादीनां प्रत्यक्षत्वप्रसङ्गाच्च। न च एकत्वान्यसंख्यावृत्तिविषयतासम्बन्धेन प्रत्यक्षं प्रति स्वीयकत्वप्रकारता-निरूपितविशेष्यताश्रयवृत्तित्वसम्बन्धेनापेक्षाबुद्धेर्हेतुता अतो नकविशेष्य-कापेक्षाबुद्धितो ऽन्यविशेष्यकसंख्याप्रत्यक्षप्रसङ्ग इति वाच्यम्। एवमपि घटपटविशेष्यकापेक्षाबुद्धिदशायां घटकुड्यादिवृत्तिद्वित्वादिप्रत्यक्षस्य वारयितुमशक्यत्वात्। न च स्वीयैकत्वप्रकारतानिरूपितविशेष्यत्वाभाव-

वृत्तित्वसम्बन्धेनापेक्षाबुद्धेः हेतुत्वान्नैष दोषः घटपटविषयकापेक्षाबुद्धेः तादृशसम्बन्धेन घटकुड्यादिवृत्तिद्वित्वादावसत्त्वात्, एवञ्चापेक्षाबुद्धेः ज्ञानत्वेनैव हेतुता, एकत्वाविषयकज्ञानस्य एकैकत्वमात्रावगाहिज्ञानस्य च एकत्वप्रकारतानिरूपितविशेष्यत्वाभाववति द्वित्वादीनां वृत्तेः तादृशज्ञातूना द्वित्वादिप्रत्यक्षापत्त्यसम्भवादिति वाच्यम्। एकत्वप्रकारतानिरूपितघटनिष्ठविशेष्यत्वाभाववति पटे पटनिष्ठतादृशविशेष्यत्वाभाववति घटे तदुभयवृत्तिद्वित्वस्य सत्त्वात् तादृशद्वित्वे स्वीयैकत्वप्रकारतानिरूपितविशेष्यत्वाभाववृत्तित्वसम्बन्धेनापेक्षाबुद्धेरसत्त्वात्, एकत्वप्रकारतानिरूपितविशेष्यतात्वावच्छिन्नप्रतियोगिताकाभावस्य ज्ञानान्तरीयतादृशविशेष्यत्ववति कुड्यादावसत्त्वेन निवेशयितुमशक्यत्वात् तज्ज्ञानीयतादृशविशेष्यतात्वावच्छिन्नप्रतियोगिताकाभावस्य चाननुगमात्, तस्मात् एतद्घटपटोभयवृत्तिद्वित्वविषयकप्रत्यक्षत्वावच्छिन्नं प्रति एतद्घटपटोभयविशेष्यकैकत्वप्रकारकज्ञानत्वेन हेतुता वाच्या, तत्र द्वित्वविषयकत्वप्रत्यक्षत्वयोः विशेष्यविशेषणभावे विनिगमनाविरहेणानन्तविषयभेदेन भिन्नानां कार्यकारणभावानां द्वैगुण्यम्, मन्मते च तादृशद्वित्वत्वादिकमेव कार्यतावच्छेदकम्, प्रत्यक्षस्थले च तत्पुरुषीयैकत्वान्यसंख्याप्रत्यक्षत्वावच्छिन्नं प्रति तत्पुरुषीयतादृशज्ञानजन्यसंख्यात्वेन हेतुत्वं, तत्पुरुषीयप्रत्यक्षं प्रति तदन्यपुरुषीयापेक्षाबुद्धिजन्यद्वित्वत्वेनैव वा प्रतिबन्धकत्वं तद्भेदः कारणमिति घटपटादिकं द्वित्वादिकमपि विशिष्यानिवेश्य पुरुषभेदेन कार्यकारणभावकल्पनम्। तदपेक्षया भवन्मते कार्यकारणभावकल्पनाधिक्यं स्फुटमेव इति चेत्।

न, लौकिकविषयतासम्बन्धेन तादृशद्वित्वस्यैव कार्यतावच्छेदकत्वाभ्युपगमेन उक्तविनिगमनाविरहासंभवात्। न च लौकिकविषयतासम्बन्धेन द्वित्वस्य ईश्वरज्ञानसाधारण्यात् जन्यप्रत्यक्षत्वस्य निवेश आवश्यक इति अस्यैव विशेष्यविशेषणभावे विनिगमनाविरह इति वाच्यम्। नित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वे क्षतिविरहात् जन्यप्रत्यक्षत्वस्यानिवेशात्। अपेक्षाबुद्धिव्यञ्जकतावादिनां मीमांसकानां मते ईश्वराभावेन तन्मते नित्यसाधारण्याभावाच्च। एवं भवन्मते एतद्घटपटोभयसमवेतत्वद्वित्वत्वयोः विशेष्यविशेषणभावे विनिगमनाविरहः, मन्मते एतद्घटपटयोः नानाद्वित्वाभावेन एतद्द्वित्वविषयकप्रत्यक्षत्वस्य तादृशविजातीयप्रत्यक्षत्वस्य वा जन्यतावच्छेदकत्वेनैवोपपत्तौ एतद्घटपटसमवेतत्वस्यानिवेशात् द्वित्वत्वेन सह तस्य निनिगमनाविरहाप्रसक्तेः। एवं तत्पुरुषीयैकत्वान्यसंख्याप्रत्यक्षं प्रति तत्पुरुषीयज्ञानजन्यसंख्या-

त्वेन हेतुत्वेऽपि पुरुषान्तरीयापेक्षाबुद्धिजन्यद्वित्वादेः पुरुषान्तरेण ग्रहण-प्रसङ्गो दुर्वारः, पुरुषान्तरीयापेक्षाबुद्धेः अपेक्षाबुद्धित्वेन पुरुषान्तरीया-पेक्षाबुद्धिजन्यद्वित्वादिजनकत्वात्, फलोपहितजन्यतायाः प्रत्यासत्तित्वे-चाननुगमात् इति संक्षेपः ॥

इतिमहामहोपाध्यायश्रीगदाधरभट्टाचार्यविरचितः अपेक्षा-
बुद्धिकारणतावाद (३४) वीचिः समाप्तः ।

अथ स्वत्वजनकतावाद(३५)वीचिः ॥

ननु पित्रादिमरणोत्तरं सर्वेष्वेव पित्रादिधनेषु सर्वभागिनां स्व-त्वमुत्पद्यते, किं वा गुटिकापातादिना वस्तुगत्या यस्य योंऽशो निर्णीतो भविष्यति तत्रैवांशे स्वत्वमुत्पद्यते इति चेत् ।

अत्र सामुदायिकस्वत्ववादिनो मैथिलाः । पित्रादेर्मरणोत्तरं सर्वेष्वेव पित्रादिधनेषु सर्वभागिनिरूपितं स्वत्वं प्रथमतो जायते, पश्चाद्विभागेन तत्र सामुदायिकस्वत्वं विनाश्य स्वीयांशमात्रवृत्तिस्वत्वान्तराण्युत्पद्य-न्ते । विभागो नाम पित्रादिधनेषु भागिनामिदमेव मम तत्तस्यैव, तस्य इदं न इत्यादिनिश्चयविशेषः । भागिनामित्युपादानं मध्यस्थेन निर्णीते-पि भागिभिरनिर्णीते दाये विभक्तव्यवहारवारणाय । विशेषपदोपादाना-देव कालान्तरीयतादृशनिश्चये नातिप्रसङ्गः । विशेषत्वञ्च मानसत्वव्या-प्यो जातिविशेषः उपाधिविशेषो वा इत्यन्यदेतत् । स च सामुदा-यिकस्वत्वनाशकतावच्छेदकतया आंशिकस्वत्वान्तरजनकतावच्छेदकतया च सिद्धः । तदवच्छिन्नोत्पत्तिनियामकञ्च तदवच्छिन्नेतरज्ञानसामग्र्य-भावः, स च फलबलकल्प्यः, यत्र कारणं विना नोत्पत्तिः तत्र सामग्री-त्वस्य प्रतिबन्धकतानवच्छेदकत्वेऽन्यत्र साधकाभावात् अनायत्या तत्र तत्कल्पनात् । न च प्रथमं सामुदायिकैकस्वत्वोत्पत्त्यभ्युपगमे सर्वत्र तादृशनिश्चयरूपस्य विभागस्य भ्रमत्वापत्तिरिति वाच्यम् । पितुर्मरणो-त्तरं सामुदायिकैकस्वत्वोत्पादेऽपि पितृमरणपूर्वं तादृशस्वत्वाभावसत्त्वेन पाकरक्तघटे श्याम इति बुद्धिवत् प्रथमं सामुदायिकैकस्वत्वोत्पादेऽपि तादृशनिश्चयात्मकविभागेन पश्चान्नाशात् भाविरक्तघटे रक्त इति बुद्धि-वच्च भ्रमत्वविरहात् । न चैकदासीवृषादिमात्रस्य पैतृकस्वत्वस्थले नानाद्रव्याभावेन तादृशनिश्चयासम्भवात् विभागो न स्यादिति वाच्य-म् । अत्रापि इदानीमेव ममेदं न तु तदानीं, तदानीमेवेदं तस्य नत्वि-

दानमिति निश्चयविशेषस्य विभागत्वात् । तत्र कचित् स्वत्वस्य कचिच्च स्वत्वनिष्ठतत्तत्पुरुषनिरूपितत्वस्य कालिकाव्याप्यवृत्तित्वाभ्युपगमात् । अत एव बृहस्पतिः—

एकां स्त्रीं कारयेत्कर्म यथा स्वांशेन वै गृहे ।
उत्सृज्य कूपवाप्यस्तदनुसारेण गृह्यते ॥

उत्सृज्येत्यस्य यत्रैकमेव कूपवाप्यादिकं पैतृकं तत्रेत्यादिः । न च तदीय-स्वत्वं प्रति तदितरनिरूपितस्वत्वस्य कार्यसहभावेन प्रतिबन्धकतया कथं सर्वेषु पित्रादिधनेषु सर्वभागिनामेकं स्वत्वमुत्पद्यते इति वाच्यम् । तदीय-स्वत्वं प्रति तदनिरूपितत्वस्वत्वेनैव कार्यसहभावेन प्रतिबन्धकतया सर्व-भागिनिरूपितैकस्वत्वोत्पत्तौ विरोधाभावात् । अन्यथा यत्तवधनं, तन्मम-धनं यन्मम तत्तव इति नियमार्थकसंसृष्टिस्थले सर्वेषां सर्वधनगताविलक्षणै-कस्वत्वोत्पादस्य एकदासदासीगवादिमात्रस्य पैतृकत्वस्थले एकस्यामेव दासादिव्यक्तौ नानाभ्रातृनिरूपितैकस्वत्वस्य गौडमैथिलोभयसम्मतस्या-नुपपत्तेः । क्रयादिस्थले उत्पन्नपुनरुत्पादे क्रमिकस्वत्वोत्पादयोर्वार-णाय सामान्यतः स्वत्वत्वावच्छिन्नं प्रति स्वत्वत्वेनैव पूर्ववर्त्तितामात्रेण प्रतिबन्धकत्वस्यावश्यकतया तदीयस्वत्वं प्रति तदितरनिरूपितस्वत्वत्वेन वा कार्यसहभावेन प्रतिबन्धकत्वे मानाभावाच्च । तादृशप्रतिबध्यप्रतिब-न्धकभावानभ्युपगमे पितृमरणोत्तरं पुत्रविक्रीयमाणे धने क्रेतुः स्वत्वो-त्पत्तिसंभवात् पुत्रस्यापि स्वत्वोत्पादप्रसङ्गादेर्मरणादिजन्यपित्रादिस्व-त्वनाशस्य उत्पत्तिसम्बन्धेन हेतुताभ्युपगमादेव निराससम्भवात् । स च पितृमरणादेः स्वत्वप्रयोजकताविचारे प्रपञ्चितः । न च पित्रादिम-रणोत्तरं सर्वेष्वेव पित्रादिधनेषु सर्वभागिनिरूपितैकस्वत्वाभ्युपगमेन तन्मरणवत् स्वत्वनाशत्वेन हेतुहेतुमद्भावात् विभागात्पूर्वमेकस्य मरणे सर्वेषामेव स्वत्वनाशात् जीवद्व्यक्तीनां पुनः स्वत्वोत्पादः कथं स्यात् उत्पादकाभावात् मरणादिजन्यपित्रादिस्वत्वनाशस्योत्पत्तिसम्बन्धेनैव पुत्रादिस्वत्वोत्पादकत्वादिति वाच्यम् । यत्र विनाशात्पूर्वमेकस्य मरणं तत्र तस्य सर्वधनगतपृथक्स्वत्वाभ्युपगमात् तदन्येषामेव सर्वेषां सर्व-धनगतमेकं स्वत्वम्, एवं विभागात्पूर्वमेकेन विभागोत्तरं योंऽशः केवलं मम भविष्यति सोंऽशो न मम किन्त्वस्येत्यादिसङ्कल्पविशेषात्मकदानवि-क्रयादि क्रियते तत्रापि तस्य सर्वधनगतं पृथगेव स्वत्वम्, तेन तादृशैक-भागिकृतदानादितोऽन्येषां स्वत्वनाशः । एवं संसृष्टधने या एका एव मुद्रा पैतृकी तत्र बोध्यम्, तत्राप्यसत्येव बाधके सर्वधनगतैकस्वत्ववत् एकस्या-मेव मुद्रायां सर्वभ्रातृनिरूपितैकस्वत्वस्य गौडमैथिलादिसकलसम्मत-

त्वात् । न च तथापि पित्रादिमरणोत्तरं सर्वेष्वेव धनेषु सर्वभागिनां स्वत्वाभ्युपगमे विभागात्पूर्वमेकेन विक्रये दाने वा कृते इतरस्वत्वस्थले क्रेतृप्रतिग्रहीत्रोः कथं स्वत्वोत्पत्तिः, कथं वा विभागात्पूर्वं पुत्रवतोमरणे तत्स्वत्वस्थले पुत्रस्य स्वत्वोत्पत्तिः स्वत्ववति स्वत्वान्तरानुत्पत्त्या भागान्तरस्वत्वावरुद्धत्वेन स्वत्वान्तरोत्पादासम्भवात् । एकस्य विक्रयदानमरणादित एव सर्वेषां स्वत्वनाशाभ्युपगमे पुनर्भागान्तराणां स्वत्वोत्पादानुपपत्तेः उत्पादकाभावात् गौरवप्रसङ्गाच्चेति वाच्यम् । तत्र जीवतां भागिनां स्वत्वस्य विनष्टस्यापि कालिकाव्याप्यवृत्तित्वाभ्युपगमेन क्रयादिस्वत्वोत्पत्त्यव्यवहितक्षणावच्छेदेन धनेषु तद्विरहादव्यवहितपूर्वक्षणावच्छेदेन कार्योत्पत्त्यधिकरणे प्रतिबन्धकस्वत्वस्यैव कार्यानुत्पादप्रयोजकत्वात् । अन्यथा संसृष्टधनेषु सर्वभागिनां स्वत्वस्य यत्र एका एव मुद्रा पैतृकी तत्र एकस्यामेव मुद्रायां सर्वभ्रातृणां स्वत्वस्य च गौडमैथिलादिसकलसम्मतत्वेन तत्रापि विभागात् पूर्वमेकस्य विक्रयादिना क्रेत्रादेः स्वत्वोत्पादासम्भवस्य दुःसमाधेयत्वापत्तेः, तत्रापि संसर्गान्तराणां पुत्रान्तराणाञ्च स्वत्वस्याविनष्टस्यापि कालिकाव्याप्यवृत्तित्वस्यैव गमकत्वात् ।

एतेन एकदासदासीवृषादिमात्रस्य पैतृकस्वत्वस्थले एकस्यामेव दासादिव्यक्तौ समयभेदेन नानाभ्रातृनिरूपितस्वत्वस्य गौडमैथिलादिसकलसम्मतत्वात् स्वत्वावच्छेदकीभूते समये एकेन विक्रये दानादौ वा कृते क्रेतृप्रतिग्रहीत्रादेः स्वत्वोत्पत्तिर्न स्यात्, स्वत्ववति स्वत्वान्तरानुत्पत्त्या भ्रात्रन्तरपुत्रस्वत्वोत्पादस्य वक्तुमशक्यत्वात्, स्वत्वावरुद्धत्वेन क्रेत्रादिस्वत्वोत्पादासम्भवादित्यपि निरस्तम् ।

भ्रात्रन्तरस्वत्वस्यापि कालिकाव्याप्यवृत्तितया तदानीं तत्रासत्त्वात् स्वत्वानवच्छेदकसमये विक्रयादौ कृते क्रेत्रादिस्वत्वानुत्पादस्येष्टत्वात् प्रतिबन्धकस्वत्वान्तरसत्त्वात् । नचैवं स्वत्वानवच्छेदकसमये पुत्रवतैकेन मृतेऽपि मरणजन्यस्वत्वनाशात् तत्पुत्रस्वत्वोत्पत्तिर्न स्यात् प्रतिबन्धकान्तरस्य च सत्त्वात् मरणादिजन्यपित्रादिस्वत्वनाशस्य उत्पत्तिसम्बन्धेनैव पुत्रादिस्वत्वहेतुतया कालान्तरे तत्पुत्रस्वत्वोत्पादस्य वक्तुमशक्यत्वादिति वाच्यम् । स्वत्वानवच्छेदकसमयोत्पत्तिकमरणेन तदानीं तत्र स्वत्वं न नाश्यते किन्तु भ्रात्रन्तरस्वत्वसमये उत्तीर्ण एव तत्स्वत्वं विनाश्य तत्पुत्रस्वत्वमुत्पद्यते तत्स्वत्वनाशं प्रति तन्मरणस्य स्वप्रतियोग्याश्रयनिरूपितस्वत्वसम्बन्धेन हेतुत्वात् तन्निरूपितत्वस्याव्याप्यवृत्तित्वाभ्युपगमेन तत्स्वत्वे तदानीं तन्निरूपितत्वात् । अस्तु वा

एकस्य दानविक्रयमरणादिजन्यस्वत्वनाशोत्पत्तिक्षणे भ्रात्रन्तराणां स्वमविनष्टमपि, तत्त्वेनावृत्तित्वस्य कालिकाव्याप्यवृत्तित्वात्, एवञ्च स्वत्वानवच्छेदकसमये एकस्य विक्रयादिना क्रेत्रादिस्वत्वोत्पत्तौ बाधकाभाव इत्याहुः ।

दायभागकृतस्तु मरणादिजन्यपित्रादिस्वत्वत्वनाशात् तद्धनेषु न सर्वभागिनां स्वत्वोत्पत्तिः, किन्तु गुटिकापातादिना वस्तुगत्या यो यस्यांशो निर्णीतो भविष्यति तत्रैवांशे तस्य स्वत्वमुत्पद्यते सामुदायिकस्वत्वान्तरतत्प्रागभावतद्ध्वंसतत्कार्यकारणभावानां निरुक्तविभागे तन्नाशकत्वस्य स्वत्वान्तरोत्पादकत्वस्य च कल्पने गौरवात् । न च तावतापि यत्र पितृमरणोत्तरं पितृधनानां भ्रातृविभागश्रवणं कृतं किन्तु विभागं विनैव सर्वेषां भ्रातॄणां मरणं सर्वैकवाक्यतया दानविक्रयादिकं वा पितृद्रव्यादीनां कृतं तत्रांशिकानां स्वत्वतद्ध्वंसतत्प्रागभावादीनां कल्पने गौरवमिति वाच्यम् । तावता तत्र सर्वेषां पितृमरणात्सामुदायिकैकस्वत्वाभ्युपगमेऽपि विभागोपगतधनस्थले पितृमरणात् सर्वेषां सामुदायिकैकस्वत्वाभ्युपगमात् तत्र विभागोत्तरमांशिकस्वत्वानामावश्यकत्वेन तत्कल्पने गौरवापाताभावाच्च । न च विभागोपगतधनस्थलेऽपि पितृमरणादिजन्यपितृस्वत्वनाशस्य कारणस्य सर्वधनेषु अविशिष्टतया सर्वत्र सर्वेषां स्वत्वोत्पादापत्तिर्दुर्वारैव इति वाच्यम् । तादृशस्थले तदीयस्वत्वं प्रति तदीयस्वत्वाभावविशिष्टस्य तदीयेतरस्वत्वस्य कार्यसहवर्त्तितया प्रतिबन्धकत्वेनान्यांशेऽन्यस्य स्वत्वानुत्पत्तेः संसृष्टस्य धनादौ यत्र विभागात्पूर्वमेकस्य दायिनो मरणं तत्र प्रागुक्तयुक्त्या मृतस्य पृथक्स्वत्वाभ्युपगमेन व्यभिचारापत्त्या तद्वारणाय विशिष्टान्तं स्वत्वविशेषणम् । सामुदायिकस्वत्वान्तरतत्प्रागभावतद्ध्वंसतत्कार्यकारणभावानां विभागस्य तन्नाशकत्वस्वत्वान्तरोत्पादकत्वयोश्च कल्पनामपेक्ष्य कतिपयतादृशप्रतिबध्यप्रतिबन्धकभावकल्पनाया एव लघुत्वात् । पूर्वमन्यांशे ममेदमिति प्रत्ययप्रतिबन्ध एव विभागप्रयोजनम् । न च तादृशप्रतिबध्यप्रतिबन्धकभावाभ्युपगमे पतिस्वत्वसत्त्वे तद्धने विवाहानन्तरं पत्न्याः स्वत्वोत्पत्तिः न स्यात् "दम्पत्योर्मध्यमं धनम्" इति वचनेन पत्युपार्जितधने पतिस्वत्वसत्त्वेऽपि विवाहानन्तरं पत्न्याः स्वत्वावबोधनादिति वाच्यम् । विवाहेन पत्युः स्वत्वनाशे सति युगपदेव दम्पत्योः स्वत्वान्तरोत्पादात्, अन्यथा क्रयणादिस्थले उत्पन्नस्वत्वपुनरुत्पादकमिकस्वत्वद्वयोत्पादयोर्वारणाय लाघवात्सामान्यतः स्वत्वत्वावच्छिन्नं प्रति स्वत्वत्वेन प्रतिबन्धकत्वस्य प्रागुक्तमैथिलमतेऽप्यावश्यकतया तन्म-

तेऽप्यप्रतीकारात् वस्तुतः पत्युर्विद्यमानतादशायां तदुपार्जितधने भोजनादिना यथेष्टविनियोगे पत्न्याः प्रत्यवायाभावमात्रपरतया प्रामाणिकैर्व्याख्यातत्वाच्च । अन्यथा "पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा" इत्यादिना याज्ञवल्क्यमहाशयैरुक्तदाधिकारिगणने पत्नीगणनस्यासङ्गतत्वापत्तेः पतिमरणपूर्वमपि तद्धनेऽधिकारसत्त्वात्, अत एव जीवति पितरि तद्धने पुत्राणां नाधिकारः स्वत्ववति स्वत्वान्तरानुत्पत्त्या तदीयस्वत्वं प्रति तदीयस्वत्वाभावविशिष्टस्य तदीयेतरस्वत्वस्य प्रतिबन्धकतया च पितृस्वत्वसत्त्वे पुत्रस्वत्वोत्पत्तेरसम्भवात् तत्पुत्रोत्पत्तेः पूर्वोत्पन्नपितृस्वत्वनाशकल्पने युगपत्पितृपुत्रयोः स्वत्वान्तरकल्पने च गौरवात् मानाभावाच्च । "उत्पत्त्यैवार्थस्वामित्वानुभव" इति गौतमवचनस्य "क्वचिज्जन्मैवार्जनं यथा पित्र्ये धने" इति प्रामाणिकाभिधानस्य च प्रागुक्तरीत्या पितृमरणोत्तरजातपैतृकदासदासीगवादिजन्यापत्यपरम्परारूपार्थविषयत्वात् । तादृशार्थोत्पत्तेरेव उक्तक्रमेण स्वत्वोत्पादकत्वात्, अन्यथा

"ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम् ।
भजेरन् पैतृकं रिक्थमनी(१)शास्ते हि जीवतोः" ॥

इति मनुवचनविरोधात्, "पितर्यूर्ध्वं जातपुत्रा विभजेयुः पितुर्धनम्"। इति देवलवचनविरोधाच्च । न चानीशापदमस्वतन्त्रपरमिति वाच्यम् । बाधकं विना लक्षणाया अन्याय्यत्वात् "जन्मनैव पुत्रस्य पितृधने स्वत्वमुत्पद्यते" इति मिताक्षरालिखनस्य युक्तिविरुद्धत्वेनानुपादेयत्वात् । न च तदीयस्वत्वं प्रति तदीयेतरस्वत्वत्वेन प्रतिबन्धकत्वे कारणान्तरविलोपापत्तिः, क्रयणादेः स्वत्वजनकताबोधकवचनानां नियतपूर्ववर्त्तितापरत्वेनाप्युपपत्तेरिति वाच्यम् । निधावुपादानात् पूर्वं स्वत्वसामान्योत्पादवारणाय क्रयणादेरपि स्वत्वहेतुत्वस्यावश्यकत्वात् निधेरौपादानिकतया उपादानात् पूर्वं तत्र कस्यापि स्वत्वविरहात् । निधित्वमौपादानिकेतरस्वत्वसामग्र्यभावविशिष्टस्वत्वनाशकत्वे सति स्वत्वसामान्याभाववत्त्वम् । परगणनादेरुपादानात् पूर्वमावश्यकपुष्पादेश्च वारणाय सत्यन्तम् । क्रयादिजन्यस्वत्वनाशोत्पत्तिपक्षे निधित्ववारणाय विशिष्टान्तं स्वत्वनाशविशेषणम् । औपादानिकस्वत्वोत्पत्त्यव्यवहितप्राक्क्षणे निधित्वसम्पादनायौपादानिकेतरत्वं प्रथमस्वत्वविशेषणम् । औपादानिकत्वञ्च स्वत्वनिष्ठजातिविशेषः । पूर्वस्वत्वनाशमादाय स्वत्ववद्दशायामपि निधित्ववारणाय विशेष्यदलम् । न च पितृमरणानन्तरमेकदेश एव स्वत्वस्योत्पत्तौ विभागानन्तरमिव

---

(१) 'अनीशाः' अस्वामिनः ।

विभागात् पूर्वमपि अन्यदीयांशेन ममेदमिति प्रत्ययापत्तिः, गुटिकापातादेरेव तादृशनिश्चयजनकत्वे पितृजीवनदशायामपि तादृशप्रत्ययानुपपत्तिरिति वाच्यम्। इष्टत्वात्, अन्यथा सामुदायिकस्वत्वाभ्युपगमेऽपि घटवत्यपि कपाले ध्वंसप्रागभावकालावच्छिन्नघटात्यन्ताभावमादाय घटो नास्तीतिप्रत्ययवत् विभागोत्तरकाले पितृमरणकालावच्छिन्नतदत्यन्ताभावमादाय तादृशप्रत्ययापत्तेर्दुर्वारत्वात्। नचैवं स्वत्वस्य आंशिकत्वे पितुर्मरणानन्तरमविभक्तयोस्तदीयांशयोरेकांशमादाय भ्रात्रा धनार्जने पश्चात्तदंशस्यार्जकेनैव भ्रात्रा गुटिकापातादिना लाभेऽर्जकस्य द्वावंशौ भ्रात्रन्तरस्य चैकांश इति सर्वसम्मतं विरुद्ध्येत, तदा भ्रात्रन्तरस्य स्वत्वाभावेन तेनार्जितधनेऽपि तस्य स्वत्वाभावादिति वाच्यम्। भ्रात्रन्तरस्य स्वत्वोत्पत्तौ बाधकाभावात्। कारणान्तरजन्यपितृस्वत्वनाशेऽपि जातस्वत्वविशिष्टद्रव्यकरणकार्जनत्वेनैव धनघटितसामानाधिकरण्यप्रत्यासत्त्या पुत्रस्वत्वविशेषं प्रति हेतुत्वात्। नचैवं विभागोत्तरमपि तदंशेनार्जितधने भ्रात्रन्तरस्य स्वत्वोत्पादापत्तिरिति वाच्यम्। तदीयस्वत्वं प्रति तदीयस्वत्वाभावविशिष्टस्य तदीयेतरस्वत्वस्य कार्यसहवर्त्तितया प्रतिबन्धकत्वेनार्जकमात्रप्रतियोगिकस्वत्वस्यैव भ्रात्रन्तरस्वत्वोत्पत्तौ तत्र प्रतिबन्धकत्वात्। एतेन स्वत्वस्यांशिकत्वे पितृमरणोत्तरमविभक्तयोस्तदीयांशयोरेकांशमादाय तत्र धनार्जने पश्चात्तदंशस्यार्जकेतरेणैव भ्रात्रा गुटिकापातादिना लाभे तेनार्जितधनस्यार्जकेन सममर्जकेतरस्य समभागापत्तिः अर्जकस्य क्रमेण तदितरस्य स्वीयांशेनार्जनादित्यपि परास्तम्। तत्रापि अर्जकस्य द्वयोरंशयोः 'अर्जको ह्यंशमर्हति' इति वचनसिद्धत्वात्। अर्जकस्य पितृस्वत्वनाशोपजातस्वत्वविशिष्टद्रव्याभ्यामर्जकेतरस्यापि पितृस्वत्वनाशोपजातस्वत्वविशिष्टद्रव्यमात्रेणार्जनादंशद्वयोरेवार्जकस्योचितत्वाच्च। नच विभागात् पूर्वमपि स्वत्वस्यांशिकत्वे विभागात् पूर्वमेकेन भ्रात्रा पितृद्रव्यैकदेशेन विहितकर्मानुष्ठाने सर्वेषां भ्रातृणां फलभागित्वं न स्यात्, एकदेशे सर्वेषां स्वत्वविरहेऽपि तत्र सर्वेषां फलभागित्वस्य वाचनिकत्वात्। तदाह नारदः—

> भ्रातॄणामविभक्तानामेको धर्मः प्रवर्त्तते।
> विभागे सति वै धर्मो भवेत्तेषां पृथक् पृथक्॥ इति।

न च तथापि विभागात् पूर्वमपि स्वत्वस्यांशिकत्वे गुटिकापातादिना वस्तुगत्या यस्य योंऽशो निर्णीतो भविष्यति विभागात् पूर्वं तेन तदंशस्य भ्रात्रन्तराय दानेऽपि दानप्रतिग्रहयोः सिद्धत्वापत्तिः विभागा-

त्पूर्वमपि तद्धने प्रतिग्रहीतृस्वत्वाभावादिति वाच्यम्। तद्धने प्रतिग्रहीतृस्वत्वाभावेऽपि विभागात् पूर्वं तद्धने प्रतिग्रहासिद्धेर्वाचनिकत्वात्। तदाह नारदः—

साक्षित्वं प्रातिभाव्यञ्च दानं प्रतिग्रहमेव च।
विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परम्॥ इति।

प्रतिभूः लग्नक इत्याहुः। तदसत्—

स्थावरस्य समस्तस्य गोत्रसाधारणस्य च।
नैकः कुर्यात् क्रयं दानं परस्परमतं विना॥ इति

व्यासवचने समस्तेतिविशेषणात् सर्वेषां स्वत्वप्रतीतेः।

स्वतन्त्रास्तु पितृमरणोत्तरं तत्स्वत्वनाशरूपस्य कारणस्योत्पत्तिसम्बन्धेन सर्वत्राविशिष्टतया सर्वत्रैव पितृधने सर्वेषां भ्रातॄणां स्वामिभेदेन विभिन्नानि नानास्वत्वानि युगपज्जायन्ते, तदीयस्वत्वं प्रति तदीयस्वत्वाभावविशिष्टस्य तदीयेतरस्वत्वस्य तत्त्वेन कार्यसहवर्त्तितया प्रतिबन्धकत्वकल्पने गौरवात्। तानि च स्वत्वानि न विभागनाश्यानि, किन्तु विभागप्राक्कालावच्छेदेनैव सर्वत्र पितृधने वर्त्तन्ते न तु तदुत्तरकालावच्छेदेन, विभागोत्तरकाले यस्य योंऽशस्तत्रैव तत्स्वत्वस्य वृत्तिः न त्वन्यांशेऽन्यस्वत्वस्य वृत्तिः, यथा न्यायनये नित्योऽपि घटात्यन्ताभावो घटवति भूतले घटापसरणदशायामेव वर्त्तते न तु घटसत्वदशायां, यथा वा मीमांसकनये नित्यापि दाहिका शक्तिर्वह्नौ प्रतिबन्धकासमवधानदशायामेव वर्तते न तु प्रतिबन्धकसमवधानदशायां, यथा वा एकदासदास्यादिमात्रस्य पैतृकस्वत्वस्थले कालभेदेन एकस्यामेव स्वत्वव्यक्तौ तत्पुरुषनिरूपितत्वानिरूपितत्वे। एतेन स्वत्वान्तरतत्प्रागभावध्वंसानां विभागस्य तन्नाशकत्वस्वत्वान्तरोत्पादकत्वयोश्च कल्पनायां गौरवरूपस्य मैथिलमतोक्तदूषणस्य नात्रावकाशः, विभागोत्तरं प्रागुत्पन्नस्वत्वनाशकत्वस्वत्वान्तरोत्पादकत्वयोरनभ्युपगमात्, विभागस्य प्रमात्वञ्च मैथिलमतवदुपादनीयमिति प्राहुः॥

इति स्वत्वजनकतावाद (३४) वीचिः।

अथ स्वत्वजनकतावाद(३५)वीचिः।

स्वत्वं तावत्-स्वत्वमुत्पन्नं स्वत्वं विनष्टं तव स्वं मम स्वं देवस्वं ब्रह्मस्वमित्यादिप्रतीतिसिद्धं पदार्थान्तरमेव। तच्च वृत्तिनियामकविशेषणताविशेषेण स्वर्णादिद्रव्यनिष्ठम् 'सुवर्णे स्वत्वमिति प्रत्ययात्, निरू-

पकताख्यविशेषणताविशेषेण स्वामिनिष्ठम्, अत्रास्य स्वत्वमिति प्रत्ययात्। नचैतस्मिन् पुरुषे एतद्द्रव्यस्वामित्वमेतद्द्रव्यपतित्वमिति प्रतीतिः कथं स्यात्, निरूपकतासम्बन्धस्य वृत्त्यनियामकत्वात्, निरूपकतासम्बन्धस्य प्रकृते वृत्तिनियामकताभ्युपगमे चास्मिन् पुरुषे एतद्द्रव्यस्य स्वत्वमिति प्रत्ययस्य दुर्वारत्वादिति वाच्यम् । नहि निरूपकतासम्बन्धेन स्वत्वमेव स्वामित्वम्, अपितु अयमस्य स्वामी अयमस्य पतिरित्यादिप्रतीतिसिद्धं, तदपि पदार्थान्तरं, तच्च वृत्तितानियामकविशेषणतया स्वामिनिष्ठम् 'अस्मिन् पुरुषे एतद्द्रव्यस्वामित्वमि'ति प्रत्ययात्, निरूपकताख्यविशेषणताविशेषेण च धननिष्ठम्, अत्र पुरुषे एतद्द्रव्यस्य स्वामित्वमिति प्रत्ययात् एतद्द्रव्येऽस्य पुरुषस्य स्वामित्वमित्याद्यप्रत्ययाच्च ।

अथैवं स्वत्वस्वामित्वयोर्भिन्नपदार्थत्वात् चैत्रस्य धनमित्यादौ स्वत्वं स्वामित्वं वा षष्ठ्यर्थं इत्यत्र विनिगमनाविरहः, स्वत्वस्य षष्ठ्यर्थत्वे निरूपितत्वसम्बन्धेन प्रकृत्यर्थविशेष्यतया स्वाश्रयतासम्बन्धेन धनविशेषणतया तदन्वयवत् स्वामित्वस्य षष्ठ्यर्थत्वेऽपि निष्ठतासम्बन्धेन प्रकृत्यर्थविशेष्यतया निरूपकतासम्बन्धेन धनविशेषणतया तदन्वयस्य सुवचत्वात् । न च स्वामित्वस्य षष्ठ्यर्थत्वे चैत्रस्य धनमितिवत् धनस्य चैत्र इत्यपि प्रत्ययः स्यात् चैत्रस्य धननिरूपितस्वामित्वाश्रयत्वादिति वाच्यम् । स्वत्वस्य षष्ठ्यर्थत्वेऽपि तादृशप्रत्ययस्य दुर्वारत्वात् धननिष्ठस्वत्वनिरूपकत्वाच्चैत्रस्य । षष्ठ्यर्थस्वत्वस्य निरूपितत्वसम्बन्धेनैव प्रकृत्यर्थविशेष्यतया आश्रयत्वसम्बन्धेनैव च अनुयोगिविशेषणतयाऽन्वयो न तु सम्बन्धान्तरेणेति व्युत्पत्तिकल्पने स्वामित्वस्य षष्ठ्यर्थत्वेऽपि षष्ठ्यर्थस्वामित्वस्य निष्ठतासम्बन्धेनैव प्रकृत्यर्थस्य विशेष्यतया निरूपकत्वसम्बन्धेनैव चानुयोगिविशेषणतयाऽन्वयो नतु सम्बन्धान्तरेणेति व्युत्पत्तेरपि सुवचत्वादिति चेन्न ।

स्वामित्वस्य षष्ठ्यर्थत्वे चैत्रीयधनेऽपि नेदं चैत्रस्येति व्यवहारापत्तेः स्वामित्वस्य चैत्रवृत्तितया तदभावस्य सुतरां धने सत्त्वात् । न च निरूपकतासम्बन्धेनैव षष्ठ्यर्थस्य स्वामित्वस्याभावो नञा बोध्यते, स च धने न वर्तत इति वाच्यम् । निरूपकतासम्बन्धस्य वृत्त्यनियामकतयाऽभावप्रतियोगितानवच्छेदकत्वात् । न चैवं स्वत्वस्य षष्ठ्यर्थत्वेऽपि धनस्वामिन्यपि नायं धनस्येति व्यवहारापत्तिः, धननिरूपितस्वामित्वस्य पुरुषवृत्तित्वेऽपि धननिष्ठस्य स्वत्वस्य पुरुषावृत्तित्वादिति वाच्यम् । इष्टत्वात्, अन्यथा स्वामित्वस्य षष्ठ्यर्थत्वेऽपि तत्र निष्ठतासम्बन्धेनैव प्रकृत्यर्थान्वयस्य व्युत्पन्नतया तादृशव्यवहारस्य दुर्वारत्वात्, दासदास्यात्मकधननिष्ठस्वामित्वस्य निरूपकतासम्बन्धेनाश्रयतासम्बन्धेन च पुरुषेऽभावात् । न च

तथापि वृत्त्यनियामकसम्बन्धस्याप्यभावप्रतियोगितावच्छेदकत्वनये स्वामित्वस्य षष्ठ्यर्थत्वे न किमपि बाधकमिति वाच्यम्। तन्नये प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यधिकरणत्वस्यैवाभावविरोधितया गगनादिसंयोगिघटादौ संयोगसम्बन्धावच्छिन्नगगनाभाववत् चैत्रनिष्ठस्वामित्वनिरूपकेऽपि धने निरूपकतासम्बन्धावच्छिन्नचैत्रनिष्ठस्वामित्वाभावस्य वृत्तौ बाधकाभावेन तादृशव्यवहारापत्तेर्दुर्वारत्वात्। नचैवं संयोगसम्बन्धावच्छिन्नगगनाद्यभावस्येव विषयतासम्बन्धावच्छिन्नप्रतियोगिताकज्ञानाद्यभावस्यापि केवलान्वयित्वं स्यात्, स्याच्च विषयतासम्बन्धावच्छिन्नप्रतियोगिताकघटाभावादेरपि केवलान्वयित्वं विषयिताविषयितयोरधिकरणत्वानियामकतया तेन सम्बन्धेन ज्ञानाद्यधिकरणत्वस्यैवाप्रसिद्धेरिति वाच्यम्। इष्टत्वात्, प्रतियोग्यधिकरणानिरूपितवृत्तिमदत्यन्ताभावप्रतियोगितानवच्छेदकत्वस्य केवलान्वयित्वघटकतया विषयतासम्बन्धावच्छिन्नज्ञानाद्यभावस्य केवलान्वयित्वेऽपि विषयतासम्बन्धेन ज्ञानादेः केवलान्वयित्वसम्भवात्। यदि च वृत्त्यनियामकसम्बन्धस्याप्यभावप्रतियोगितावच्छेदकत्वेन तत्सम्बन्धेन प्रतियोगिसम्बन्धित्वमेवाभावविरोधि, अत एव प्रलयकाले एव परमाणूत्पत्तिकाले एवावयविनि संयोगसम्बन्धावच्छिन्नगगनाद्यभावो नान्यदा, अत एव च विषयतासम्बन्धावच्छिन्नज्ञानाद्यभावोऽलीक इति मतमाद्रियेत, तदास्तु विनिगमकाभावात् स्वत्वस्वामित्वोभयं षष्ठ्यर्थः किन्त्वेकच्छिन्नं तात्पर्यग्रहस्य नियामकत्वादेव चत्रस्य धनमित्यादौ स्वत्वस्वामित्वयोरवगम इति सम्प्रदायः।

केचित्तु स्वत्वमेव पदार्थान्तरं न तु स्वामित्वं, किन्तु तन्निरूपकत्वं स्वामित्वम्, निरूपकतासम्बन्धस्य वृत्त्यनियामकत्वेऽपि निरूपकत्वस्य स्वरूपसम्बन्धेन वर्तमानत्वादेवात्र पुरुषेऽस्य द्रव्यस्य स्वामित्वमिति प्रत्ययोपपत्तेः, एवञ्च गौरवादेव स्वामित्वं न षष्ठ्यर्थोऽपि तु स्वत्वमेवेत्याहुः।

तदसत्, विनिगमकाभावात् स्वामित्वमेव पदार्थान्तरं तन्निरूपकमेव स्वत्वमिति वैपरीत्यस्यापि सुवचत्वात्, स्वामित्वनिरूपकत्वस्य स्वत्वरूपत्वे स्वशब्दादेः शक्यतावच्छेदकत्वेन गौरवात्, स्वत्वनिरूपकत्वस्य स्वामित्वरूपत्वेऽपि स्वामिशब्दादेः शक्यतावच्छेदकत्वेन गौरवात्।

नव्यास्तु स्वत्वं स्वामित्वञ्च एकएव पदार्थः, स च विलक्षणविषयतासम्बन्धेन अत्र स्वामित्वं इदं स्वमित्यादिव्यवहारकारकः, न तु स्वत्वस्वामित्वयोर्भेदः तयोर्भेदेऽपि धनपुरुषनिष्ठपरस्परविलक्षणविषयताभ्युपगमात्। एतेन विषयित्वादिकमपि व्याख्यातं, तयोरप्येकपदार्थत्वात्। स च विलक्षणविशेषणतासम्बन्धेन अत्र विषयत्वमयं विषय इत्यादिव्य-

वहारकारकः, विलक्षणविशेषणतया चात्र स्वामित्वम् अयं स्वामी अत्र पतित्वम् अयं पतिरित्यादिव्यवहारकारकः, विलक्षणविषयतया चात्र विषयित्वमिदं विषयीत्यादिव्यवहारकारक इति प्राहुः ।

अत्र स्वत्वं क्रयप्रतिग्रहादिवत्पित्रादीनां मरणपातित्यप्रव्रज्योपेक्षाभ्यो-प्युत्पद्यते, पित्रादिधनेषु पित्रादीनां मरणपातित्यप्रव्रज्योपेक्षाभ्यः स्वत्व-नाशे सत्यव्यवधानेनैव पुत्रादीनां स्वत्वोत्पादस्य वाचनिकत्वात् । उपेक्षा च न ममेदमिति सङ्कल्पविशेषः । अत एव जीवत्पितृकविभज्यमानधने पुत्रस्य न स्वत्वानुपपत्तिः, तत्र पितुरुपेक्षाया एव पितुः स्वत्वनाश-कत्वात् ।

अथ पातित्यस्य स्वपूर्ववात्तस्वत्वनाशकत्वे तदनन्तरं प्रायश्चित्तानुष्ठा-नेऽपि पूर्वार्जितधने क्रयणादिकं विनाऽधिकारो न स्यात् स्वत्वोत्पादकाभा-वात् । न च प्रायश्चित्तप्रागभावविरहविशिष्टपातित्यमेव स्वत्वनाशकमिति वाच्यम् । विशेष्यविशेषणभावे विनिगमनाभावेन गुरुतरकार्यकारण-भावद्वयप्रसङ्गात् मानाभावाच्च, असति प्रामाणिकवचने संग्रहकर्तुर्लि-खनस्यानुपादेयत्वात् प्रागभावस्यैवासिद्धत्वाच्च इति चेन्न ।

पातित्योत्तरप्रायश्चित्तानुष्ठानेऽपि पूर्वार्जितधने क्रयणादिकं विनाऽ-धिकाराभावस्येष्टत्वात् । नचैवं पातित्यपूर्वार्जितधनेन प्रायश्चित्तानुष्ठान-मेव कथं स्यात्, तत्र स्वत्वविरहादिति वाच्यम् । अत्र स्वधनेन प्राय-श्चित्तानुष्ठानस्याशास्त्रार्थत्वात्, पातित्योत्तरं भिक्षादिना धनान्तरमर्ज-यित्वैव तेन धनेन प्रायश्चित्तानुष्ठानम् इत्यस्यैव लाघवेन कल्पनात् ।

ननु तथापि पितृमरणादीनां पुत्रादिस्वत्वं प्रति केन रूपेण कार्य-कारणभावः । न च तत्पितृमरणत्वेन तदीयस्वत्वविशेषत्वेन तच्च क्रयादिजन्यतत्पुत्रस्वत्वव्यावृत्तो जातिविशेष इति वाच्यम् । पितृमरणो-त्तरं पितृधन इव तत्कालोत्पन्नस्वत्वनाशविशिष्टाऽन्यदीयधनेऽपि पुत्र-स्वत्वोत्पत्तिप्रसङ्गात् विनिगमकाभावात् वाय्वाकाशादौ निधित्वापन्न-द्रव्ये पितृमरणात् पुत्रस्वत्वोत्पादप्रसङ्गाच्च । न च मरणं स्वप्रतियो-ग्याश्रयनिरूपितस्वत्वसम्बन्धेनैव हेतुरिति वाच्यम् । पुत्रस्वत्वोत्पत्ति-पूर्वं पितृधने पितुः स्वत्वाभावेन व्यभिचारप्रसङ्गात्, स्वत्ववति स्वत्वा-न्तरानुत्पत्त्या मरणेन पितृस्वत्वनाशानन्तरमेव पितृधने पुत्रस्वत्वोत्पा-दसम्भवात् । न च स्वत्वाधिकरणत्वमेव सम्बन्धः स्वत्वनाशेऽपि स्वत्वा-धिकरणत्वसत्त्वाच्च न व्यभिचार इति वाच्यम् । पितृमरणात्पूर्वं निधि-त्वापन्ने पितृविक्रीतादिद्रव्ये पितृमरणोत्तरं पुत्रस्वत्वोत्पत्तिप्रसङ्गात् स्वत्वनाशेऽपि स्वत्वाधिकरणत्वसत्त्वात् । एतेन तन्मरणादिजन्यतदीय-

पुत्रस्वत्वविशेषं प्रति तदीयद्रव्यत्वेनापि समवायिकारणतया तन्मरणान-न्तरं तदीयद्रव्ये तत्पुत्रस्वत्वविशेषोत्पत्तिरित्यपि परास्तम्। द्रव्यस्य तदीय-त्वं यदा कदाचित् तत्स्वत्वाश्रयत्वं तत्स्वत्वविशिष्टत्वं वा? नाद्यः, पितृ-मरणात् पूर्वं प्रतिनिधित्वापन्ने पितृविक्रीतद्रव्येऽपि तत्सत्त्वेन पितृमरणो-त्तरं तत्रापि पुत्रस्वत्वोत्पत्तिप्रसङ्गात्। नान्त्यः, कारणतावच्छेदकपूर्व सत्त्वस्य कार्योत्पत्त्यप्रयोजकत्वात् स्वत्ववति स्वत्वान्तरानुत्पत्त्या पुत्र-स्वत्वोत्पत्तिपूर्वं पितृधने स्वत्वाभावेन व्यभिचारप्रसङ्गाच्च इति चेत्।

अत्र प्राञ्चः—मरणपातित्यादेः स्वजन्यस्वत्वनाशोत्पत्तिसम्बन्धेन धननिष्ठतया पुत्रस्वत्वविशेषं प्रति तन्मरणत्वेन हेतुत्वम्; परस्परव्या-वृत्तस्वत्वनिष्ठवैलक्षण्यस्य कार्यतावच्छेदकतया न परस्परं व्यभि चारः, पुरुषभेदेन कार्यकारणभावानन्त्यस्यानायत्याभ्युपगमात्, अत एव तन्मरणादीनां तत्पुत्रमृतपितृकतत्पौत्रमृतपितृपितामहकतत्पुत्रपौत्र-स्वत्वविशेषं प्रति जनकत्ववत् तत्पत्न्यादिस्वत्वविशेषं प्रत्यपि जन-कताया वाचनिकतया पुत्रपौत्रप्रपौत्रान्यतमसत्त्वेऽपि पतिमरणोत्तरं पतिधने पत्न्यादेः स्वत्वोत्पादापत्तिः। सामग्रीसत्त्वे कार्योत्पादस्य दुर्वा-रत्वात्, विना कारणविरहं कार्यानुत्पादस्यासम्भवाच्चेति निर-स्तम्। पुरुषभेदेन कार्यकारणभावस्य विभिन्नतया पुत्राद्यन्यतमपुरु-षीयमरणादेरेव पत्न्यादिस्वत्वजनकत्वात् पूर्वपूर्वविरह एवोत्तरेषां धनाधिकारस्य सकलस्मृतिसिद्धत्वात्। न च तथापि यस्य पुरु षस्य पातित्यपूर्वार्जितधने पातित्येन स्वत्वनाशात् पुत्रस्वत्वोत्पत्तिः ततः पुत्रसामान्यनाशः ततः प्रायश्चित्तात् पातित्यनाशः ततो धना-न्तरार्जनं पुनः पातित्यं ततः प्रायश्चित्तान्तरार्जितधने स्वत्वो-त्पत्त्यनुरोधेन पत्नीस्वत्वविशेषं प्रत्यपि तत्पुरुषीयपातित्यस्य प्रयोजक त्वावश्यकत्वात् प्रायश्चित्तपूर्वार्जितधनेऽपि पत्नीस्वत्वप्रस ः, एवं प्रत्र ज्योपेक्षामादायाप्यतिप्रसङ्ग इति वाच्यम्। तादृशपुरुषीयपत्नीस्वत्वं प्रति कार्यसहभावेन तत्पुरुषस्वत्वस्य धननिष्ठतया प्रतिबन्धकत्वाभ्यु-पगमात्, प्रतिबध्यतावच्छेदकञ्च तत्पुत्रनिरूपितस्वत्वत्वं कन्यादिसक लोत्तराधिकारिसाधारणम्, कारणतावच्छेदककोटौ उत्पत्त्यप्रवेशे पुत्रा-दिना विक्रयाद्युत्तरं स्वामिनि शेषनिधित्वापन्ने पितृमरणाद्युत्तरं न स्व-पितृधने पुनः पुत्रस्वत्वोत्पत्तिप्रसङ्गः, मरणादिजन्यपितृस्वत्वनाश-स्य तदानीमपि सत्त्वात्प्रतिबन्धकान्तरविरहाच्चातस्तन्निवेशः, परन्तु यदी-यस्वं निधित्वापन्नं भवति तन्मरणादेः कारणतायामेव सम्बन्धकोटौ उ-त्पत्तिः प्रवेशनीया न तु सर्वत्र, पुरुषभेदेन कार्यकारणभावभेदात्। एतेन—

पितृमरणोत्तरं पुत्रविक्रीतपितृधनके तु: स्वत्वोत्पत्तिसमकालं पुत्रस्यापि पुनः स्वत्वोत्पत्तिप्रसङ्गः मरणजन्यपितृस्वत्वनाशस्य तदानीमपि सत्त्वात्, एवं पुत्रमरणोत्तरं पुत्रसंक्रान्तपितृधने पौत्रादिस्वत्वोत्पत्तिसमकालं मृतपुत्रस्यापि स्वत्वोत्पत्तिप्रसङ्गः मरणजन्यपितृस्वत्वनाशस्य तदानीमपि सत्त्वात्, स्वामिजीवनस्य सर्वत्र हेतुतायाश्चाग्रे निरसनीयत्वात्–इत्यपि निरस्तम्, तत्राप्युत्पत्तेः कारणतावच्छेदकसम्बन्धत्वाभ्युपगमात् ।

ननूत्पत्तेः कारणतावच्छेदकसम्बन्धत्वे पितृमरणोत्तरं पत्न्यादिरहितभ्रातृसंक्रान्तधने भ्रातृमरणोत्तरं भगिन्यास्तत्सुतस्य वा स्वत्वोत्पत्तिप्रसङ्गः, उत्पत्तेः क्षणिकतया पितृस्वत्वनाशोत्पत्तेस्तदानीमभावात् । न च तद्भगिन्यादेस्तादृशस्वत्वविशेषे स्वजन्यस्वत्वनाशोत्पत्तिसम्बन्धेन भ्रातृमरणमेव हेतुर्न तादृशसम्बन्धेन पितृमरणमिति वाच्यम् । तथासति भ्रातृमरणोत्तरं भ्रातुः संक्रान्तपैतृकधनवत् भ्रातुः स्वोपार्जितधनेऽपि जातेः स्वत्वोत्पत्तिसमकालं भगिन्यादेस्तादृशस्वत्वविशेषोत्पादकतापत्तेः । न च भगिन्यादेस्तादृशस्वत्वविशेषे पितृमरणस्य केवलस्वजन्यस्वत्वनाशसम्बन्धेन भ्रातृमरणस्य च स्वजन्यस्वत्वनाशोत्पत्तिसम्बन्धेन दण्डचक्रवत् धननिष्ठतया हेतुत्वमिति वाच्यम् । भ्रातुर्भ्रात्रन्तरात् क्रीतधनेऽपि भ्रातृमरणोत्तरं जातिवत् भगिन्यादेस्तादृशस्वत्वविशेषोत्पादस्य दुर्वारत्वादिति चेन्न ।

भगिन्यादेस्तादृशस्वत्वविशेषे भ्रातृमरणस्यव स्वजन्यस्वत्वविशेषनाशोत्पत्तिसम्बन्धेन हेतुत्वात् । भ्रातृस्वत्वनिष्ठविशेषः पितृमरणादिजन्यतावच्छेदकजातिरूपः, तेन भ्रातुः स्वोपार्जितधनव्युदासः । नच तथापि उत्पत्तेः कारणतावच्छेदकसम्बन्धत्वे यत्र ऋतुमपेक्ष्यैव पिता मृतः तत्रापि पितृमरणाधीनस्वत्वनाशाच्चिरविलम्बजातस्य पुत्रस्य स्वत्वोत्पादो न स्यादिति वाच्यम् । इष्टत्वात्, किन्तु भाविपुत्रोत्पत्त्यैव विद्यमानपुत्रस्वत्वं विनाश्य युगपत्सर्वेषां स्वत्वं जन्यते इत्यभ्युपगमात्, तदाह मिताक्षरायां गौतमः—

"उत्पत्त्यैवार्थस्वामित्वन्न भवेत्" इति । यस्मिन् गर्भस्थे पिता मृतः तदुत्पत्तिरेव तस्य पितृधने स्वत्वहेतुरिति तदर्थः ।

वस्तुतः वक्ष्यमाणरीत्या स्वामिनस्तज्जीवनस्य वा सर्वत्र स्वत्वहेतुत्वे मानाभावेन तत्र पितृमरणात् स्वत्वनाशाव्यवहितोत्तरमेव विद्यमानपुत्रवदजातपुत्रस्यापि स्वत्वमुत्पद्यते इति न काचिदनुपपत्तिः। गौतमसूत्रविरोधः जीवनस्वत्वहेतुतानिराकरणावसर एव निरस्तः । नचैवं रूपेण कार्यकारणभावे पितुर्मरणपातित्याद्युत्तरं तद्धने पतितसंन्यस्तपुत्रा-

णामपि स्वत्वोत्पादापत्तिरिति वाच्यम्। निरूपकतासम्बन्धेन मरणादिज-न्यस्वत्वविशेषोत्पत्तिं प्रति स्वामिनिष्ठ पातित्याद्यभावस्यापि हेतुत्वात्। पातित्यं चाधर्मविशेषः, तेन यवनादिपुत्रस्य पितृमरणोत्तरं तद्धने न स्व-त्वानुपपत्तिः, न वा पितुः पातित्योत्तरं जातपुत्रस्य पितृमरणे तद्धने स्वत्वानुपपत्तिः। न चैवं पितुः पातित्यपूर्वार्जितधनेऽपि पातित्यपूर्वजात-पुत्रवत् तदुत्तरजातपुत्रस्यापि पितृमरणोत्तरं स्वत्वापत्तिरिति वाच्यम्। पितुः पातित्योत्तरार्जितधने पूर्वजातपुत्रवत्पातित्यपूर्वार्जितधनेऽपि पाति-त्योत्तरजातपुत्रस्यापि स्वत्वोत्पत्तेरिष्टत्वात्। नचैवं "पिण्डं दद्यात् धनं हरेत्"इति नियमभङ्गः इति वाच्यम्। मरणादिसमनन्तरोत्पन्नपुत्रस्य पिण्डदातृत्वाभावेन तादृशनियमस्य व्यभिचारोऽनर्थतया धनघटितसा-मानाधिकरण्यस्यैव प्रत्यासत्तितया(१) तन्मरणानन्तरं तत्पुत्रनिरूपि-तस्वत्वं निरूपकतासम्बन्धेन तत्पुत्र एव जायते, नतु तद्भिन्न इत्यत्र नियामकाभावः निरूपकतासम्बन्धस्यापि प्रकृते पातित्याभावकार्य-तावच्छेदकतया कारणनियम्यत्वात्। निरूपकता सम्बन्धेन तत्पुत्र-निरूपितस्वत्वोत्पत्तिं प्रति अव्यवहितपूर्वकालावच्छेदेन तादात्म्यसम्ब-न्धेन तत्पुत्रत्वेनापि हेतुत्वाभ्युपगमे पितृमरणोत्तरजातपुत्रस्य पितृधने-स्वत्वमुत्पद्यते इति प्रागुक्तविरोधापत्तेः वर्तमानकालस्यातीतानागतव-स्तुनः तादात्म्यादिसम्बन्धेन वृत्तावनवच्छेदकत्वादिति चेन्न।

निरूपकतासम्बन्धेन तत्पुत्रनिरूपितस्वत्वोत्पत्तिं प्रति विशेष्यतास-म्बन्धेन तत्पुत्रत्वप्रकारकप्रमाया हेतुत्वात्सर्वत्रैवान्ततो भगवतो वा तत् पुत्रत्वप्रमासत्वेन व्यभिचाराभावादित्याहुः।

तदसत्, मरणपातित्यादिभेदेन बहुतरकार्यकारणभावापत्तेः। एतेन तन्मरणत्वेन तत्पुत्रस्वत्वविशेषत्वेन कार्यकारणभावः। स्वप्रतियोग्याश्रय-निरूपितस्वत्वश्च कारणतावच्छेदकसम्बन्धः, तेन तन्मरणोत्तरं तदीयधन एव तत्पुत्रस्वत्वमुपजायते न तु धनान्तरे। यद्वा कालिकसामाना-धिकरण्यमेव प्रत्यासत्तिः धनघटितसामानाधिकरण्यप्रत्यासत्त्या दण्डच-क्रवत् स्वत्वस्यापि पृथक् हेतुतया च धनान्तरनिरासः। पितृस्वत्वनाश-पुत्रस्वत्वयोर्युगपदुत्पादाभ्युपगमे न व्यभिचारः नचोत्पन्नस्वत्वस्य पुनरु-त्पाद-क्रयादिजन्यक्रमिकस्वत्वोत्पादयोर्वारणाय स्वत्वावच्छिन्नं प्रति स्व-त्वेन पूर्ववर्तितया प्रतिबन्धकत्वस्य आवश्यकत्वात् कथं पितृस्वत्वना-शोत्पत्तिसमये पुत्रस्वत्वोत्पत्तिरिति वाच्यम्। तन्निरूपितस्वात्वावच्छि-

(१) अत्र पाठः त्रुटितः प्रतिभाति।

न्नं प्रति तन्निरूपितस्वत्वत्वेनैव प्रतिबन्धकतया सामान्यतस्तादृशप्रतिबध्यप्रतिबन्धकभावविरहात्। न च पातित्यप्रव्रज्ययोः स्वाश्रयनिरूपितस्वत्वसम्बन्धेन तादृशस्वत्वसहकारेण वा पुत्रस्वत्वविशेषोत्पादकत्वे पातित्याद्युत्तरार्जितधने पितुः स्वत्वेऽपि पुत्रस्वत्वापत्तिः, एवं पितुरुपेक्षायाः स्वाश्रयनिरूपितस्वत्वसम्बन्धेन तादृशस्वत्वसहकारेण वा पुत्रस्वत्वोत्पादकत्वात् यत्र धने पितुरुपेक्षा तद्धनवदनपेक्षिततदीयधनेऽपि पुत्रस्वत्वापत्तिरिति वाच्यम्। पातित्यादिस्थले प्राचीनोक्तरीतेरेवानुसर्त्तव्यत्वादिति पण्डितम्मन्यमतमपास्तम्। मरणपातित्यादिभेदेन कार्यकारणभावचतुष्टयापत्तेः, निरूपकपुरुषभेदेन स्वत्वं प्रति स्वत्वस्यानन्तप्रतिबध्यप्रतिबन्धकभावापत्तेश्च।

नव्यास्तु पित्रादीनां मरणादिर्न पुत्रादिस्वत्वहेतुः, अपि तु तज्जन्यस्वत्वनाश एवोत्पत्तिसम्बन्धेन पुत्रनिष्ठतया तद्धेतुः। तदाह बौधायनः— "पितुः स्वत्वापगमे सत्स्वङ्गजेषु तद्गामी ह्यर्थो भवति"। अपगमो विनाशः मरणादिनेत्यादि· अङ्गजेषु तद्गामी तेषां स्वत्वाश्रयः, तथाच मरणपातित्यादिजन्यसकलस्वत्वनाशसाधारणदानविक्रयाद्यजन्यस्वत्वनाशत्वेनैव तत्पुत्रस्वत्वविशेषं प्रति विशेषणताविशेषावच्छिन्नोत्पत्तिसम्बन्धेन धननिष्ठतया हेतुत्वम्, विशेषणत्वञ्च क्रयप्रतिग्रहादिजन्यस्वत्वव्यावृत्तो निखिलपितृमरणपातित्याद्यधीनस्वत्वसाधारणो जातिविशेषः। सम्बन्धकोटावुत्पत्तिप्रवेशप्रयोजनञ्च पूर्ववत्।

वस्तुतस्तु तत्स्वत्वनाशत्वेनैव पुत्रनिरूपितस्वत्वविशेषत्वावच्छिन्नं प्रति विशेषणताविशेषावच्छिन्नोत्पत्तिसम्बन्धेन जनकत्वं, नतु दानविक्रयाद्यजन्यत्वमपि तत्र निवेशनीयम्। नचैवं दानविक्रयादिजन्यतत्स्वत्वनाशात् तदीयपुत्रस्वत्वविशेषोत्पत्तिप्रसङ्ग इति वाच्यम्। सामान्यतस्तादृशस्वत्वविशेषत्वावच्छिन्नं प्रति तादृशस्वत्वविशेषातिरिक्तस्वत्वस्य कार्यसहभावेन प्रतिबन्धकत्वात्, सा प्रतिपुरुषंविभिन्ना, कार्यकारणभावेषु दानविक्रयाद्यजन्यत्वप्रवेशमपेक्ष्य सर्वसाधारणातिरिक्तप्रतिबध्यप्रतिबन्धकभावकल्पनाया लघुत्वात्। नचैवं पितुः स्वत्वनाशस्य हेतुत्वाभ्युपगमो व्यर्थः तादृशप्रतिबध्यप्रतिबन्धकभावमात्रस्यैव सम्यक्त्वात् इति वाच्यम्। पितृमरणोत्तरं पितृधन इव निधित्वापन्नधनेऽपि पुत्रस्वत्वापत्तिवारणाय तद्धेतुत्वस्यावश्यकत्वात्, सम्बन्धकोटावुत्पत्तिप्रवेशादेव पितृमरणात् पूर्वं निधित्वापन्ने पितृदत्तविक्रीतद्रव्यस्य पितृस्वत्वनाशप्रतिबन्धकस्वत्वान्तरविरहयोः सत्त्वेऽपि पितृमरणोत्तरं स्वपुत्रस्वत्वोत्पत्तिः। अस्तु

वा विशेषणताविशेषावच्छिन्नोत्पत्तिसम्बन्धेन तत्र स्वत्वनाशत्वेनैव जनकत्वम् । नाशस्य स्वत्ववत्त्वञ्च दानविक्रयादिनाश्यस्वत्वव्यावृत्तप्रतियोगितानिरूपकत्वसम्बन्धेन विवक्षितम्, अतो न दानविक्रयादिजन्यतत्स्वत्वनाशात् तत्र पुत्रस्वत्वविशेषोत्पत्तिः । सम्बन्धाननुगमस्यादोषतया तत्र प्रतियोगिताव्यक्तीनामननुगमेऽपि न क्षतिः । एवञ्चातिरिक्तप्रतिबध्यप्रतिबन्धकभावकल्पनेऽपि नानुपपत्तिः ।

एतेन पितामहादिमरणात् पौत्रादिस्वत्वोत्पादोऽपि व्याख्यातः । तदीयपुत्रस्वत्वविशेषवत् तदीयपौत्रस्वत्वविशेषं प्रत्यपि मरणादिजन्यतत्स्वत्वनाशस्योक्तरीत्या हेतुत्वात् ।

अथैवं पितामहादिमरणे तदीयधनेषु मृतपितृकस्वत्वोत्पत्तिसमकालं जीवत्पितृकपौत्रस्यापि स्वत्वोत्पत्तिप्रसङ्गः, तदीयपौत्रत्वस्याविशेषात् ।

यद्यपि जन्यतावच्छेदकभेदेन जन्यत्वस्य विभिन्नतया तदीयसकलपौत्रसाधारणस्य तदीयपौत्रत्वस्य एकस्याभावात् पितामहपौत्रव्यक्तीः प्रातिस्विकरूपेणोपादाय तत्तद्व्यक्तिनिरूपितस्वत्वविशेषं प्रति तत्तद्व्यक्तिस्वत्वनाशत्वेनैव हेतुतया जीवत्पितृकपौत्रव्यक्तिनिरूपितस्वत्वविशेषं प्रति तादृशपितामहव्यक्तिस्वत्वनाशस्याहेतुत्वात् न तत्स्वत्वनाशात् तत्र स्वत्वोत्पादप्रसङ्गः । यदि च तत्पौत्रत्वस्य तदीयसकलपौत्रसाधारणस्यैकस्याभावेऽपि सम्बन्धमर्यादया तस्य घटकतया सामान्यत एव तत्र स्वत्वनाशस्य तदीयसकलपौत्रसाधारणैककार्यकारणभावः सम्बन्धाननुगमस्यादोषत्वादिति विभाव्यते, तदा पितामहमरणोत्तरजीवत्पितृकपौत्रव्यक्तिनिष्ठपौत्रत्वव्यक्तीनां सम्बन्धाघटकतयैव पितामहमरणे जीवत्पितृकपौत्रव्यक्तेः स्वत्वोत्पादवारणसम्भवः, सम्बन्धाननुगमस्यादोषतायास्त्वयैव स्वहस्तितत्वात् ।

तथापि यस्य पुंसः पातित्यपूर्वार्जितधने पातित्येन स्वत्वनाशात् पुत्रमृतपैतृकपौत्रयोः स्वत्वोत्पत्तिः ततश्च पुत्रमरणं ततश्च प्रायश्चित्तात्पातित्यनाशः ततो धनान्तरार्जनं ततः पुनः पातित्यं ततः प्रायश्चित्तोत्तरार्जितधने प्रथमपातित्यपूर्वंमृतपितृकपौत्रतदुत्तरपितृकपौत्रयोर्द्वयोरेव स्वत्वोत्पत्तिः, तस्य पुंसः प्रथमपातित्यपूर्वार्जितधने तत्पूर्वंमृतपितृकपौत्रस्वत्वोत्पत्तिसमकालं तदुत्तरमृतपितृकपौत्रव्यक्तेरपि स्वत्वापत्तिर्दुर्वारा, प्रायश्चित्तोत्तरार्जितधने स्वत्वोत्पत्त्यनुरोधेन तद्व्यक्तिस्वत्वविशेषं प्रत्यपि तदीयस्वत्वनाशस्य हेतुताया आवश्यकत्वात्, एवं प्रव्रज्यापेक्षामादायातिप्रसङ्गो दुर्वार इति चेत् ।

मैवम्, पुत्रस्वत्वं प्रति पितृस्वत्वस्योत्पत्तिसम्बन्धेन समवाय-

सम्बन्धेन वा कार्यसहवर्त्तितया प्रतिबन्धकत्वाभ्युपगमादिति न काप्यनुपपत्तिरिति समासः ॥

स्वत्वविशेषं प्रति पितृमरणादिवत्स्वत्वसामान्यं प्रति जीवनमपेक्षितमिति प्राञ्चः ।

तदसत्, मानाभावात् अजीवद्दशायां क्रयप्रतिग्रहादिरूपस्वीकारासम्भवादेव तज्जन्यस्वत्वोत्पादासम्भवात्, अत एव स्वत्वमपेक्ष्यैव यत्र पिता मृतः तत्र पितृमरणानन्तरमेव पितृधने विद्यमानपुत्रवत् तदानीमजातपुत्रस्यापि युगपत्स्वत्वोत्पादः । न च भाविपुत्रोत्पत्त्यनन्तरमेव भाविपुत्रस्वत्वोत्पत्तिः न तु विद्यमानपुत्रस्वत्वोत्पत्तिसमकालमिति वाच्यम् । प्रागुक्तयुक्त्या मरणादिजन्यपित्रादिस्वत्वनाशस्योत्पत्तिसम्बन्धेनैव धननिष्ठतया पुत्रादिस्वत्वहेतुत्वेन भाविपुत्रोत्पत्त्यनन्तरं ततो भाविपुत्रस्वत्वोत्पत्तेरसम्भवात् स्वत्ववति स्वत्वान्तरानुत्पत्त्या विद्यमानपुत्रस्वत्वावरुद्धत्वेन भाविपुत्रोत्पत्त्यनन्तरं भाविपुत्रस्वत्वोत्पत्तेरसम्भवाच्च ।

अथ भाविपुत्रोत्पत्त्या विद्यमानपुत्रस्य स्वत्वं विनाश्य युगपत् सर्वेषां पुनः स्वत्वान्तरं जन्यते, अत एवोत्पत्त्यैवार्थे स्वामित्वानुभव इति मिताक्षरायाम्, गौतमः—"यस्मिन् गर्भस्थे पिता मृतस्तस्यैव तद्विषयत्वात्, अत एव क्वचित् जन्मनैवार्जनं यथा पित्र्यधने इति प्रवदन्ति प्रामाणिकाः, तत्रापि तस्यव विषयत्वादिति चेन्न ।

भाविपुत्रोत्पत्तेः स्वत्वनाशकत्वस्वत्वान्तरजनकत्वयोः कल्पने विद्यमानपुत्राणां स्वत्वान्तरकल्पने च गौरवात्, मिताक्षराधृतगौतमवचनस्य लिखितप्रामाणिकप्रवादस्य च पितृमरणोत्तरजातपैतृकदासदास्यादिजन्यापत्यपरस्पररूपार्थविषयकत्वात् तादृशार्थे तादृशार्थोत्पत्तेरेव स्वत्वप्रयोजकत्वात् । न च प्रकृते निरूपकतासम्बन्धस्य पातित्याद्यभावकार्यतावच्छेदकतया पितृमरणानन्तरं तत्पुत्रनिरूपितस्वत्वविशेषस्य निरूपकतासम्बन्धेन तत्पुत्र इव तत्पुत्रभिन्नेऽपि उत्पत्तिवारणाय निरूपकतासम्बन्धेन तत्पुत्रनिरूपितस्वत्वविशेषोत्पत्तिं प्रति तादात्म्यसम्बन्धेन तत्पुत्रत्वेनापि हेतुत्वावश्यकतया कथमजातपुत्रस्य पितृमरणात्स्वत्वविशेषोत्पत्तिः, वर्त्तमानकालस्य अनागतवस्तूनां तादात्म्यसम्बन्धेन वृत्त्यनवच्छेदकत्वादिति वाच्यम् । तद्वारणाय तत्पुत्रत्वप्रकारकप्रमाया एव विशेष्यतासम्बन्धेन हेतुत्वाभ्युपगमात् । न च तथापि पितृमरणोत्तरजातपुत्रस्यापि स्वत्वोत्पादे सत्स्वङ्गजेषु तद्गामी ह्यर्थो भवतीति बौधायनसूत्रविरोध इति वाच्यम् । तत्र सत्स्वङ्गजेष्वित्यस्य तदानीम-

मृतोऽस्त्वित्यर्थात् लक्षणाया अविशेषात् । न च सत्तु इत्यस्य विद्यमाने-ष्वित्यर्थात् न लक्षणेति वाच्यम् । तत्रापि लाघवात् सत्ताजातेरेव स-च्छब्दप्रवृत्तिनिमित्ततया लक्षणाया दुर्वारत्वात् । अस्तित्वापरनाम्नः सामान्यतः कालसम्बन्धित्वरूपस्य विद्यमानत्वस्य सत्शब्दप्रवृत्तिनि-मित्तत्वमतेऽपि प्रकृतेऽपि स्वपरकालवर्त्तमानत्वरूपविशेषपरतया लक्ष-णाया आवश्यकत्वात्, सामान्यशब्दे सामान्यरूपेण विशेषेण भ्रातृ-सुतपरत्वस्य मरणाभावकालविशिष्टत्वेऽपि सुवचत्वात् । न च तथा-पि जीवनस्य स्वत्वहेतुत्वे यत्र धातुमपेक्ष्यैवानपत्यो मृतस्तत्र भर्तृ-मरणोत्तरं तदीयधने पत्नीस्वत्वोत्पत्तिसमकालमेव चिरविलम्बि भावि पुत्रस्य स्वत्वोत्पत्तिप्रसङ्गः, पत्नीस्वत्वस्य तत्र कार्यसहभावेन प्रति-बन्धकत्वाभ्युपगमे च तदपेक्ष्य जीवनस्य हेतुता उचिता गौडीयेन तत्स्वत्वं प्रति तदनिरूपितस्वत्वस्य कार्यसहभावेन प्रतिबन्धकत्वान-भ्युगमादिति वाच्यम् । तत्र चिरविलम्बिभाविपुत्रस्यैव स्वत्वोत्पत्तेः न तु पत्न्याः,

"पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः ॥
एषामभावे पूर्वेषां धनभागुत्तरोत्तरः ।
स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः ॥"

इति याज्ञवल्क्यवचनस्य "अपुत्रधनं पत्न्यभिगामि तदभावे दुहितृ-गामि तदभावे मातृगामि तदभावे भ्रातृगामि तदभावे भ्रातृपुत्रगामि तदभावे बन्धुगामि तदभावे सकुल्यगामि तदभावे सहाध्यायिगामि तदभावे ब्राह्मणधनवर्जं राजगामीति" विष्णुवचनस्य च यस्य भावि-पुत्रोऽपि न सम्भवति तत्परत्वात् लाघवेन तथैव कल्पनात् । अत एव जीवनस्याहेतुत्वे एतदपि बाधकम् । तदभ्युपगमे यथोक्तस्थले पत्नी-स्वत्वस्य भाविपुत्रोत्पत्तेस्तन्नाशकत्वस्य चाधिकस्य कल्पनापत्तेः । सब्रह्मचारिणः सहाध्यायिनः, एषामिति निर्धारणे षष्ठी, अभावे पूर्वपू-र्वस्याभावे, स्वर्यातस्य मृतस्य, अपुत्रस्य पुत्रपौत्ररहितस्य, अपुत्रधनं पुत्रपौत्रप्रपौत्ररहितधनम् ।

ननु स्वामिजीवनस्य स्वत्वाहेतुत्वे पितृमरणपूर्वमृतस्यापि पुत्रस्य पितृमरणोत्तरं जीवत्पुत्रस्योत्पत्तिसमकालं स्वत्वोत्पत्तिप्रसङ्गः तदीयपु-त्रत्वस्याविशेषात् । न च तदर्थं स्वामिशरीरावच्छेदेनाव्यवहितपूर्वकाल-निष्ठतया निरूपकतासम्बन्धेन स्वत्वोत्पत्तौ निमित्तमस्तु किन्तज्जीवनस्य हेतुत्वेनेति वाच्यम् । तथासति त्वज्ञातपुत्रस्यापि स्वत्वोत्पत्तेरसम्भ-

वात् पितृमरणपूर्वमृतविद्यमानशरीरेऽपि पितृमरणोत्तरं जीवत्पुत्रस्वत्वोत्पत्तिसमकालं स्वत्वापत्तेर्दुर्वारत्वाच्च । न च पितृमरणपूर्वमृतपुत्रव्यक्तीनां स्वत्वं प्रति तदनिरूपितस्वत्वाभावस्य कार्यसहभावेन हेतुतया पितृमरणानन्तरं जीवत्पुत्रस्वत्वोत्पत्तिसमकालं न तत्स्वत्वोत्पत्तिरिति वाच्यम् । तदपेक्ष्य जीवनस्य हेतुताया लघुत्वात् , गौडीयैरपि पितृमरणानन्तरं जीवत्पुत्रव्यक्तीनां स्वत्वं प्रत्येव तदनिरूपितस्वत्वानां कार्यसहभावेन प्रतिबन्धकत्वाभ्युपगमादिति चेन्न ।

जन्यतावच्छेदकभेदेन तदीयसकलपुत्रसाधारणस्य पुत्रत्वस्यैकस्याभावात् पुत्रव्यक्तेः प्रातिस्विकरूपेणोपादाय तत्तद्व्यक्तिस्वत्वविशेषं प्रति तत्तद्व्यक्तिस्वत्वनाशत्वेन हेतुतया पितृमरणपूर्वमृतव्यक्तेः स्वत्वं प्रति तत्पितृव्यक्तिस्वत्वनाशस्य हेतुत्वाकल्पनादेव पितृमरणेन तत्पूर्वमृतपुत्रव्यक्तीनां स्वत्वोत्पत्तेरसम्भवात् । यदि च तत्पुत्रत्वस्य सकलतदीयपुत्रसाधारणस्यैकस्याभावेऽपि सम्बन्धमर्यादया तस्य घटकतया सामान्यत एव तत्स्वत्वनाशस्य तदीयसकलपुत्रस्वत्वसाधारण एक एव कार्यकारणभावः सम्बन्धाननुगमस्यादोषत्वादिति विभाव्यते, तदा पितृरहितपूर्वमृतपुत्रनिष्ठजन्यताव्यक्तीनां सम्बन्धघटकतयैव पितृमरणेन तत्पूर्वमृतपुत्रस्वत्वोत्पत्तेर्वारणसम्भवः सम्बन्धाननुगमस्यादोषतायास्त्वयैव स्वहस्तितत्वात् इति ।

अथ तथापि जीवनस्य स्वत्वहेतुत्वे जीवत्पितृदशायां पित्रपेक्षितकियत्पितृधनमादाय विभक्तस्य पितृमरणपूर्वमृतस्य पुत्रस्य पितृमरणाव्यवहितोत्तरं निधित्वापन्नेऽवस्थितपितृधने निधित्वप्राप्तिद्वितीयक्षणे स्वत्वोत्पत्तिप्रसङ्गः, उत्पत्तिसम्बन्धेन पितृस्वत्वनाशस्य सत्वात्, विभागलब्धधने स्वत्वोत्पत्त्यनुरोधेन तत्पुत्रव्यक्तिस्वत्वविशेषं प्रत्यपि तत्पितृव्यक्तिस्वत्वनाशस्यावश्यं हेतुत्वात् , तत्पुत्रव्यक्तिनिष्ठजन्यताया अपि कार्यतावच्छेदककोटावश्यं निवेश्यत्वाच्च, तदानीं कस्यापि स्वत्वानुत्पादेन स्वत्वान्तरस्यापि प्रतिबन्धकताया वक्तुमशक्यत्वात् । एवं यत्र जीवत्पितृदशायां पित्रपेक्षितकियत्पितृधनमादाय विभक्तस्य भ्रयादेर्मध्ये एकः पितृमरणात् पूर्वमेव मृतस्तत्र पितृमरणाव्यवहितोत्तरमवस्थिते पितृधने जीवत्पुत्रस्वत्वोत्पत्तिसमकालं पूर्वमृतपुत्रस्यापि स्वत्वोत्पत्तिप्रसङ्गो दुर्वारः, विभागलब्धधने स्वत्वोत्पत्त्यनुरोधेन मृतपुत्रस्वत्वव्यक्तिं प्रत्यपि तत्पितृव्यक्तिस्वत्वस्यावश्यं हेतुत्वात् , मृतपुत्रव्यक्तिनिष्ठजन्यताया अपि कार्यतावच्छेदकसम्बन्धघटकत्वस्यावश्यकत्वाच्च, तन्निरूपितस्वत्वं प्रति तदनिरूपितस्वत्वस्य कार्यसहभावेन प्रतिबन्धकत्वाभ्युपगमे तदपेक्ष्य जीवनस्यैव हेतुत्वमुचितं लघुत्वादिति चेन्न ।

तादृशस्थलविशेषे पितृमरणपूर्वमृतपुत्रव्यक्तीनां पितृमरणाद्युपजातस्वत्वं प्रति तदीयजीवनस्य हेतुत्वेऽपि सर्वत्र स्वामिजीवनस्य स्वत्वहेतुत्वे मानाभावात् तादृशव्यक्तीनामनन्तत्वेनानन्तकार्यकारणभावापत्त्या सामान्यतो निरूपकत्वसमवायोभयघटितसामानाधिकरण्यप्रत्यासत्त्या जीवनस्य स्वत्वहेतुत्वे उक्तस्थले भाविपुत्रव्यक्तीनामनन्तानां स्वत्वोत्पत्तेः विद्यमानपुत्रस्वत्वान्तरजनकत्वयोः कल्पनस्य विद्यमानपुत्राणां स्वत्वान्तरकल्पनस्य च सत्वात् स्वत्वगौरवापत्तेः फलमुखगौरवस्यादोषताया नव्यैरभ्युपगमात् ।

वस्तुतः सामान्यतो निरूपकतासम्बन्धेन स्वत्वत्वावच्छिन्नं प्रति चरमप्राणशरीरसंयोगध्वंसात्मकमरणस्य विशेषणताविशेषसम्बन्धेनाभाव एव शरीरनिष्ठतया हेतुर्लाघवात् न तु जीवनं हेतुः । चरमत्वञ्च स्वजनकतावच्छेदकतया सिद्धो निखिलचरमप्राणक्रियाव्यक्तिजन्यतावच्छेदकजातिव्यापको जातिविशेषः, तादृशप्राणक्रियाजन्यगगनादिसंयोगेऽपि तत्सत्त्वे क्षतिविरहः, परकीयशरीरे च परकीयप्राणसंयोगे मानाभावः, अतीतशरीरेऽपि अतीततादशायां विशेषणताविशेषेण निरुक्तमरणं वर्त्तत एव अत्र रूपं नष्टमित्यादिप्रत्ययाभावात् आश्रयनाशजन्यगुणनाशस्य विशेषणताविशेषेणावृत्तित्वेऽपि स्वाश्रयोत्पन्नगुणादिनाशस्य विशेषणताविशेषेणाश्रयस्य वर्त्तमानतादशायामिवातीततादशायामाश्रये सत्त्वात्, अन्यथा ध्वंसप्रागभावयोरत्यन्ताभावविरोधितावादिनां प्राचां नये रूपसामान्याभाववान् घटत्वादित्यादेरसद्धेतुत्वानुपपत्तेः सर्वस्मिन् घटेऽतीततादशायां रूपध्वंसतत्प्रागभावानामसत्त्वेन तद्दशायामत्यन्ताभाववृत्तौ विरोधाभावात् । न च यदा कदाचित्ध्वंसाद्यधिकरण एवात्यन्ताभावो न वर्त्तते इति न तस्य सद्धेतुत्वमिति वाच्यम् । तथासति आश्रयस्यातीततादशायां तत्र नाशस्यानभ्युपगमे तन्नये घटस्यातीततादशायां रूपध्वंसतत्प्रागभावानामसत्त्वेन तद्दशायां घटे इदानीं रूपं नास्तीति प्रत्ययानुपपत्तेः ध्वंसप्रागभावात्यन्ताभावानां त्रयाणामेव तदानीमसत्त्वात् प्रकृते लाघवानुरोधेनैवाश्रयोत्पन्नगुणादिनाशस्याश्रयातीततादशायामप्यभ्युपगमात् बाधकविरहाच्च । मरणञ्च तत्राप्याश्रयनाशजन्यं खड्गादिच्छेदेन मरणस्थलेऽपि शरीरावयवखड्गाभिघातोत्पत्तिदशायां खड्गाभिघातोदयात् शरीरावयवसंयोगनाशोत्पत्तिसमय एव प्राणशरीरसंयोगनाशोदयात् । अत एव प्राणो हि खड्गाभिहतः स न तत्क्रामति इति सिद्धान्त इति समासः ॥

ननु दानं स्वत्वजनकं नवेति चेदत्र प्राञ्चः दानं स्वत्वजनकमेव,

कार्य्यकारणभावस्तु तदुद्देश्यकदानत्वेन तत्स्वत्वविशेषत्वेन, विषयत्वाश्रयत्वोभयसम्बन्धेन धनघटितसामानाधिकरण्यं प्रत्यासत्तिः, अन्यथा ब्राह्मणादिसंप्रदानकदानात् ब्राह्मणादीनां दत्तद्रव्ये स्वत्वोत्पादो न स्यात्। न च प्रतिग्रहाख्यस्वीकार एव तत्र स्वत्वजनको न तु दानं, दानन्तु प्रतिबन्धकीभूतदातृस्वत्वध्वंसजननमात्रोपक्षीणं, कार्यकारणभावस्तु कर्मत्वाश्रयत्वोभयघटितसामानाधिकरण्यप्रत्यासत्त्या तत्पुरुषीयप्रतिग्रहत्वेन तत्पुरुषीयस्वत्वविशेषत्वेन, प्रतिग्रहत्वस्य जातिविशेषस्य फलबलकल्प्यतया दानोत्तरस्वीकार एव तत्सत्त्वेनातिप्रसङ्गविरहादिति वाच्यम्। तथापि विनिगमनाविरहेण दानस्यापि स्वत्वविशेषहेतुताया दुर्वारत्वात्, तत्पुरुषत्वावच्छिन्नोद्देश्यकदानत्वतत्पुरुषीयप्रतिग्रहत्वयोः समशरीरतया कारणतावच्छेदकगौरवाभावात्। न च "याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्ज्जयेदिति" याज्ञवल्क्यवचनेन प्रतिग्रहस्य स्वत्वजनकत्वबोधनात् तदेव विनिगमकम्, तत्र प्रतिग्रहपदस्य स्वोद्देश्यकदानपरत्वे लक्षणापत्तिरिति वाच्यम्। तद्वचनेन हि प्रतिग्रहाव्यवहितपूर्ववर्त्तिकस्वत्वस्यैव इष्टसाधनत्वं बोध्यते न तु प्रतिग्रहादेः स्वत्वजनकत्वं याजनादेः स्वत्वाजनकत्वात्।

वस्तुतो दानमेव स्वत्वजनकं न तु प्रतिग्रहः, प्रतिग्रहस्य स्वत्वजनकत्वे यत्र दानानन्तरं विलम्बेन सम्प्रदानस्य स्वीकारः तत्र द्रव्यस्य स्वीकारात् पूर्वं निधितया अन्येन ग्रहणे तस्य तत्र स्वत्वापत्तिः, प्रत्यवायानुत्पादापत्तिश्च चौर्य्यस्यैव प्रत्यवायहेतुत्वात्।

अथ प्रतिग्रहं विनापि दानादेव स्वत्वोत्पादे यत्र चाण्डालादिना देशान्तरस्थभद्रब्राह्मणमुद्दिश्य द्रव्यं दत्तं तत्र ब्राह्मणस्य प्रतिग्रहं विनापि स्वत्वोत्पत्त्यापत्तिः चाण्डालादिकर्तृकदानाधीनस्वत्वमात्रवृत्तिवैलक्षण्येन पापविशेषजनकतावच्छेदकतया सिद्धेन पातित्यं प्रति हेतुत्वात् पातित्यापत्तिश्च। न च पातित्यं प्रति चाण्डालीयप्रतिग्रहो हेतुर्न तु स्वत्वं तत्र पूर्वोक्तापत्तिद्वयस्यासत्त्वात् इति वाच्यम्। चाण्डालीयत्वस्य चाण्डालनिरूपितस्वत्ववत्त्वरूपस्य विशेषणत्वोपलक्षणत्वविकल्पग्रस्ततया पातित्यं प्रति प्रतिग्रहहेतुत्वस्य दुर्वचत्वात्, समूहालम्बनात्मके चाण्डालद्रव्ययवनद्रव्ययोरुभयोः प्रतिग्रहे परस्परविलक्षणपातित्यद्वयप्रयोजकसाङ्कर्यापत्त्या प्रतिग्रहनिष्ठवैजात्येनापि पातित्यहेतुत्वस्य दुर्वचत्वाच्चेति चेन्न।

तत्र प्रतिग्रहं विनापि ब्राह्मणस्य स्वत्वोत्पादेऽपि पातित्यजनकतावच्छेदकस्वत्वनिष्ठवैजात्यस्य दानजन्यतावच्छेदकस्वत्वनिष्ठवैजात्य-

व्याप्यतया: फलबलकल्प्यत्वेन तत्स्वत्वव्यावृत्ततया प्रत्यवायानुत्पादात्। न च तादृशस्वत्वमेव तत्र कुतो नोत्पद्यते चाण्डालकर्तृकदानस्यापरदानेनाविशेषादिति वाच्यम्। तादृशस्वत्वं प्रति तादृशेतरस्वत्वस्य कार्यसहवर्त्तितया प्रतिबन्धकत्वेन तत्र तदनुत्पादात्, अन्यथा प्रतिग्रहस्य स्वत्वजनकत्वमतेऽपि तादृशस्वत्वोत्पादस्य दुर्वारत्वात्। न च तन्मते तद्वैलक्षण्यस्य प्रतिग्रहजन्यतावच्छेदकजातिव्याप्यतया प्रतिग्रहरूपसामान्यकारणाभावादेव न तदुत्पत्तिरिति वाच्यम्। तथापि ब्राह्मणादिद्रव्यप्रतिग्रहस्थले तदुत्पादस्य दुर्वारत्वात्, चाण्डालीयत्वस्य विशेषणत्वोपलक्षणत्वविकल्पग्रस्ततया तदवच्छिन्नं प्रति चाण्डालीयद्रव्यप्रतिग्रहत्वेन कारणत्वस्य दुर्वचत्वात्, तत्र ब्राह्मणस्य स्वत्वमेव वा नोत्पद्यते स्वत्वविशेषजनकतावच्छेदकदानत्वस्य फलबलकल्प्यतया तद्व्यावृत्तत्वाभ्युपगमात् तस्य प्रतिग्रहाख्यस्वीकारोपहितत्याग एवाभ्युपगमात्, अतो दानानन्तरं नियमतः प्रतिग्रहापेक्षा दानेन पुण्यजननेऽपि दक्षिणावत्प्रतिग्रहस्याप्युत्तराङ्गतया प्रतिग्रहानुपहितत्यागे दानव्यवहारस्तु भक्तः।

एतेन स्वीकारस्य स्वत्वाहेतुत्वे देवतासम्प्रदानकदानात् देवताया गवादितिर्यक्सम्प्रदानकग्रामादिदानात् गवादितिर्यक्योनेश्च स्वत्वापत्तिः। न चेष्टापत्तिः, कथमन्यथा देवताग्रामो हस्तिग्राम इति व्यवहार इति वाच्यम्। मनुष्येतरस्य न स्वत्वोत्पाद इति तिर्यक्प्रकरणे प्रतिपादितत्वात्, देवताया ग्राम इत्यादिव्यवहारे च देवतोद्देशेन त्यक्तस्य लक्षणया षष्ठ्यर्थत्वाद्देवतोद्देशेन त्यक्तो ग्राम इत्यर्थादित्यपि परास्तम्। तत्र दानत्वाभावात्, उद्देश्यभेदेन दानस्वत्वयोः कार्यकारणभावस्य भिन्नतया देवताद्यन्तर्भावेण दानस्य स्वत्वजनकत्वाकल्पनादेव तत्र दानत्वसत्त्वेऽपि स्वत्वोत्पादवारणसम्भवाच्च श्राद्धविवेके दायभागकारोऽप्येवमित्याहुः।

नव्यास्तु दानं न स्वत्वजनकं किन्तु प्रतिग्रहाख्यस्वीकार एव। प्रतिग्रहं विना दानस्य स्वत्वजनकत्वे श्राद्धादावपि मृतपित्रादेः स्वत्वोत्पादापत्तेः "पितृभ्यो दद्यादि"त्यादिविधौ तत्रापि दानव्यवहारेण तस्यापि दानत्वात्। न च तत्र दानपदं त्यागमात्रे भाक्तम्, मुख्ये बाधकाभावात्। न च जीवनस्य स्वत्वसामान्यहेतुतया तदभावादेव श्राद्धान्नेन मृतपित्रादेः स्वत्वोत्पत्तिरिति वाच्यम्। दानजीवनयोःस्वत्वजनकताकल्पनमपेक्ष्य प्रतिग्रहस्यैकस्य स्वत्वजनकताकल्पनाया एव युक्तत्वात्। न च प्रतिग्रहस्य स्वत्वजनकत्वे प्रतिग्रहात् पूर्वं दत्त-

द्रव्यस्य निश्चितयाऽन्यस्याप्युपादानात् तत्र स्वत्वोत्पत्तिबलेन तद्द्रव्यग्रहणे प्रत्यवायानुत्पादापत्तिरिति बाधकात् प्रामाणिकं गौरवं न दोषाय इति वाच्यम् । प्रतिग्रहपूर्वमुपादानादन्यस्वत्वोत्पत्ताविष्टापत्तेः, प्रत्यवायजनकतावच्छेदकस्य चौर्यत्वस्य देवतोद्देश्यकत्यक्तद्रव्यग्रहणवत्ताद्दशान्यग्रहणेऽपि सत्त्वेन प्रत्यवायोत्पादात् चौर्यत्वस्य परस्वत्ववद्ग्रहणत्वव्याप्यत्वे मानाभावात् देवद्रव्ये व्यभिचाराच्च । किञ्च प्रतिग्रहस्य जनकत्वं वचनसिद्धम्, यथाऽह मनुः—

"सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च ॥" इति

वित्तागमा वित्तनिष्ठस्वत्वजनकाः, धर्म्या अधर्माजनकाः, सप्तेति तदर्थः । दायः दायत्वं मरणादिजन्यपित्रादिस्वत्वनाश इति यावत्, प्रयोगो धनं दत्त्वा शास्त्रोक्तलभ्यग्रहणम्, कर्मयोगः कृष्यादि, तथाचैतद्वचनानुरोधात्प्रतिग्रहस्य स्वत्वजनकत्वाभ्युपगमे किं दानस्य स्वत्वजनकत्वेन तद्बोधकस्य वचनस्य सद्भावादेतद्बोधकवचनस्य विरहाच्च । न च तत्र सत्प्रतिग्रहपदं सत्कर्तृकदानपरं, मुख्ये बाधकाभावात् । न च प्रतिग्रहस्य स्वत्वजनकत्वे यत्र देशान्तरस्थपात्रमुद्दिश्य दानानन्तरं प्रतिग्रहात् पूर्वमेव पात्रस्य नाशः तत्र तद्द्रव्ये तत्पुत्रस्य स्वत्वं न स्यात् मरणादिजन्यपित्रादिस्वत्वनाशस्य तत्राभावात् ।

परोक्षे कल्पितं दानं पात्राभावे कथं भवेत् ।
पुत्रदारेषु तद्दद्यात् अभावे गोत्रबन्धुषु ॥

इति प्रचेतोवचनेन तत्पुत्रादेः स्वत्वबोधनेन इष्टापत्तेरसम्भवात् । 'अभावे, पुत्रदाराणामभावे, गोत्रबन्धुषु दद्यादिति सम्बध्यते । तद्वचनबलात् पित्राद्यभावसहकृतपित्राद्युद्देश्यकदानजन्यस्वत्वनाशस्यापि पुत्रादिस्वत्वोत्पादकत्वकल्पने महागौरवमिति वाच्यम् । गौरवभीत्या वेदे लक्षणाकल्पने बहुतरधर्मविलोपापत्तेः । किञ्च प्रतिग्रहं विनापि दानस्य स्वत्वजनकत्वे यत्र चाण्डालेन देशान्तरस्थपात्रमुद्दिश्य द्रव्यदानानन्तरं चिरविलम्बेन पात्रस्य प्रतिग्रहः तत्र प्रतिग्रहात्पूर्वमेव पात्रस्य स्वत्वोत्पत्त्या तत्पूर्वमेव पतितत्वापत्तिरिष्टापत्तौ प्रतिग्रहात्पूर्वमेवाव्यवहार्यतापत्तिः, तत्पूर्वं तज्जन्यपुत्रादेरपि पतितोत्पन्नतया पतितत्वापत्तिश्च । तस्माद्दानं प्रतिबन्धकीभूतदातृस्वत्वनाशकं प्रतिग्रहश्च स्वत्वोत्पादक इत्येव युक्तमिति प्राहुः ।

इति दाने स्वत्वजनकत्वखण्डनवाद (३५) वीचिः समाप्तः ।

अथ विषयतावाद(३६)वीचिः ।

॥ श्रीविश्वेश्वराय नमः ॥

विषयता च स्वरूपसम्बन्धविशेषो ज्ञानादीनां विषयेण, न त्वतिरिक्ता मानाभावादिति प्राञ्चः । तदसत् । तथाहि विषयताया ज्ञानस्वरूपत्वे घटवद्भूतलमित्यादिज्ञाननिरूपितानां घटभूतलादिवृत्तिविषयतानामभेदापत्त्या तादृशज्ञानानन्तरं घटप्रकारकज्ञानवानहमित्यादिप्रतीतिवद् भूतलप्रकारकज्ञानवानहमित्यादिप्रत्ययप्रसङ्गात्, घटनिष्ठप्रकारताख्यतज्ज्ञानरूपविषयताया एव भूतलवृत्तित्वात् । एवं घटपटावित्यादिसमूहालम्बनधियो भ्रमत्वापत्तिश्च, पटनिष्ठतज्ज्ञानरूपविशेष्यताया घटनिष्ठघटत्वप्रकारतानिरूपिततज्ज्ञानरूपविशेष्यत्वाभिन्नतया तादृशज्ञानस्य घटत्वप्रकारतानिरूपितपटनिष्ठविशेष्यताशालित्वात् । विषयस्वरूपत्वे च घटभूतलसंयोगा इत्याकारकसमूहालम्बनज्ञानीयघटादिनिष्ठतत्स्वरूपविषयतानां घटवद्भूतलमित्यादिविशिष्टबुद्धिनिरूपितघटादिनिष्ठविषयतानां च तत्स्वरूपत्वेनाविलक्षणतया समूहालंबनविशिष्टबुद्ध्योर्वैलक्षण्यानुपपत्तेः । न च विशिष्टज्ञाने सम्बन्धसम्बन्धोऽप्यधिको भासते न तु समूहालम्बने इत्यत एव तयोर्वैलक्षण्यमुपपद्यत इति वाच्यम् । सम्बन्धसम्बन्धमादायापि समूहालम्बनसम्भवात् । तस्मात् ज्ञानविषयाभ्यामतिरिक्तमेव विषयत्वमिति अनन्यगतिकतया स्वीकरणीयम् । तच्चाश्रयतया विषये ज्ञाने च निरूपकतया वर्त्तत इति ॥ एतेन विषयित्वमपि व्याख्यातम् । न च विषयताप्रतियोगित्वमेव विषयित्वमस्तु, किं तस्यातिरिक्तत्वस्वीकारेणेति वाच्यम् । विषयित्वमेवातिरिक्तं तत्प्रतियोगित्वमेव विषयत्वमित्यस्यापि सुवचत्वात् । तस्माद्विनिगमनाविरहेणोभयमप्यतिरिक्तम् ॥ विषयत्वादिकं तु विषयभेदेन भिद्यते, अन्यथा घटवद्भूतलमित्यादिज्ञानीयघटभूतलादिविषयतानां घटपटावित्यादिज्ञानीयविषयतानाञ्चाभेदप्रसङ्गेन पूर्वोक्तानुपपत्तितादवस्थ्यात्, न तु ज्ञानभेदेनापि तद्भेदः, मानाभावात् ॥ तच्च द्विविधं विषयत्वानिरूपितं तन्निरूपितं च । तत्र निर्विकल्पकनिरूपितविषयता विषयत्वानिरूपिता, निर्विकल्पकघटत्वादिविषयतायां घटादिविषयतानिरूपितत्वे मानाभावात् । विशिष्टबुद्धिविषयताश्च विषयत्वान्तरनिरूपिताः, प्रकारताविशेष्यतासंसर्गतारूपाणां तासां परस्परनिरूप्यनिरूपकभावसत्त्वात्, अन्यथा घटवद्भूतलं पर्वतो वह्निमानित्याकारकज्ञानविषयताया घटवान् पर्वतो वह्निमद्भूतलमित्याकारकज्ञानविषयतायाश्च अवैलक्षण्यप्रसङ्गात्, मन्मते प्रथमे घटप्रकारत्वभूतलविशेष्यत्वयोर्वह्निप्रकारत्वपर्वतविशेष्यत्वयोश्च प-

रस्परनिरूप्यनिरूपकभावः, द्वितीये च घटप्रकारत्वपर्वतविशेष्यत्वयोर्वह्निप्रकारत्वभूतलविशेष्यत्वयोरिति वैलक्षण्योपपत्तिः । एवं घटवद्भूतलं घटवान् पर्वत इत्यादिसमूहालंबने घटादिरूपैकप्रकारनिष्ठप्रकारताया अपि भूतलपर्वतादिविशेष्यताभेदेन, घटवद्भूतलं पटवच्चेत्यादिसमूहालंबने च भूतलाद्येकविशेष्यनिष्ठविशेष्यताया अपि घटपटादिप्रकारताभेदेन भेदो बोध्यः, उभयविशेष्यतानिरूपितत्वस्यैकप्रकारतायामुभयप्रकारतानिरूपितत्वस्य चैकविशेष्यतायां स्वीकारे तादृशसमूहालम्बनादतिरिक्तविषयताकल्पनप्रसङ्गात्, मन्मते तु घटवद्भूतलमित्याद्याकारकप्रत्येकज्ञाननिरूपिताभ्यां प्रत्येकविशेष्यतानिरूपितप्रकारताभ्यां प्रत्येकप्रकारतानिरूपितविशेष्यताभ्यामेवोपपत्तेः । समूहालम्बने प्रकारताभेदेन विशेष्यताभेदस्यानुपगमे घटवद्भूतलं पटवच्चेत्यादिसमूहालम्बनादेकत्र द्वयमिति रीत्या एकधर्मिणि नानाधर्मवैशिष्ट्यावगाहिनो घटवद्भूतलं पटवदित्यादिज्ञानस्यावैलक्षण्यप्रसङ्गः, मन्मते तु समूहालंबने प्रकारताभेदेन विशेष्यताभेदो न त्वेकत्र द्वयमितिरीत्या तादृशबोध इति समूहालंबनतस्तस्य वैलक्षण्योपपत्तिरिति ।

विशेष्यत्वं प्रकारत्वं च द्विविधम् किञ्चिद्धर्मावच्छिन्नं निरवच्छिन्नं च । तत्र किञ्चिद्धर्मावच्छिन्नविशेष्यता भूतलत्वाद्येकविशेषणविशिष्टे घटादिरूपापरधर्मावगाहिज्ञाने, तत्र घटादिप्रकारतानिरूपितभूतलविशेष्यताया भूतलत्वाद्यवच्छिन्नत्वात्, अन्यथा केवलमेकत्र द्वयमिति रीत्या तदुभयवैशिष्ट्यावगाहिनो भूतलं घटवदिति ज्ञानात् विशिष्टवैशिष्ट्यबोधस्य वैलक्षण्यानुपपत्तिः । किञ्चिद्धर्मावच्छिन्नप्रकारता च विशिष्टनिरूपितवैशिष्ट्यावगाहिनि घटवदित्याकारकज्ञाने, तत्र घटादिप्रकारताया घटत्वाद्यवच्छिन्नत्वात्, अन्यथा केवलं विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति रीत्या घटघटत्वाद्यवगाहिनस्तथाविधज्ञानाद्विशिष्टवैशिष्ट्यबोधस्य वैलक्षण्यानुपपत्तिः । प्रपञ्चितं चेदमन्यत्र । तदंशे विशेषणतापन्नस्यैव तन्निष्ठविषयतावच्छेदकत्वमिति बोध्यम् । तद्धर्मावच्छिन्नविशेष्यता च न तद्धर्मप्रकारतानिरूपिता, तस्यास्तथात्वे मानाभावात् । न चैवं भूतलं घटवदित्यादिज्ञानानां भूतलत्वादिप्रकारतानिरूपितविशेष्यताशालित्वानुपपत्तिरिति वाच्यम् । केवलमेकत्र द्वयमितिरीत्या भूतलत्वघटवैशिष्ट्यावगाहिज्ञानीयभूतलत्वाद्यनवच्छिन्नभूतलत्वादिप्रकारतानिरूपितविशेष्यतानियामकसामग्र्या अपि तादृशविशिष्टवैशिष्ट्यबोधपूर्वकाले सत्त्वात्तस्य तादृशविषयताशालित्वस्यावश्यकत्वात् ।

वस्तुतस्तु विशिष्टवैशिष्ट्यबोधविचारे निरवच्छिन्नविषयत्वादीनां

निखिलविशिष्टवैशिष्ट्यबोधसाधारण्यस्य खण्डितत्वात्, तादृशविशेष्यताशून्यबोधस्य भूतलत्वादिप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यताशालित्वोपपत्तये भूतलत्वावच्छिन्नविशेष्यताया एव तत्प्रकारतानिरूपितत्वं स्वीकरणीयम् ।

अथैतादृशज्ञानस्य भूतलत्वप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यताशालित्वात् भूतलत्वादिविशिष्टे वैशिष्ट्यावगाहिनो भूतलं भूतलमित्याकारकज्ञानाद् भूतलं घटवदित्याकारकज्ञानस्य वैलक्षण्यानुपपत्त्या तादृशज्ञानानन्तरं भूतलत्वविशिष्टे भूतलत्ववैशिष्ट्यावगाहिस्मरणस्यापत्तिरिति चेन्न। घटवद्भूतलमित्याद्याकारज्ञानीयभूतलत्वावच्छिन्नविशेष्यताया भूतलत्वप्रकारतानिरूपितत्वेऽपि तस्या भूतलत्वावच्छिन्नत्वविशिष्टविशेष्यतात्वेन न तन्निरूप्यत्वं, किन्तु भूतलविशेष्यतात्वेनैव, भूतलं भूतलमित्यादौ च भूतलत्वावच्छिन्नविशेष्यताया भूतलत्वावच्छिन्नत्वविशिष्टविशेष्यतात्वेन भूतलत्वप्रकारतानिरूप्यत्वोपगमात् तावतैव वैलक्षण्योपपत्तेः ।

अवच्छेदकत्वमपि द्विविधं सावच्छिन्नं निरवच्छिन्नं च । तत्र सावच्छिन्नमवच्छेदकत्वं 'जातिमद्घटवदि'त्यादौ, तत्र भूतलत्वादिनिष्ठविशेष्यतावच्छेदकताया जातित्वावच्छिन्नत्वात् । 'भूतलं घटवदि'त्यादिज्ञानीयभूतलत्वादिनिष्ठविशेष्यतावच्छेदकत्वादिकं तु निरवच्छिन्नमिति । एवमवच्छेदकतानिरूपितावच्छेदकतात्वमपि व्याख्यातम् । अवच्छेदकतावच्छेदकं तु अवच्छेदकांशे विशेषणतापन्नमेवेति बोध्यम् ।

विषयतावद्विशेष्यतादिभेदेनाननुगतानां विषयतानामनुगमकं विषयतात्वमपि अतिरिक्तमास्थेयम्, अन्यथा घटो ज्ञानविषयः पटो ज्ञानविषय इत्याकारिकाया अनुगताकारप्रतीतेरनुपपत्तेः, घटत्वादिविशिष्टबुद्धित्वावच्छिन्नं प्रति घटत्वादिविषयकज्ञानत्वादिना हेतुतानुपपत्तेः, घटत्वाद्येकैकवृत्तिविषयतानामेव प्रकारताविशेष्यताभेदेन नानाविधतया कारणतावच्छेदकाननुगमेन व्यभिचारप्रसङ्गात् ।

एवं विषयतात्ववत्तदवान्तरावच्छेदकतात्वप्रकारतात्वविशेष्यतात्वादिकमपि अनुगतप्रतीतिबलात् अतिरिक्तमुपगन्तव्यम्, अत एव पर्वतत्वाद्यवच्छिन्नविशेष्यताकवह्न्याद्यनुमितित्वावच्छिन्नं प्रति पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमादिप्रकारताशालिज्ञानत्वादिना अनुगतहेतुत्वकल्पनमुपपद्यते, अन्यथा तत्तद्धूमादिभेदभिन्नानां प्रकारत्वादीनामननुगमेन तदनुपपत्तेः ॥ प्रकारतात्वविशेष्यतात्वादिकं च न मिथो विरुद्धं, घटवद्भूतलमित्यादिज्ञाने घटत्वादिप्रकारतानिरूपित-

घटादिनिष्ठविशेष्यताया एव भूतलत्वाद्यवच्छिन्नविशेष्यतानिरूपितप्रकारतारूपतया तत्र विशेष्यतात्वप्रकारतात्वयोः समावेशात् । तत्र तादृशप्रकारताविशेष्यत्वयोर्भेदे 'घटवद्भूतलं द्रव्यं च, द्रव्यवद् भूतलं घटश्चे'ति ज्ञानयोर्वैलक्षण्यानुपपत्तेः, उभयत्रैव घटत्वप्रकारतानिरूपिताया द्रव्यत्वप्रकारतानिरूपिताया एव घटविशेष्यताया घटत्वप्रकारतानिरूपितभूतलविशेष्यतायाश्च सत्त्वात्, मन्मते प्रथमे घटत्वप्रकारतानिरूपिता घटविशेष्यता भूतलनिष्ठविशेष्यतानिरूपितप्रकारत्वाभिन्ना द्रव्यत्वप्रकारतानिरूपितविशेष्यता च तद्भिन्ना, द्वितीये द्रव्यत्वप्रकारतानिरूपितघटविशेष्यता भूतलविशेष्यतानिरूपितप्रकारत्वाभिन्ना घटत्वप्रकारतानिरूपितविशेष्यता च तद्भिन्ना इति वैलक्षण्योपपत्तिः । एवं 'रक्तदण्डवान् पुरुष' इत्याकारकज्ञाने रक्तत्वप्रकारतानिरूपितदण्डत्वावच्छिन्नविशेष्यतैव पुरुषविशेष्यतानिरूपितप्रकारतारूपा, तद्भेदे 'रक्तो दण्डः दण्डवान् पुरुष' इत्यादिसमूहालम्बनात् तादृशविशिष्टबुद्धेर्वैलक्षण्यानुपपत्तेः, उभयत्रैव रक्तत्वप्रकारतानिरूपितदण्डविशेष्यताया दण्डप्रकारतानिरूपितपुरुषविशेष्यतायाश्च सत्त्वादिति ।

केचित्तु विशेष्यताप्रकारतावत् उद्देश्यताविधेयत्वे अपि विषयताविशेषौ । न च किञ्चिद्धर्मावच्छिन्नविशेष्यत्वमेवोद्देश्यत्वं, तादृशविशेष्यतानिरूपितप्रकारत्वमेवविधेयत्वमस्तु, किं तयोरतिरिक्ततास्वीकरणेनेति वाच्यम् । तथासति 'वह्निमान् पर्वतो घटवानि'त्याद्यनुमितेः पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्न्यादिविधेयताशालित्वात् 'पर्वतो वह्निमानि'त्याकारकानुमित्यनन्तरमिव तादृशानुमित्यनन्तरमपि पर्वते वह्निमनुमिनोमीत्याकारकानुव्यवसायापत्तेः, मन्मते तादृशज्ञानव्यावृत्तायाः पर्वतादिविशेष्यतानिरूपितप्रकारताविलक्षणायाः पर्वतादिनिष्ठोद्देश्यतानिरूपितवह्न्यादिविधेयताया एव तादृशानुव्यवसायविषयत्वाभ्युपगमात् तत्र तदभावादेव तादृशानुव्यवसायापत्त्यसम्भवात् ।

अथ पर्वतविशेष्यकवह्निप्रकारकानुमितित्वमेव तादृशानुव्यवसायविषयः, विषयतासम्बन्धेन तादृशानुव्यवसायं प्रति च पर्वतविशेष्यकवह्निव्याप्यवत्ताज्ञानजन्यानुमितित्वेन तादात्म्यप्रत्यासत्त्या हेतुत्वोपगमात् न 'वह्निमान् पर्वतो घटवान्' इत्याकारकानुमित्यनन्तरं तथाविधानुव्यवसायापत्तिरिति किमतिरिक्तविधेयतया । न च तादृशगुरुधर्मावच्छिन्नस्य तथाविधानुव्यवसाये हेतुत्वकल्पनापेक्षया पर्वतविशेष्यतानिरूपितवह्निविधेयताकानुमितिहेतुत्वकल्पने लाघवादतिरिक्तविषयता सेत्स्यतीति वाच्यम् । लाघवमात्रेणातिरिक्तविषयतासिद्धौ धूमपरामर्श-

जन्यतावच्छेदकतयापि विलक्षणविषयतासिद्धिप्रसङ्गात्, क्लृप्तविषयताधारतज्जन्यतावच्छेदकत्वे तस्या आलोकादिलिङ्गकानुमितिसाधारणतया तत्र व्यभिचारवारणायाव्यवहितोत्तरत्वस्य कार्यतावच्छेदककोटिप्रवेशे महागौरवप्रसङ्गात्। अथातिरिक्तविधेयतानभ्युपगमे सिद्ध्यभावजन्यतावच्छेदकं दुर्वचम्, तथाहि पर्वतो वह्निमानित्यादिसिद्ध्यभावजन्यतावच्छेदकं न पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निप्रकारकानुमितित्वं, 'वह्निमान् पर्वतो घटवानि'त्येतादृशानुमितौ व्यभिचारात्। नापि पर्वतत्वावच्छिन्नविशेष्यताकवह्निव्याप्यवत्ताज्ञानजन्यानुमितित्वं, 'वह्निव्याप्यधूमवान् पर्वतो वह्निमान् घटव्याप्यवांश्चे'त्याकारकसमूहालम्बनजन्यायां तथाविधानुमितौ व्यभिचारादिति चेन्न। वह्नित्वान्यधर्मावच्छिन्नप्रकारत्वानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकानुमितित्वस्यैव पर्वतो वह्निमानित्येतादृशसिद्ध्यभावजन्यतावच्छेदकत्वसम्भवात्, वह्निमान् पर्वतो घटवानित्याकारकानुमितिनिष्ठविशेष्यताया वह्नित्वान्यघटत्वावच्छिन्नप्रकारतानिरूपितत्वेन व्यभिचारानवकाशात्। न चैवमपि 'वह्निमत्पर्वतवान् देश' इत्याकारकानुमितौ व्यभिचारो दुरुद्धर एव तादृशानुमितिविशेष्यताया वह्नित्वान्यधर्मावच्छिन्नप्रकारत्वानिरूपितत्वादिति वाच्यम्। तादृशमुख्यविशेष्यताया एव निवेशनीयत्वात्। न चैतदपेक्षया पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्नित्वावच्छिन्नविधेयतायास्तादृशसिद्ध्यभावजन्यतावच्छेदकत्वे लाघवात् तत्सिद्धिरिति वाच्यम्। लाघवेनातिरिक्तविषयतासिद्धेः प्रागेव निराकृतत्वादिति चेत्।

नैवम्, अतिरिक्तविधेयतानभ्युपगमे वह्निं नानुमिनोमीतिप्रतीतेरनुमितिनिष्ठो वह्निप्रकारकत्वाभाव आत्मनिष्ठो वह्निप्रकारकानुमितित्वावच्छिन्नाभावो वा विषयो वाच्यः, तथा च वह्निमान् पर्वतो घटवान् वह्निमत्पर्वतवान् देश इत्याद्यनुमितिकाले तथाविधप्रतीतेरनुदयप्रसङ्गः, तादृशानुमितौ वह्निप्रकारकत्वाभावस्यात्मनि च तथाविधानुमितित्वावच्छिन्नाभावस्यासत्त्वात्, मम तु वह्निविधेयकत्वाभावस्यानुमितौ वह्निविधेयकानुमितित्वावच्छिन्नाभावस्यात्मनि तादृशप्रतीतिविषयत्वोपगमान्नानुपपत्तिः। न च तदानीं भ्रमरूपा तादृशप्रतीतिरभ्युपेयते तत्र विषयासत्त्वमकिञ्चित्करमिति वाच्यम्। यथाकथञ्चित् प्रमात्वस्य शक्योपपादनत्वे प्रतीतेर्भ्रमत्वकल्पनाया अन्याय्यत्वात्। न च वह्निव्याप्यवत्ताज्ञानजन्यानुमितित्वावच्छिन्नाभावस्यैव तद्विषयत्वोपगमात् तादृशानुमितेश्चातथात्वात् अतिरिक्तविधेयतानभ्युपगमेऽपि न तथाविधप्रत्ययानुपपत्तिरिति वाच्यम्। तथासत्यपि पूर्वोक्तसमुहालम्बनज्ञानजन्यतथावि-

धानुमित्यनन्तरं निरुक्तप्रतीत्यनुपपत्तेस्तादवस्थ्यात्, अनुमितिपरामर्शयोः कार्यकारणभावाग्रहदशायामपि तादृशप्रत्ययस्य सर्वानुभवसिद्धत्वेन तादृशाभावस्य विषयत्वासम्भवाच्च ।

अथैवमपि विधेयत्वमेवातिरिक्तमास्ताम् उद्देश्यत्वं तु विशेष्यत्वमेवास्तु, किञ्च विधेयतावद् विधेयतात्वमपि अतिरिक्तमवश्यं स्वीकरणीयम्, अन्यथा विधेयतानां तत्तद्विधेयादिभेदेन भिन्नतयाऽननुगमात् तद्घटितोपदर्शितधर्मावच्छिन्नप्रतियोगिताकाभावस्यैकत्वासम्भवात्, अभावकूटस्य च दुर्ज्ञेयतया तादृशप्रतीत्यनुपपत्तितादवस्थ्यात्, तथा चातिरिक्तविधेयत्वादिकमनर्थकं, पर्वतो वह्निमान् इत्यादिप्रत्यक्षादिसाधारणवह्न्यादिप्रकारतायां विधेयतात्वस्वीकारेणैवोपपत्तेः । न च तादृशप्रत्यक्षादिसाधारणवह्न्यादिप्रकारतातो वह्निमान् पर्वतो घटवानित्यादिज्ञानीयवह्निप्रकारतायां वैलक्षण्ये मानाभावात् तत्र विधेयतात्वस्वीकारे तथाविधानुमितिदशायां वह्निं नानुमिनोमीत्यादिव्यवसायानुपपत्तितादवस्थ्यम् । 'वह्निमान् पर्वतो घटवानि'त्यादिज्ञानीयवह्निप्रकारताया घटादिप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतानिरूपिततया पर्वतो वह्निमानित्यादिज्ञानीयवह्न्यादिप्रकारतायाश्चातथात्वेन तयोर्भेदस्यावश्यकत्वादिति चेत् ।

नैवम्, प्रकारताव्यतिरिक्तविधेयतानभ्युपगमे पर्वते वह्निरित्यादिवाक्यजन्यशाब्दबोधस्य वह्न्यादिविधेयकपर्वतोद्देश्यकत्वाद्यनुपपत्तेरतिरिक्तविधेयत्वादिकल्पनमावश्यकमेव । न च तत्र नास्त्येव पर्वतवह्न्योरुद्देश्यविधेयभावः किन्तु विशेष्यविशेषणभावापन्नयोर्वह्निपर्वतवृत्तित्वयोरेवेति वाच्यम् । शाब्दबोधस्थले प्राङ्निर्दिष्टस्यैवोद्देश्यतया चरमनिर्दिष्टपदार्थस्यैव विधेयतया तादृशवाक्यजन्यशाब्दबोधे वह्निपर्वतवृत्तित्वयोरुद्देश्यविधेयभावासम्भवात्, अन्यथा 'वह्निः पर्वते पर्वते वह्नि'रित्येतादृशवाक्यजन्यशाब्दबोधयोर्विशेषणविशेष्यभाववैलक्षण्येन लक्षणानुपपत्तेः, अत एव गुणानां गुणत्वमित्यत्र गुणत्वस्यैवोद्देश्यतावच्छेदकत्वं तस्यैव विधेयत्वमित्यभिप्रायेण ग्रन्थकृता उद्देश्यतावच्छेदकविधेययोरैक्येन शाब्दबोधानुपपत्तिराशङ्किता । यदि च विशेष्यविशेषणभावापन्नयोरेवोद्देश्यविधेयभावस्तदा तत्र गुणत्वत्वस्य विशेष्यतावच्छेदकतया गुणवृत्तित्वत्वस्य च विशेषणतावच्छेदकतया गुणत्वस्यातथात्वेन तदत्यन्तासङ्गतमेव स्यात् । एवं विधेयत्वादीनां प्रकारताविशेषादिरूपत्वे इतरत्वव्यापकीभूताभावप्रतियोगिमती पृथिवीत्यादिपरामर्शजन्यायाः पृथिव्यामितरभेद इत्याकारकाया अप्रसिद्धसाध्यविशेष्यकानुमितेस्तद्विधेयकत्वा-

नुपपत्त्या तदुत्तरमितरभेदं नानुमिनोमीत्याकारकव्यवसायापत्तिः। न च तादृशज्ञानीयेतरभेदविशेष्यतायामेव विधेयतात्वोपगमान्न तादृशानुमितेरितरभेदादिविधेयकत्वानुपपत्तिरिति वाच्यम्। तथासति पृथिवीव्याप्यवानितरभेद इत्याकारकपरामर्शजन्याया आधेयतासम्बन्धेन पृथिव्यादिसाध्यकतथाविधानुमितेरपि इतरभेदादिविधेयकत्वापत्तेः, तथाविधानुमित्योर्विशेष्यतावैलक्षण्याभावादिति।

अथ पर्वते वह्निरिति शाब्दबोधे पृथिव्यामितरभेद इत्याद्यनुमितौ चातिरिक्तविधेयत्वादिसिद्धावपि 'पर्वतो वन्हिमान् पृथिवीतरभेदवती'त्याद्याकारकानुमित्यादौ प्रकारत्वाद्यतिरिक्तविधेयत्वादौ मानाभावः। वह्न्यादिवृत्त्यैकैकप्रकारत्वादिनिरूपकीभूतानन्तानुमित्यादिव्यक्तिषु अतिरिक्तविषयताकल्पनापेक्षया तादृशप्रकारत्वादौ विधेयतात्वादिकल्पनाया एवोचितत्वात् इति चेन्न।

प्रत्यक्षादिसाधारणप्रकारतायां विधेयतात्वाङ्गीकारेऽनुमित्यादिस्थले बाधबुद्धीनां प्रतिबन्धकतायामिच्छाधीनप्रत्यक्षे व्यभिचारवारणाय प्रत्यक्षान्यत्वस्य प्रतिबध्यतावच्छेदककोटौ निवेशनीयतया गौरवप्रसङ्गात्। मन्मते विधेयताया एव तादृशप्रतिबध्यतावच्छेदककोटौ निवेशनीयतया तस्याश्च प्रत्यक्षसाधारण्यानभ्युपगमेनाहार्यप्रत्यक्षे व्यभिचारविरहेण प्रत्यक्षान्यत्वस्यानिवेशात्। न च परोक्षत्वजातेः प्रतिबध्यतावच्छेदकत्वोपगमेनैवाहार्यत्वप्रत्यक्षे व्यभिचारवारणसम्भवेन मयापि प्रत्यक्षान्यत्वं न निवेश्यत इति वाच्यम्। परोक्षत्वजातेरन्यत्र दूषितत्वात्।

अथ लाघवेनातिरिक्तविधेयतासिद्धेः प्रागेव निरस्तत्वात् कथमेतादृशयुक्त्या तादृशानुमित्यादावतिरिक्तविधेयता सिद्ध्यतीति चेन्न।

एतादृशयुक्त्या तादृशविषयता न कल्प्यते, किन्तु पर्वते वह्निः पृथिव्यामितरभेद इत्याकारकशाब्दानुमित्योः पूर्वोक्तयुक्त्या सिद्धस्य विषयताविशेषस्य पर्वतो वह्निमान् पृथिवी इतरभेदवतीत्याकारकानुमित्यादावेतादृशलाघवेन सम्बन्धः कल्प्यत इति न काप्यनुपपत्तिरिति।

अथ पृथिव्यामितरभेदः पृथिवीतरभेदवतीत्याकारकानुमित्योरेकविधेयतास्वीकारे साध्यप्रसिद्धेः साध्यविशेष्यकानुमितौ प्रतिबध्यतावच्छेदकं दुर्वचं, तथाहि इतरभेदज्ञानस्य प्रतिबध्यतावच्छेदकं यदीतरभेदविशेष्यकानुमितित्वं, तदा इतरभेदः पृथिवीव्याप्यवानित्यादिपरामर्शजन्येतरभेदपक्षकानुमितौ व्यभिचारः, इतरभेदविधेयकत्वे सति तद्विशेष्यकानुमितित्वस्य प्रतिबध्यतावच्छेदकत्वेऽपि 'पृथिवी इतरभेदव्याप्यवती इतरभेदः पृथिवीव्याप्यवानि'त्याकारकसमूहालम्बनज्ञानजन्यायां 'पृथिवी-

इतरभेदवती पृथिव्यामितरभेद' इत्याकारकसमूहालम्बनानुमितौ व्यभिचारः, तादृशानुमितेरितरभेदविधेयकत्वात्तद्विशेष्यकत्वाच्च, मन्मते तु प्रकारताभिन्नेतरभेदविधेयता इतरभेदज्ञानप्रतिबध्यतावच्छेदिकेति न व्यभिचारः, तादृशसमूहालम्बनानुमितिनिरूपितेतरभेदविधेयतायाः प्रकारतारूपतया तदन्यत्वाभावादिति चेन्न ।

इतरभेदविशेष्यकपरामर्शजन्येतरभेदविशेष्यकानुमितित्वस्यैव मम मते इतरभेदज्ञानप्रतिबध्यतावच्छेदकत्वोपगमात् । पृथिवीव्याप्यवानितरभेद इत्याकारकपरामर्शजन्यानुमितेरितरभेदविशेष्यकपरामर्शजन्यत्वेन व्यभिचारानवकाशात् । नचैतादृशगुरुधर्मस्य साध्यप्रसिद्धिप्रतिबध्यतावच्छेदकत्वे गौरवात् पृथिवीतरभेदव इत्याकारकानुमितिप्रत्यक्षादिसाधारणेतरभेदप्रकारतायां विधेयतात्वकल्पनमेवोचितमिति वाच्यम् । तथासति धर्मितावच्छेदकभेदेनानन्तबाधबुद्ध्यादिप्रतिबन्धकतायां प्रतिबध्यतावच्छेदककोटौ प्रत्यक्षान्यत्वनिवेशे गौरवात् तदपेक्षया धर्मिविशेषामिश्रितसाध्यप्रसिद्धिप्रतिबन्धकतायां तादृशधर्मस्य प्रतिबध्यतावच्छेदककोटौ निवेशनस्योचितत्वात् ॥

एवमापत्तिस्थले आपाद्यत्वमपि विषयताविशेषः, आपत्तिनिरूपितप्रकारतासामान्यस्यापाद्यतारूपत्वे वह्निमान् पर्वतो घटवान् स्यादित्याकारकापत्तेरपि वह्न्यादेरापाद्यत्वापत्तिः, पर्वतो वह्निमानित्याकारकवह्न्याद्यवच्छिन्नविशेष्यताशालिज्ञानीयप्रकारताविलक्षणवन्ह्यादिप्रकारतायास्तत्रोपगमेऽपि वह्निमान् पर्वतः पर्वतो घटवान् स्यादित्याकारकापत्तौ वन्ह्यादेस्तथात्वापत्तेर्दुर्वारत्वात् ।

अथ स्वव्यतिरेकनिर्णयजन्यतदापत्तिविषयत्वमेव स्वस्य तदापत्तिनिरूपितमापाद्यत्वमस्तु किमतिरिक्तविषयतास्वीकारेण, उक्तापत्तौ च घटव्यतिरेकनिर्णयस्यैव हेतुतया वन्ह्यादेस्तदापत्त्यसम्भवादिति चेन्न ।

स्वव्यतिरेकनिर्णयजन्यत्वानुपस्थितावपि वन्ह्यादिनिष्ठापाद्यत्वावगाहिनो वह्निमापादयामीत्यनुव्यवसायस्यानुभवसिद्धतया आपाद्यत्वस्य स्वव्यतिरेकनिर्णयजन्यतदापत्तिविषयतारूपत्वासम्भवात् ।

अथ वह्न्यादिप्रकारकापत्तित्वमेव तादृशानुव्यवसायविषयः, उक्तधर्मप्रकारतानिरूपितविषयतासम्बन्धेन तादृशानुव्यवसायं प्रति वन्ह्यभाववत्तानिर्णयजन्यतायाः हेतुत्वान्नोपदर्शितसमूहालम्बनाद्यनन्तरं तादृशानुव्यवसायप्रसङ्गः । आपत्तित्वं च मानसत्वव्याप्यो जातिविशेषः वह्निमापादयामीत्याद्यनुव्यवसायसाक्षिक एव । न चातिरिक्तविषयताया अनभ्युपगमे वह्न्यादिव्याप्यवत्तानिर्णयादिजन्यतावच्छेदकं वह्न्यादि-

प्रकारकापत्तित्वमेव वाच्यं, तथाच तादृशसमूहालम्बनापत्त्यादौ व्यभिचार इति वाच्यम् । अनुमितिस्थलीयकार्यकारणभाव इव कारणवैशिष्ट्यं निवेश्यैव व्यभिचारस्य वारणीयत्वात्, अस्मन्मतेऽप्यन्यापादककापत्तौ व्यभिचारवारणाय तद्वैशिष्ट्यनिवेशस्यावश्यकत्वात् । एवं वह्न्यभावादिमत्तानिर्णयजन्यतावच्छेदककोटावपि तद्वैशिष्ट्यस्य निवेशनीयतया न तस्य समूहालम्बनादौ व्यभिचारः । भवन्मतेऽपि वह्निमद्भेदादिनिर्णयजन्यवह्न्याद्यापत्तौ व्यभिचारवारणाय तद्वैशिष्ट्यनिवेशस्यावश्यकत्वात् । न च पर्वतत्वावच्छिन्नविशेष्यकवह्निविशिष्टबुद्धौ पर्वतत्वावच्छिन्नविशेष्यकवह्न्यभावादिमत्तानिर्णयाभावहेतुतायां पर्वतो वह्निमान् स्यादित्यापत्तौ व्यभिचारवारणाय पर्वतत्वावच्छिन्नविशेष्यकवह्न्यापत्त्यन्यत्वं जन्यतावच्छेदककोटौ निवेश्यमिति तज्जन्यतावच्छेदककोटिप्रविष्टतया विषयताविशेषसिद्धिः, वह्निप्रकारकापत्त्यन्यत्वस्य तत्र निवेशे वह्निमान् पर्वतः पर्वतो घटवान् स्यादित्यादिसमूहालम्बनानां तादृशबाधदशायामापत्तिरिति वाच्यम् । जन्यतासम्बन्धेन वह्न्यभाववत्तानिर्णयवदन्यत्वस्यैव तत्र निवेशनीयतया व्यभिचारापत्त्योर्वारणसम्भवात् । जन्यत्वनिवेशापेक्षया विषयिताविशेषनिवेशे लाघवात्तत्सिद्धिरिति तु न वाच्यम् । कार्यतावच्छेदकलाघवेनातिरिक्तविधेयतासिद्धौ तत्तदापादकवत्ताज्ञानजन्यतावच्छेदकतयापि विषयताविशेषसिद्धिप्रसङ्गात् ।

वस्तुतस्तु बाधाभावजन्यतावच्छेदककोटौ जन्यतासम्बन्धेन बाधवदन्यत्वनिवेशनमेवोचितम् । न च बाधकालीने बाधहेतुताया अप्रामाणिकतया तदनुरोधेन तत्कल्पने च गौरवात् इच्छाया उत्तेजकत्वमावश्यकमिति वाच्यम्, आपत्तिस्थले बाधबुद्धेर्हेतुताया आवश्यकत्वात् तत्रापत्तित्वमनिवेश्य इच्छाकालीनज्ञानसाधारणतादृशबाधाव्यवहितोत्तरत्वस्यैव जन्यतावच्छेदकत्वोपगमेनातिरिक्तकारणताया अकल्पनात् । न चैवमापत्त्यात्मकज्ञानस्य बाधकालीनेच्छां विनापत्तिरिति तत्रेच्छाहेतुत्वकल्पने गौरवमिति वाच्यम् । इच्छाया उत्तेजकत्वे अप्रामाण्यग्रहादिभिः समं इच्छाभावस्य विशेष्यविशेषणभावे विनिगमनाविरहेणानन्त्यादिच्छाया हेतुत्वस्यैवोचितत्वादिति चेत् ।

मैवम्, आपाद्यत्वरूपविषयताविशेषानभ्युपगमे वन्ह्यादिप्रकारकापत्तित्वावच्छिन्नाभावो वह्निं नापादयामीत्यनुव्यवसायविषयो वाच्यः, न तु वह्न्यादिव्यतिरेकनिर्णयजन्यत्वविशिष्टापत्त्यभावस्तादृशजन्यत्वाद्यनुपस्थितिदशायां तादृशप्रतीतेः सर्वानुभवसिद्धत्वात् । तथाच पूर्वो-

पस्थितसमूहालम्बनदशायां, घटमापादयामि न वह्निमित्याद्यनुव्यवसायानुपपत्तिरिति तादृशविषयतास्वीकार आवश्यक इति । एवं च तादृशविषयतानिरूपकत्वमेवापत्तित्वं न तु जातिविशेषो मानाभावात् । आपत्त्यन्यज्ञाने तादृशविलक्षणविषयत्वाभावादेव आपादयामीत्यनुव्यवसायविरहोपपत्तिरिति ।

अत्रेदमवधेयम् । विधेयत्वमेवापत्तौ स्वीक्रियते, तथाचापत्तिनिरूपितविधेयत्वमेवापाद्यत्वम् । पर्वतो वह्निमान् पर्वतो घटवान् स्यादित्याकारकापत्तौ च घटस्यैव विधेयत्वं न तु वह्नेरतो न तादृशापत्त्यनन्तरं घटं जानामि न तु वह्निमित्याकारानुव्यवसायानुपपत्तिः । विधेयताया अनुमित्यादिसाधारण्येऽपि तत्रापत्तित्वाख्यजातिविशेषाभावान्न तदनन्तरमापादयामीत्यनुव्यवसायः । आपत्तित्वजातौ मानाभाव इति तु न वाच्यम् । आपादयामीत्यनुव्यवसायस्यैव मानत्वात् । न च तादृशानुव्यवसायस्य विषयताविशेषविषयकत्वेनाप्युपपत्तेर्जातिविशेषविषयकत्वे विवादप्रसङ्ग इति वाच्यम् । विषयभेदेनानन्तविषयताकल्पनापेक्षया तादृशजातिकल्पने लाघवस्यैव विवादभञ्जकत्वात् । न च भवन्मते तादृशबाधबुद्धिप्रतिबध्यतावच्छेदककोटौ तद्विधेयकविजातीयज्ञानभिन्नत्वं निवेशनीयम्, तद्विधेयकान्यत्वनिवेशेऽनुमित्याद्यसंग्रहापत्तेः, मम तु मते तादृशविषयताकान्यत्वमेव निवेश्यत इति लाघवमिति वाच्यम् । इच्छाधीनज्ञाने व्यभिचारवारणाय इच्छाया उत्तेजकत्वकल्पनापेक्षया लाघवेन जन्यतासम्बन्धेन बाधवदन्यत्वस्यैव निवेशितत्वात् तेनैवापत्तावपि व्यभिचारवारणात् तदन्यत्वस्यैवानिवेशात् कार्यतावच्छेदकलाघवेन विषयतासिद्धेः प्रतिबन्दिसहस्रकवलितत्वात् । एतेनानुमित्यादिसाधारणविलक्षणविषयताया आपत्त्यादिसाधारण्ये तत्स्थलीयप्रतिबन्धकतायाः प्रतिबध्यतावच्छेदककोटौ प्रत्यक्षान्यत्वं निवेशनीयमिति गौरवमित्यपि परास्तमिति कृतं पल्लवितेन ॥

इति श्रीहरिरामतर्कालङ्कारविरचितविषयतावाद-
(३६) वीचिः समाप्तः ।

अथ गदाधरभट्टाचार्यकृत-विषयतावाद(३७)वीचिः ।

श्रीगणेशायनमः ॥

बुद्धिर्नाम कश्चिदा(१)त्मविशेषगुणः । तद्व्यवस्थितिः,(२) घटमहं जानामीत्याकारकाऽऽपामरसाधारणानुभवबलादेव । सा च(३) सविषयिका(४), (५)उक्तधामग्राहकप्रतीत्या घटादिविषयकत्वेनैव तदवगाहनात्(६) । घटादिनिष्ठं तद्विषयत्वञ्च तत्प्रतियोगिकः सम्बन्धविशेषः । स च प्रतियोगित्वादिवत् स्वरूपादनतिरिक्त एव, क्लृप्तेन स्वरूपेणैवोपपत्तौ अतिरिक्तकल्पनाया अनवकाशात् । न च तादृशसम्बन्धस्य ज्ञानस्वरूपता विषयस्वरूपता वा स्वीक्रियते इत्यत्र विनिगमनाविरहादुभयस्यैव सम्बन्धता कल्प्या, इति तदपेक्षया लाघवात् सम्बन्धत्वेनातिरिक्तैकविषयताकल्पनमेवोचितमिति वाच्यम् । (७)विषयताया विषयस्वरूपत्वे विषयेण समं तस्या आधाराधेयभावानुपपत्तेः,(८) ज्ञानस्वरूपाया एव तस्या उपगमात् । अभेदेऽपि आधाराधेयभावोपगमे घटो ज्ञानविषयतावानितिवत् घटो घटवानित्यादिप्रतीत्यापत्तेः । न च विषयतात्वावच्छिन्ननिरूपिताधिकरणतैव घटादावुपेयते न घटत्वावच्छिन्नाधिकरणता इति नातिप्रसङ्ग इति वाच्यम् । तदवच्छिन्ननिरूपितत्वस्य तदाश्रयनिरूपितत्वविलक्षणस्य दुर्वचत्वात्(९) ।

अस्तुवा विनिगमनाविरहादुभयमेव(१०) विषयत्वं, तथापि तादृशोभयस्य क्लृप्तत्वात्, अतिरिक्तविषयतायास्तत्र(११)ज्ञानादिसम्बन्धतायाश्च कल्पनाऽपेक्षया तदुभयस्य ज्ञानादिसम्बन्धत्वकल्पने गौरवानवकाश इति सिद्धान्तानुयायिनः ।

नव्यास्तु-विषयत्वं पदार्थान्तरमेव, न तु स्वरूपसम्बन्धविशेषः । तथाहि--ज्ञानविषयताया ज्ञानात्मकत्वे ज्ञानाधिकरणकालस्यापि ज्ञान-

---

(१) गुणत्वव्याप्यवैजात्याश्रयः (२) विजातीयबुद्धिसिद्धिः । (३) बुद्धिः ।
(४) विषयतानिरूपिका ॥ (५) विषयतायां प्रमाणमाह उक्तेत्यादि ॥ बुद्धिसाधकप्रतीतिरेव प्रमाणमिति भावः । (६) ज्ञानविषयत्वात् ।
(७) विनिगमनाविरहं निराकरोति विषयताया इति ।
(८) अभेदस्य वृत्त्यनियामकत्वेन घटो ज्ञानविषयतावानितिप्रतीत्यनुपपत्तेरित्यर्थः । (९) तथाच घटो घटवानिति प्रतीत्यापत्तेर्दुर्वारत्वमिति भावः ।
(१०) ज्ञानविषयोभयस्वरूपमेव । (११) अतिरिक्तविषयतायाम् ।

विषयत्वापत्तिः, कालनिष्ठतत्सम्बन्धस्यापि तत्स्वरूपानतिरिक्तत्वात्(१)। एवं स्वाभावेन समं प्रतियोग्यनुयोगिभावरूपज्ञानसम्बन्धस्यापि स्वस्वरूपानतिरिक्ततया घटादिज्ञानस्य घटादिविषयकत्ववत् स्वाभावविषयकत्वस्यापत्तिः(२)। कालादौ ज्ञानादिसम्बन्धस्या(३)तिरिक्तत्वे च विनिगमनाविरहात् विषयनिष्ठतत्सम्बन्ध(४)स्याप्यतिरिक्तत्वसिद्धिर्निष्प्रत्यूहैव। एवं विषयताया ज्ञानस्वरूपत्वे घटपटावित्यादिसमूहालम्बनात्मकैकज्ञानीयघटपटादिरूपनानाविषयनिष्ठविषयतानामेकतया तादृशज्ञानानां घटत्वपटत्वाद्यवच्छिन्नपटघटादिनिष्ठविषयताकतया भ्रमत्वापत्तिः, तदवृत्तिधर्मावच्छिन्नतन्निष्ठविषयताशालिबुद्धेरेव भ्रमत्वात्(५)। तादृशज्ञानानन्तरं घटत्वेन पटं जानामीत्याकारकानुव्यवसायापत्तिश्च घटत्वावच्छिन्नपटनिष्ठविषयताकज्ञानस्यैव तादृशानुव्यवसायविषयत्वात्। न च तादृशसमूहालम्बनीयघटपटादिनिष्ठविषयताया ऐक्येऽपि सा विषयता घटत्वाद्यवच्छिन्नविषयतात्वेन घट एव वर्त्तते पटत्वाद्यवच्छिन्नविषयतात्वेन पट एव वर्त्तते, अतो न तादृशधियो भ्रमत्वापत्तिः, तदवृत्तिर्यो धर्मस्तदवच्छिन्नविषयतात्वेन तद्वृत्तिर्या विषयता तत्प्रतियोगिन एव ज्ञानस्य भ्रमत्वात्(६), न वा तादृशसमूहालम्बनानन्तरमुक्तानुव्यवसायप्रसङ्गः, घटत्वाद्यवच्छिन्नविषयतात्वेन पटादिवृत्तिविषयताप्रतियोगिन एव ज्ञानस्य तद्विषयत्वादिति वाच्यम्। यतः घटत्वाद्यवच्छिन्नविषयतात्वेन पटादिवृत्तित्वं हि तद्रूपावच्छिन्ननिरूपितपटादिनिष्ठाधिकरणताकत्वं, तादृशी चाधिकरणता यदि शुद्धविषयतात्वावच्छिन्ननिरूपिताधिकरणतातोऽनतिरिक्ता तदा तादृशज्ञानीयपटादिनिष्ठविषयतायामपि तादृशाधिकरणताकत्वमक्षतमेव, अति-

---

(१) घटानुयोगिकघटज्ञानप्रतियोगिकविषयत्वस्य कालानुयोगिकघटज्ञानप्रतियोगिककालिकसम्बन्धस्य च घटज्ञानस्वरूपतयैक्यात् घटज्ञानविषयतावान् काल इति प्रतीत्यापत्तिरिति भावः।

(२) घटज्ञानप्रतियोगिकविषयत्वस्य घटज्ञानप्रतियोगिकानुयोगित्वस्य च घटज्ञानस्वरूपतया ऐक्यात् घटज्ञानविषयतावान् घटज्ञानाभाव इति प्रतीत्यापत्तिरिति भावः। (३) कालिकानुयोगित्वादेः। (४) विषयत्वस्य।

(५) वस्तुविशिष्टविषयताकज्ञानत्वं भ्रमत्वम्, वैशिष्ट्यञ्च स्ववृत्तित्वस्वावृत्तिधर्मावच्छिन्नत्वोभयसम्बन्धेन।

(६) वस्तुविशिष्टवृत्तितावद्विषयताकज्ञानत्वं भ्रमत्वम्। वैशिष्ट्यञ्च स्वनिरूपितत्वस्वावृत्तिधर्मावच्छिन्नविषयतात्वावच्छिन्नत्वोभयसम्बन्धेन।

रिक्ता चेत्, तर्हि किमपराद्धमतिरिक्तविषयतया(१) इति ।

विषयताया विषयस्वरूपत्वे च घटत्वप्रकारकप्रमानिरूपितायाः पटत्वप्रकारकभ्रमनिरूपितायाश्च घटनिष्ठविषयताया ऐक्यप्रसङ्गेन घटत्वप्रकारकप्रमाया अपि भ्रमत्वापत्तिः ।

एवं घटवद्भूतलं घटभूतलसंयोगा इति ज्ञानयोरविशेषप्रसङ्गश्च, विषयाणां तदात्मकविषयतानाञ्च अविलक्षणत्वात् । (२)न च प्रथमज्ञाने सम्बन्धविधया भासमानस्य संयोगस्य सम्बन्धोऽपि (३)अधिको भासते न तु समूहालम्बनरूपे चरमज्ञाने, इत्यत एव(४) उभयोर्वैलक्षण्यमित्युपाध्यायमतं सम्यक् । संयोगादिप्रतियोगिकसम्बन्धमादायाऽपि समूहालम्बनसम्भवात्(५) । न च संयोगसंसर्गकविशिष्टबुद्धौ संयोगः स्वरूपत एव भासते न तु संयोगत्वेन, सखण्डपदार्थस्यापि सम्बन्धविधया स्वरूपतो भानाभ्युपगमात्, उक्तसमूहालम्बने(६) च संयोगत्वेन संयोगो भासते इति संयोगत्वरूपाधिकविषयभानाभानाभ्यामेव तयोर्विशेष इति वाच्यम् । एवमपि घटवद्भूतलं संयोगश्च घटभूतलसंयोगा इति ज्ञानयोर्विशेषानिर्वाहात् । घटवद्भूतलमिति ज्ञानस्य घटप्रकारकत्वमेव घटविशेष्यकोक्तसमूहालम्बनात् विशेष इति चेत् । घटप्रकारकत्वं हि घटनिष्ठप्रकारताप्रतियोगित्वं, घटविशेष्यकत्वञ्च घटनिष्ठविशेष्यताप्रतियोगित्वं, तत्र च ज्ञानीयप्रकारताविशेष्यते यदि प्रकारविशेष्याभ्यामनतिरिक्ते तदा उक्तविशिष्टबुद्धेरपि घटविशेष्यकत्वम् उक्तसमूहालम्बनस्यापि घटप्रकारकत्वं दुर्वारमेव, घटात्मकयोस्तन्निष्ठप्रकारताविशेष्यतयोर्भवन्मतेऽभिन्नत्वात् । यदि च ते अतिरिक्ते तदा सिद्धं नः समीहितं प्रकारताविशेष्यतयोर्विषयतात्मकत्वात् ।

यत्तु भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वं तादृशवैशिष्ट्यानुयोगित्वं च विशेष्यत्वं न विषयतारूपमिति(७) ।

तदसत् । उक्तसमूहालम्बनस्यापि घटप्रतियोगिकवैशिष्ट्यविषयक-

---

(१) घटत्वावच्छिन्नविषयतात्वावच्छिन्नवृत्तित्वविषयतात्वावच्छिन्नवृत्तित्वयोरैक्ये उक्तदोषतादवस्थ्यम्, भिन्नत्वे च विषयताया एव भिन्नत्वमस्तु इति भावः ।

(२) नचेत्यस्य सम्यगित्यनेन सम्बन्धः । (३) प्रतियोगित्वानुयोगित्वरूपः ।

(४) संयोगप्रतियोगिकसम्बन्धभानाभानाभ्यामेव ।

(५) तथाच घटवद्भूतलं घटभूतलसंयोगप्रतियोगित्वानुयोगित्वानीति ज्ञानयोरविशेषप्रसङ्ग इति भावः । (६) घटभूतलसंयोगा इति ज्ञाने ।

(७) प्रतियोगित्वानुयोगित्वरूपप्रकारताविशेष्ययोरतिरिक्तत्वे सिद्धेऽपि न विषयतायामतिरिक्तत्वसिद्धिरित्याशयः ।

कतया घटप्रकारकत्वापत्तः, संयोगादिरूपव्यधिकरणसम्बन्धेन द्रव्यत्वादिभ्रमस्य द्रव्यत्वादिप्रकारकत्वानुपपत्तेः, भूतले घट इत्यादिज्ञानस्य भूतलाद्यनुयोगिकसंयोगादिविषयकतया भूतलादिविशेष्यकत्वापत्तेः, गुणादौ संयोगादिसम्बन्धेन घटादिभ्रमस्य गुणादिविशेष्यकत्वानुपपत्तेश्च ।

अथ वास्तवतादृशवैशिष्ट्यप्रतियोगित्वानुयोगित्वे न प्रकारताविशेष्यत्वे येन उक्तदोषाणामवसरः स्यात्, अपि तु वैशिष्ट्यप्रतियोगितया तदनुयोगितया च भासमानत्वमेव प्रकारत्वं विशेष्यत्वञ्च इति चेन्न ।

प्रतियोगितयेत्यादौ तृतीयार्थस्य दुर्वचत्वात्, भासमानत्वस्य ज्ञानविषयतात्मकतया प्रकारताविशेष्यतयोर्विषयतात्वसिद्धेश्च ।

यत्तु विषयत्वं न केवलज्ञानस्वरूपं नापि केवलविषयस्वरूपमपि तु ज्ञानविषयोभयस्वरूपमतो न प्रागुक्तदोषाणामवसरः, तथाहि घटपटावित्यादिसमूहालम्बनीयघटादिनिष्ठतज्ज्ञानघटाद्युभयात्मकघटत्वाद्यवच्छिन्नविषयतायाः पटादिनिष्ठतज्ज्ञानपटाद्युभयात्मकपटत्वाद्यवच्छिन्नविषयतानात्मकतया न तादृशज्ञानस्य भ्रमत्वापत्तिः, न वा उपदर्शितविशिष्टधीसमूहालम्बनयोरविशेषप्रसङ्गः, तादृशसमूहालम्बनस्य तथाविधविशिष्टबुद्धिनिरूपिततज्ज्ञानघटोभयात्मकप्रकारताऽनिरूपकत्वेन विषयतावैलक्षण्यस्य सत्त्वात् इति ।

तदप्यसत् । घटपटावित्येतादृशसमूहालम्बनात्मकज्ञानस्य तज्ज्ञानपटोभयात्मकपटत्वावच्छिन्नपटनिष्ठविषयताकत्वेन घटत्वावच्छिन्नघटनिष्ठतज्ज्ञानघटोभयात्मकविषयताकत्वेन च घटनिष्ठा या पटत्वावच्छिन्ना तज्ज्ञानरूपा विषयता तन्निरूपकत्वेन भ्रमत्वापत्तेर्दुर्वारत्वात् ।

अथ तद्धर्मावच्छिन्नविषयतात्वं तज्ज्ञानतत्तद्विषययोर्व्यासज्यवृत्ति उपेयते, एवञ्च तद्धर्मावच्छिन्नविषयतात्वेन तद्धर्मानधिकरणवृत्तिर्या विषयता तत्प्रतियोगित्वमेव भ्रमत्वम्, उपदर्शितसमूहालम्बने च पटत्वाद्यवच्छिन्नविषयतात्वस्य तज्ज्ञानपटाद्युभयपर्याप्ततया तेन रूपेण तदुभयात्मकविषयता न घटादिवृत्तिः, घटादेस्तद्रूपाश्रयपटाद्यात्मकविषयत्वासम्बन्धित्वात्, स्वाश्रययावद्व्यक्तिसम्बन्धिन एव व्यासज्यवृत्तिधर्मपुरस्कारेण तदाश्रयत्वात्, इति न तस्य भ्रमत्वापत्तिः इति चेत् ।

पटत्वाद्यवच्छिन्नविषयतात्वं स्वरूपादतिरिक्तं न वा ? आद्ये किमपराद्धं तद्रूपावच्छिन्नातिरिक्तविषयतया, अन्त्ये च तस्य व्यासज्यवृत्तित्वानुपपत्तिः तत्तत्स्वरूपस्य प्रत्येकविश्रान्तत्वात् ।

एवं तद्रूपेण(१) घटादिवृत्तित्वं विषयतात्वेन घटादिवृत्तित्वादति-रिक्तं न वा ? आद्ये किमपराद्धं नतिरिक्तविषयतया । अन्त्ये च तद्रूपेण घटादिवृत्तित्वं तादृशज्ञानीयस्वात्मकविषयताया अक्षतमेव ।

एवं जातिमान् घट इत्यादौ घटत्वाद्येकविषयवृत्त्यैकज्ञानीयविषयताया जातित्वाद्यवच्छिन्नत्वतदनवच्छिन्नत्वाभ्यां द्वैविध्यमनुपपन्नं, ज्ञानस्यविषयस्य च द्वैविध्यविरहात् तथाच जातिमानित्याद्याकारकैकविधघटत्वादिविषयताशालिज्ञानात् तादृशज्ञानस्य विलक्षणविषयताशालित्वानुपपत्त्या विलक्षणाकारकतानुपपत्तिः, तस्मात् विषयत्वमतिरिक्तमेव ।

अथ विषयतावत् विषयेऽनुयोगिताऽऽख्यस्तत्सम्बन्धो ज्ञाने प्रतियोगिताऽऽख्यस्तत्सम्बन्धश्च तुल्ययुक्त्याऽतिरिक्त एव उपगन्तव्यः । स्वरूपानतिरिक्तत्वे(२) ज्ञानविषयनिष्ठयोस्तत्सम्बन्धयोरविलक्षणतापत्त्या ज्ञानस्येव विषयस्यापि सविषयकत्वं विषयवत् ज्ञानस्यापि तद्विषयत्वमापद्येत । एवं विषयताया ज्ञानघटादिनिष्ठेन सम्बन्धेन समं काऽलाभावादिनिष्ठसम्बन्धस्यापि(३) अनतिरिक्तत्वेन वैलक्षण्यानुपपत्त्या कालाऽभावादीनामपि घटादिविषयकत्वापत्तिः, घटज्ञानादिविषयकत्वापत्तिश्च । एवं तुल्ययुक्त्या तादृशसम्बन्धस्यापि सम्बन्धः तत्सम्बन्धादिरपि अतिरिक्तः स्वीकरणीय इत्यनवस्थितसम्बन्धधाराकल्पनप्रसङ्गः । एवं विषयतासम्बन्धेऽपि ज्ञानस्य तदीयतानियामको निरूप्यत्वाऽऽख्यसम्बन्धविशेषः तुल्ययुक्त्याऽतिरिक्तः स्वीकरणीयः एवं तत्सम्बन्धादिरपि इति तत्रापि सम्बन्धधाराऽनवस्थापत्तिः इति चेत् ।

का क्षतिः, न हि प्रामाणिकानवस्थाया दूषणावहत्वम् ।

विषयतावत् विषयित्वरूपज्ञानानुयोगिकविषयसम्बन्धोऽपि अतिरिक्त एव, न तु विषयताप्रतियोगित्वमेव विषयित्वम्, विषयित्वमेवातिरिक्तं तत्प्रतियोगित्वमेव विषयत्वमित्यस्यापि वक्तुं शक्यतया द्वयोरेवातिरिक्ततासिद्धेरिति ।

विषयता च विषयभेदात् भिद्यते अन्यथा घटपटावित्यादिसमूहालम्बनीयघटपटादिनिष्ठविषयताया ऐक्ये पूर्वोक्तयुक्त्या तादृशज्ञानस्य भ्रमत्वापत्तेः(४) घटाद्येकैकविषयकज्ञानीयैकैकवृत्तिविषयतातः समूहालम्बने नानाविषयवृत्त्यतिरिक्तैकविषयताकल्पनप्रसङ्गेन

---

(१) पटत्वावच्छिन्नविषयतात्वेन । (२) विषयतानतिरिक्तत्वे ।
(३) विषयताप्रतियोगिककालिकानुयोगित्वादिरूपस्य ।
(४) तदवृत्तिधर्मावच्छिन्नतन्निष्ठविषयताशालिज्ञानत्व भ्रमत्वात् ।

गौरवाच्च, अस्मन्मते समूहालम्बने क्लृप्तप्रत्येकज्ञानीयविषयतानामेवोपगमात् ज्ञानभेदेन विषयताभेदे मानाभावात् ।

एतेन-घट इत्यादिविशिष्टबुद्धेर्विशेष्यविशेषणभावापन्नेषु घटघटत्वादिषु एकैव विषयता, न तु विशेष्यनिष्ठा विशेषणनिष्ठा च विषयता भिन्ना-इति मतं हेयमेव, विशेष्यनिष्ठविशेष्यतात्मकविषयतया समं विशेषणनिष्ठप्रकारतात्मकविषयताया अभेदस्यासम्भवदुक्तिकत्वात् तथा सति(१) तादृशबुद्धौ घटप्रकारकत्वघटत्वविशेष्यकत्वयोरापत्तेः । न च प्रकारताविशेष्यतयोर्विषयतारूपतायामेवेयमनुपपत्तिः, सैव(२) न, अपि तु पदार्थान्तरे एव ते,(३) तयोर्विषयतात्वे मानाभावादिति वाच्यम् । विषयेऽतिरिक्तविषयतानां तत्र च विषयतात्वस्य कल्पनामपेक्ष्य विषयवृत्तित्वेन क्लृप्तानां प्रकारताविशेष्यतानां विषयतात्वकल्पनस्यैव न्याय्यत्वात् ।

यत्तु--निर्विकल्पकीया प्रकारताविशेष्यताभिन्नत्वेनोभयमतसिद्धा या विषयता विशिष्टज्ञानस्यापि सैव विषये सम्बन्धः, तत एव च विशिष्टबुद्धेरपि सविषयकत्वनिर्वाहोऽस्तु किं प्रकारतादीनां विषयतात्वोपगमेन, प्रकारतादीनां विषयतानात्मकत्वेऽपि तद्वैलक्षण्यस्य ज्ञानवैलक्षण्यसम्पादकत्वे(४) न कश्चिद्विरोध-इत्यपि हेयमेव । प्रकारताविशेष्यतयोर्विषयतात्वानुपगमे व्याप्यपक्षविशेष्यकपरामर्शयो(५)र्व्याप्यविषयतानिरूपितपक्षविषयताशालित्वेनानुगमय्याऽनुमितिहेतुत्वासम्भवात् कारणताबाहुल्यापत्तेः निर्विकल्पकीयविषयतायाः परस्परं निरूप्यनिरूपकभावविरहात् । एवं संसर्गज्ञानस्यानुपनायकतामते उपनीतभानं प्रति उपनायकज्ञानस्य तत्प्रकारकत्वेन तद्विशेष्यकत्वेन च हेतुताद्वयप्रसङ्गः, मन्मते तु प्रकारताविशेष्यते संसर्गताभिन्नविषयतात्वेनानुगमय्य एकहेतुताकल्पनसम्भवात् । एवं निर्विकल्पकीयविषयतायां, विशिष्टबुद्धावुपगमे घटत्वादिनिर्विकल्पकादिव जातित्वादिना घटत्वादिज्ञानादपि स्वरूपतो घटत्वादिप्रकारिकाया घट इत्याद्याकारकविशिष्टबुद्धेरापत्तिः । न च स्वरूपतस्तद्विशिष्टबुद्धौ तद्विशेष्यकतज्ज्ञानत्वेन हेतुत्वात् नायं दोष इति वाच्यम् । तथासति जातिर्घटश्चेत्यादिज्ञानात् घट इत्यादिविशिष्टबुद्ध्यनुपपत्तेरिति ॥

---

(१) अभिन्नत्वे । (२) विषयतारूपतैव । (३) प्रकारताविशेष्यते ।
(४) विशिष्टबुद्धेर्निर्विकल्पकवैलक्षण्यप्रयोजकत्वे ।
(५) वह्निव्याप्यधूमः पर्वते, वह्निव्याप्यधूमवान् पर्वत इति ज्ञानयोः ।

यत्तु— विशिष्टबुद्धिविषयता विशेष्यमात्रे न तु विशेषणेऽपि माना-भावात् । न च विनिगमनाविरहः, घट इत्यादिज्ञानानन्तरं घटं जानामीत्याद्यनुव्यवसायेन घटरूपविशेष्येण समं ज्ञानस्य सम्बन्धावगाहनात् घटादिरूपविशेष्ये ज्ञानस्य विषयतात्मकसम्बन्धस्यावश्योपेयत्वात् । घटत्वं जानामीत्याद्यनुव्यवसायस्तु तत्राखिन्न एव, तस्य घटत्वत्वविशिष्टवैशिष्ट्यावगाहित्वेन घटत्वत्वप्रकारकव्यवसायानन्तरमेव तत्सम्भवात्(१), घट इत्यादिव्यवसायस्य च स्वरूपत एव घटत्वादिप्रकारकतया घटत्वत्वाद्यप्रकारकत्वात् । ज्ञानांशे स्वरूपतो घटत्वादिविशेषणकोऽनुव्यवसायोऽपि न तत्र सम्भवति, ससम्बन्धिकपदार्थप्रत्यक्षस्य किञ्चिद्विशिष्टसम्बन्धिवैशिष्ट्यावगाहित्वनियमात् । न चायं घट इत्यादिव्यवसायानन्तरं घटत्वेनेमं जानामीत्याद्याकारकानुव्यवसायेन घटत्वादिरूपविशेषणेनापि समं ज्ञानस्य सम्बन्धावगाहनात् (२)तत्रापि विशिष्टधीविषताऽभ्युपगम आवश्यक इति वाच्यम् । यतस्तत्र ज्ञानान्वयिवैशिष्ट्यं न तृतीयार्थः, अपि तु द्वितीयार्थविषयतान्वयिघटत्वादिप्रकारकत्वम् । न च विषयतानिष्ठं घटत्वादिप्रकारकत्वं घटत्वादिनिष्ठप्रकारतानिरूपकत्वं तदभ्युपगमे च विशेषणीभूतघटत्वादेर्विशिष्टधीविषयतासिद्धिर्निष्प्रत्यूहैव, प्रकारताया विषयताविशेषात्मकत्वादिति वाच्यम् । यतो विषयतानिष्ठं घटत्वादिप्रकारकत्वं न घटत्वादिनिष्ठप्रकारताख्यविषयतानिरूपकत्वमपि तु घटत्वाद्यवच्छिन्नत्वम्, अवच्छिन्नत्वञ्च प्रतियोगित्वकारणत्वाधिकरणत्वादाविव विषयतादावपि घटत्वादेः सम्बन्धविशेष एव, स च अतिरिक्तोऽनतिरिक्तो वेत्यन्यदेतत् ।

इयांस्तु विशेषः—प्रतियोगित्वादावन्यूनानतिप्रसक्तत्वमवच्छेद्यावच्छेदकभावे तन्त्रं, न तु विषयतास्थले, व्यधिकरणधर्मस्यापि विषयतावच्छेदकत्वात् । विशेषणनिष्ठप्रकारतानिरूपितत्वमेव वा विषयतानिष्ठं तत्प्रकारकत्वम् । अस्तु वा विशेषणे विषयतानिरूपितः प्रकारताख्यधर्म्मविशेषः, तथापि तस्य विषयतात्वे ज्ञानप्रतियोगिकत्वे च मानाभाव— इत्यतिरिक्तविषयतावादिनां प्राचीनैकदेशिनां मतं, तदपि अनुपादेयमेव । विशेषणस्य विशिष्टज्ञानाविषयत्वे तद्धर्म्मविशिष्टज्ञानानन्तरं तद्धर्म्मविशिष्टज्ञानानुपपत्तेः, विशिष्टबुद्धौ विशेषणविषयकज्ञानस्य हेतुत्वात्, भवन्मते तद्विशिष्टज्ञानस्य तद्विषयकत्वाभावेन तदहेतुत्वात् ।

(१) विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानस्य कारणत्वात् । (२) विशेषणेऽपि ।

एवं विशिष्टज्ञानात् विशेषणविषयकोपनीतभानस्याप्यनुपपत्तिः, तदुपनीतभाने तद्विषयकज्ञानस्यैव हेतुत्वात्। एतादृशयुक्त्या विशेषणस्य विशिष्टधीविषयताया आवश्यकत्वे च उक्तलाघवात् तन्निष्ठप्रकारताया एव विषयतात्वसिद्धिरित्यवधेयम् ।

अथ तद्विशिष्टबुद्धौ तदुपनीतभाने च स्ववृत्तित्वस्वप्रकारकत्वान्यतरसम्बन्धेन तद्विशिष्टा या विषयता तच्छालिज्ञानत्वेनैव हेतुता वाच्या(१), इत्थञ्च विशेषणस्य विशिष्टज्ञानाविषयत्वेऽपि तद्विशिष्टज्ञानात् तद्विशिष्टज्ञानान्तरस्य तदुपनीतभानस्य च नानुपपत्तिः। न चोपदर्शितकारणतावच्छेदककोटावन्यतरसम्बन्धेन तद्वैशिष्ट्यस्य विषयतायां निवेशे अन्यतरत्वघटकभेदद्वये मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण कारणताबाहुल्यमिति वाच्यम् । यतस्तादृशान्यतरस्य अन्यतरत्वेन न सम्बन्धता, अपि तु स्वरूपत एव। न चैवमप्यननुगमात् कारणताधिक्यं व्यभिचारश्चेति वाच्यम् । सम्बन्धाननुगमेऽपि तावन्निष्ठसम्बन्धताया ऐक्योपगमेन तद्दोषानवकाशात्। अत एव सम्बन्धाननुगमो न दोषायेति प्राचां प्रवादोऽपि। न चैवमपि स्ववृत्तित्वस्वप्रकारकत्वान्यतरसम्बन्धेन तद्विशिष्टविषयतामपेक्ष्य स्ववृत्तित्वसम्बन्धेन तद्विशिष्टविषयताया लाघवेन तद्विशिष्टबुद्ध्यादिजनकतावच्छेदकत्वसिद्धेर्निष्प्रत्यूहतया विशेषणस्यापि विशिष्टधीविषयत्वं दुर्वारमिति वाच्यम्। प्रकारतायां विषयतात्वोपगमे घटत्वादिरूपेण घटादिविषयकस्मरणादौ तथाविधज्ञानस्य घटत्वादिप्रकारतानिरूपितघटादिनिष्ठविशेष्यताशालिज्ञानत्वेन घटादिनिष्ठविशेष्यतानिरूपितघटत्वादिप्रकारताशालिज्ञानत्वेन वा हेतुत्वे गौरवात्, अस्मन्मते च नैतादृशविनिगमनाविरहावकाशः, विशेष्यतानिरूपितप्रकारताया, ज्ञानप्रतियोगिकत्वाभावेन परम्परासम्बन्धेनैव(२) तस्या जनकतावच्छेदकत्वस्योपगन्तव्यतया तदपेक्षया प्रकारतानिरूपितविशेष्यतायाः प्रतियोगितासम्बन्धेन जनकतावच्छेदकत्वे लाघवस्यैव विनिगमकत्वात् ।

नैवम्, उक्तविशेषणज्ञानादिकारणतावच्छेदकलाघवेन प्रकारतायां विषयतात्वस्य ज्ञानप्रतियोगिकत्वस्य च सिद्धावेव दर्शितस्मरणादिहेतुतायां विनिगमनाविरहावतारेण गौरवावतारात्, तादृशगौरवस्य फलमुखत्वेनादोषत्वात्, यत्सिद्धिमुपजीव्य गौरवावतारस्तत्सिद्धौ तस्य

---

(१) निर्विकल्पकात् विशिष्टबुद्ध्युपपत्त्यर्थं प्रथमसम्बन्धनिवेशः ।

(२) स्वनिरूपकविशेष्यताप्रतियोगित्वसम्बन्धेन ।

विरोधित्वासम्भवात् । एवं घटवत् भूतलमित्यादिविशिष्टबुद्ध्यनन्तरं भूतलं जानामीत्यनुव्यवसायवत् घटं जानामीत्याद्याकारकस्य ज्ञाने घटादिसम्बन्धावगाहिनोऽनुव्यवसायस्यापि सर्वानुभवसिद्धतया विशेषणेऽपि विषयतात्मकज्ञानसम्बन्ध आवश्यकः । न च तत्र स्वप्रकारकविषयताप्रतियोगित्वरूपपरम्परासम्बन्ध एव ज्ञाने घटस्यानुव्यवसायेन गृह्यते इति वाच्यम् । विशेषणीभूतघटादिरेव तादृशविशिष्टबुद्धिविषयः, न तु भूतलादिरूपविशेष्यं, भूतलं जानामीत्याद्यनुव्यवसायेन तु स्वविशेष्यकविषयताप्रतियोगित्वरूपभूतलादिनिरूपितपरम्परासम्बन्ध एव ज्ञानादौ गृह्यते इत्यस्यापि सुवचतया विनिगमनाविरहेण विशेषणविशेष्ययोरुभयोरेव विशिष्टधीविषयतासिद्धेर्निराबाधत्वात् इत्याहुः ॥

विशेष्यताप्रकारतावत् संसर्गत्वस्यापि विषयताविशेषात्मकत्वात् संसर्गस्यापि विशिष्टधीविषयत्वम् ॥

अत्रोच्छृङ्खलाः-संसर्गस्य विशिष्टधीविषयत्वे मानाभावः, घट इत्यादिज्ञानानन्तरं समवायं जानामीत्याद्याकारकानुव्यवसायस्यासिद्धत्वात् तादृशानुव्यवसायस्य समवायत्वविशिष्टवैशिष्ट्यावगाहितया समवायत्वप्रकारकज्ञानानन्तरमेव तत्सम्भवात् ॥

अथ विशिष्टबुद्धेः संसर्गानवगाहित्वे बाधबुद्धिप्रतिबन्धकतायाः संसर्गविशेषनियन्त्रितत्वासम्भवात् कपालधर्म्मिकसंयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकघटाद्यभाववत्तानिश्चयस्य समानधर्म्मितावच्छेदकं किञ्चिदेव घटादिप्रकारकं ज्ञानं प्रतिबध्यं न तु सर्वमित्यनुभवव्याकोपः । न च बाधबुद्धिप्रतिबन्धकतायाः सम्बन्धविशेषनियन्त्रितत्वानुरोधेन तत्प्रतिबध्यसधर्म्मितावच्छेदकबुद्धेः सम्बन्धावगाहित्वसिद्धावपि निर्धर्मितावच्छेदकबुद्धेस्तथात्वं नियुक्तिकमिति वाच्यम् । निर्धर्म्मितावच्छेदकविशिष्टबुद्धेरपि ग्राह्यधर्म्मिकावृत्तित्वज्ञानप्रतिबध्यतया अवृत्तित्वज्ञानप्रतिबन्धकतायाः सम्बन्धविशेषनियन्त्रितत्वानुरोधेन तत्रापि सम्बन्धावगाहित्वस्यावश्यकत्वात् । एवं प्रमात्वभ्रमत्वयोः सम्बन्धविशेषनियन्त्रितत्वानुरोधेनापि सकलविशिष्टबुद्धीनां सम्बन्धावगाहित्वमावश्यकम् , तयोस्तथात्वानुपगमे कपालविशेष्यकं घटादिप्रकारकं किञ्चिदेव ज्ञानं प्रमा, तथाविधञ्च किञ्चिदेव ज्ञानं भ्रम इति प्रतीतिर्न स्यात् , अपि तु कपालादेः समवायेन घटादिमत्तया तथाविधं सकलमेव ज्ञानं प्रमा स्यात् , संयोगादिसम्बन्धावच्छिन्नघटाद्यभाववत्तया च तथाविधं सकलमेव ज्ञानं भ्रमः स्यात् इति चेन्न ।

विशिष्टबुद्धेः सम्बन्धविषयकत्वाभ्युपगमेऽपि तटस्थेन(१) संसर्गेण समं प्रकारताया अवच्छेद्यावच्छेदकभावोपगमात्, बाधबुद्धिप्रतिबध्यतावच्छेदकस्य प्रमात्वभ्रमत्वयोश्च सम्बन्धविशेषावच्छिन्नप्रकारताघटितत्वादुक्तानुपपत्तिवारणसम्भवात् । न च प्रकारतानिरूपितसांसर्गिकविषयताश्रयत्वमेव संसर्गस्य प्रकारतावच्छेदकत्वमन्यस्य दुर्वचत्वादिति संसर्गस्य विशिष्टधीविषयत्वसिद्धिर्निष्प्रत्यूहैवेति वाच्यम् । प्रतियोगित्वादिनिरूपिताया इव प्रकारतानिरूपिताया अपि संसर्गनिष्ठावच्छेदकतायाः स्वरूपसम्बन्धरूपत्वात् पदार्थान्तररूपत्वाद्वा विषयताविशेषात्मकत्वेऽपि तद्रूपतायास्तुल्यत्वात् तस्या विषयतात्वस्य निर्युक्तिकत्वात । तादृशावच्छेदकताविशेष एव च संसर्गतापदार्थः, न तु विषयताविशेषः ।

अथ संसर्गस्य विशिष्टबुद्ध्यविषयत्वे तत्संसर्गकज्ञानात् तद्विशिष्टबुद्धितदुपनीतभानानुदयप्रसङ्गः । न च ततस्तयोरुत्पादस्यानुभविकत्वाभावादिष्टापत्तिः, तथासति स्वरूपतो मनस्त्वादिविशिष्टवाचकमनःपदाधीनशाब्दबोधानुपपत्तेः, तथाहि मनःपदात् स्वरूपतो मनस्त्वप्रकारिका शाब्दधीर्भविष्यति, तत्र च स्वरूपतस्तत्प्रकारकशक्तिज्ञानपदार्थोपस्थित्यादिः कारणं जातित्वादिना तत्प्रकारकशक्तिज्ञानादितो जातित्वादिनैव तत्प्रकारकशाब्दबोधोदयात्, अन्यथा कदाचित् जातित्वादिना तत्प्रकारकः कदाचित् स्वरूपतस्तत्प्रकारकः शाब्दबोध उत्पद्यते इत्यत्र नियामकाभावप्रसङ्गात् । स्वरूपतस्तत्प्रकारकशक्तिज्ञानपदार्थोपस्थित्यादिकञ्च स्वरूपतस्तद्विषयकज्ञानं विना न सम्भवति, स्वरूपतस्तद्विशिष्टबुद्धौ स्वरूपतस्तद्विषयकज्ञानस्य हेतुत्वात् । स्वरूपतो मनस्त्वादिविषयकञ्च निर्विकल्पकज्ञानं न सम्भवति, अतीन्द्रियस्य निर्विकल्पकावेद्यत्वात् निर्विकल्पकस्यालौकिकत्वनियमात् । स्वरूपतस्तत्प्रकारकज्ञानस्यापेक्षणे च तत्रापि तादृशज्ञानस्यापेक्षणीयतया अनवस्थाप्रसङ्गः, अस्मन्मते च स्वरूपतः संसर्गविधया किञ्चिज्ज्ञाने मनस्त्वादिभानं स्वीकृत्य तन्मूलकात् स्वरूपतस्तत्प्रकारकशक्त्यादिज्ञानात् तथाविधशाब्दधिय उपपत्तिः । न चैवं स्वरूपतो निखिलजातिसंसर्गकज्ञानात् स्वरूपतो निखिलजातिप्रकारकज्ञानसम्भवेन सार्वज्ञापत्तिरिति वाच्यम् । फलबलाद् कस्यचिदेव पदार्थस्य कदाचित्संसर्गविधया भानोपगमेन स्वरूपतः संसर्गविधया निखिलजातिभानस्य कदाप्यनभ्युपगमात् इति चेन्न ।

---

(१) विशिष्टबुद्ध्यविषयेण ।

तत्संसर्गकज्ञानस्य वह्निविशिष्टबुद्ध्याद्यजनकत्वेऽपि स्वरूपतो मनस्त्वप्रकारकस्मरणमूलकतथाविधशक्त्यादिज्ञःनास्तथाविधशाब्दबोधनिर्वाहात्। नच स्वरूपतस्तत्प्रकारकस्मरणे स्वरूपतस्तत्प्रकारकानुभवस्यापेक्षिततया तदसम्भवेन तदसम्भव इति वाच्यम्। भवान्तरप्रभवानुभवाहितसंस्कारादेव तथाविधस्मरणोपपत्तेः। नच जन्मान्तरीयतथानुभवेऽपि पर्यनुयोगतादवस्थ्यम्, तत्र तत्प्राक्तनजन्मजाततथाविधानुभवाहितसंस्कारमूलकस्मरणस्य गतित्वात्, जन्मप्रवाहस्यानादितया तादृशानवस्थाया अकिञ्चित्करत्वात्।

अथवा जातित्वादिना मनस्त्वप्रकारकैतद्धर्मीयानुभवप्रभवसंस्कारादेव स्वरूपतस्तत्प्रकारकस्मरणमुत्पद्यते सामान्यतस्तत्प्रकारकस्मरणे तत्प्रकारकत्वेनैव ज्ञानसंस्कारयोः कारणत्वात्, स्वरूपतस्तत्प्रकारकस्मृतौ स्वरूपतस्तत्प्रकारकत्वेन तयोर्हेतुताया अप्रामाणिकत्वात्। नचैवं जातित्वादिना मनस्त्वादिप्रकारकस्मरणमात्रस्यैव स्वरूपतस्तत्प्रकारकतापत्तिरिति केवलं जातिमानित्याकारकस्य स्मरणस्य विलोपप्रसङ्ग इति वाच्यम्। स्वरूपतस्तत्प्रकारकस्मरणे उद्बोधकविशेषस्यैव नियामकत्वात् मन इत्याद्याकारकस्मरणं यत्रानुभवसिद्धं तत्रैव तादृशोद्बोधकस्य फलबलेन कल्पनीयत्वात्, अन्यथा जातित्वेन स्वरूपतो मनस्त्वप्रकारकक्रमिकानुभवद्वयाहितसंस्कारवतः पुंसो भवन्मतेऽपि स्वरूपतो मनस्त्वाप्रकारकजातिमानित्याकारकमनस्त्वप्रकारकस्मरणविलोपापत्तिः। न च जातित्वेन मनस्त्वप्रकारकसंस्कारात्स्वरूपतो मनस्त्वप्रकारकस्मरणं न सम्भवति तत्र मनस्त्वांशे जातित्वभाने बाधकाभावादिति वाच्यम्। तदंशे जातित्वभानेऽपि जातिमन्मनश्चेत्याकारकस्य तदंशे द्विविधविषयताशालिनस्स्मरणस्य सम्भवात्॥

वस्तुतस्तु जातित्वांशे मोषदशायां तथाविधसंस्काराम्मन इत्याकारकस्मरणं निराबाधमेव। तदंशे मोषश्च तद्भासकोद्बोधकासमवधानम्। न च किञ्चिद्रूपेण तत्प्रकारकसंस्कारादपि स्वरूपतस्तत्प्रकारकस्मरणस्य मोषवशादुत्पत्तौ जातित्वादिसामान्यप्रत्यासत्तिजन्यतत्प्रकारकनिखिलजातिविषयकानुभवाहितसंस्काराज्जातित्वाद्यंशे मोषदशायां स्वरूपतो निखिलजातिप्रकारकस्मरणसम्भवात् सार्वज्ञापत्तिरिति वाच्यम्। उद्बोधकस्य फलबलकल्पनीयतया जातित्वाद्यंशे मोषदशायां निखिलजातिभासकोद्बोधकस्याकल्पनेनापत्तिविरहात् इत्यलं पल्लवितेन॥

इत्थं च विशिष्टसंविदस्सम्बन्धानवलम्बिता न कथंचिदपि कञ्चिदनिर्वाहमावहन्तीति युक्तितन्त्रं न तन्त्रसिद्धान्तविरोधः प्रतिरुणद्धि॥

केचित्तु—विशिष्टसंसर्गबुद्धौ विशिष्टसंसर्गघटकविशेषणीयसंसर्गतायां प्रकारतात्वं तथाविधविशेष्यीयसंसर्गतायां विशेष्यतात्वमावश्यकम्, अन्यथा कम्बुग्रीवादिमत्त्वाद्यवच्छिन्नत्वरूपेण प्रतियोगितासंसर्गककम्बुग्रीवादिमान्नास्तीत्याद्याकारकबुद्धेर्भ्रमत्वानुपपत्तेः, तथाहि—तादृशज्ञानमभावांशे प्रतियोगितासम्बन्धेन न घटस्य भ्रमः, तेन सम्बन्धेनाभावस्य घटवत्त्वात्, नापि कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगितासम्बन्धेन तदंशे तस्य भ्रमः, विशिष्टसम्बन्धाप्रसिद्धेः, नापि स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन तदंशे कम्बुग्रीवादिमत्त्वस्य भ्रमः, तदंशे तस्याप्रकारत्वात्, तथासति तादृशधर्मविशिष्टत्वेनाभावोल्लेखापत्तेः। अत एव प्रतियोगितावच्छेदकत्वसम्बन्धेन तादृशधर्मांशेऽभावस्य भ्रम इत्यपि न, तद्धर्मांशेऽभावस्याप्रकारत्वात्। नापि प्रतियोगित्वांशे कम्बुग्रीवादिमत्त्वावच्छिन्नत्वस्य प्रतियोगितावच्छेदकत्वांशे कम्बुग्रीवादिमत्त्वस्य वा भ्रमः, तस्य संसर्गघटकतयाऽप्रकारत्वादिति। तस्मात्संसर्गताविशेषे प्रकारतात्वविशेष्यतात्वे स्वीकृत्य पश्चात्प्रक्षिप्तपक्ष एवापेक्षणीय इति संसर्गस्यापि विशिष्टधीविषयतासिद्धिः प्रकारतात्वादेर्विषयतात्वव्याप्यत्वादित्याहुः॥

तदपि न शोभनतया प्रतिभाति, उक्तबुद्धौ प्रतियोगिविशेषणतापन्नस्य कम्बुग्रीवादिमत्त्वादेरभावांशे प्रकारतोपगमे क्षतिविरहेण तदंशे तद्भ्रमत्वस्यैव सम्भवात्, स्वातन्त्र्येण प्रकारतास्थल एव विशेषणत्वेन विशेष्योल्लेखात्। अत एव दण्डी चैत्रः कुण्डलीत्यादिविशिष्टानुयोगिकवैशिष्ट्यबुद्धौ समानकालीनत्वसम्बन्धेन विशेष्यतावच्छेदकदण्डादेर्विधेयकुण्डलाद्यंशे प्रकारत्वेऽपि न दण्डवत्कुण्डलीत्याद्याकारकता। न च प्रकारतायाः पारतन्त्र्यं दुर्निर्वचमिति वाच्यम्। उक्तस्थले प्रतियोगिनिष्ठविशेष्यतानिरूपितप्रकारतावच्छेदेनैवाभावांशे कम्बुग्रीवादिमत्त्वादेः प्रकारतोपगमात् तद्विशेष्यतानिरूपितप्रकारतावच्छिन्नत्वस्यैव तत्पारतन्त्र्यपदार्थत्वात्॥

यत्तु—तत्र प्रतियोगिविशेष्यतयाऽभावविशेष्यतया च निरूपिता एकैव प्रकारता स्वीक्रियते, स्वातन्त्र्येण प्रकारतास्थले तु विशेष्यभेदेन प्रकारताभेदः तादृशप्रकारताया एकैकसाधारणत्वात्। एवञ्च तदीयविशेष्यतानिरूपितप्रकारताऽभिन्नत्वमेव, तत्पारतन्त्र्यम्। न चैवं सति तादृशज्ञानस्याभावांश इव प्रतियोग्यंशेऽपि स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन कम्बुग्रीवादिमत्त्वप्रकारकत्वापत्तिः, अभावविशेष्यतानिरूपिततत्सम्बन्धावच्छिन्नप्रकारताया एव भवन्मते प्रतियोगिवि-

शेष्यतानिरूपितप्रकारतात्मकत्वात् तथाच तादृशज्ञानं प्रतियोग्यंशेऽपि तस्य भ्रमः स्यादिति वाच्यम्। तादृशज्ञानस्य हि प्रतियोगिनिष्ठविशेष्यतानिरूपिततत्संबन्धावच्छिन्नकम्बुग्रीवादिमत्त्वप्रकारताशालित्वेऽपि प्रतियोगिनिष्ठविशेष्यतानिरूपिता या तादृशसंसर्गनिष्ठसंसर्गता तन्निरूपकतद्धर्मप्रकारताकत्वं नास्ति तादृशसंसर्गनिष्ठसंसर्गताया अभावविशेष्यतयैव समं निरूप्यनिरूपकभावोपगमात्। इत्थं च तन्निष्ठविशेष्यतानिरूपिततत्संसर्गनिष्ठसंसर्गतानिरूपकतद्धर्मप्रकारताकत्वमेव तदंशे तत्संबन्धेन तद्धर्मप्रकारकत्वमतो न दर्शितोऽतिप्रसङ्ग-इति।

तदसत्। तथासति प्रतियोग्यंशे तादृशज्ञानीयकम्बुग्रीवादिमत्त्वप्रकारताया अपि अभावपारतन्त्र्यापत्तेः, तद्विशिष्टबोधकशब्देन प्रतियोग्यनुल्लेखापत्तेः।

अथ प्रतियोगिविशेषणीभूतधर्मस्याभावांशे निरुक्तप्रकारताकल्पनापेक्षया संसर्गतायां प्रकारतात्वादिकल्पनमेवोचितं धर्मिकल्पनातो धर्मकल्पनाया लघुत्वात्। न च भवन्मतेऽपि तद्धर्मावच्छिन्नत्वांशे प्रतियोगिसंसर्गीभूतप्रतियोगित्वविशेषणतया संसर्गतायाः कल्पनीयतया धर्मिकल्पनमावश्यकमिति वाच्यम्। भवन्मतेऽप्यवच्छिन्नप्रतियोगिताकत्वांशे तद्धर्मनिष्ठप्रकारतानिरूपितसंसर्गतायाः कल्पनीयतया संसर्गताकल्पनस्य तुल्यत्वादिति चेन्न।

अभावांशे प्रतियोगिविशेषणधर्मस्य प्रकारतामते प्रतियोगिप्रकारतानिरूपिता या प्रतियोगित्वनिष्ठसंसर्गता, सैव प्रतियोगिविशेषणनिष्ठप्रकारतानिरूपिता या अवच्छिन्नत्वनिष्ठसंसर्गता तन्निरूपितापि, एतावतैव तादृशधर्मस्य स्वावच्छिन्नप्रतियोगिताकत्वरूपसंसर्गभाननिर्वाहात्। एवञ्च तद्धर्मावच्छिन्नत्वविशेषितप्रतियोगितानिरूपकत्वे प्रतियोगिसंसर्गतावादिनस्तव मम चावच्छिन्नत्वप्रतियोगित्वनिरूपकत्वेष्वेकैकसंसर्गताकल्पनस्य तुल्यतया तव तादृशावच्छिन्नत्वनिष्ठसंसर्गतानिरूपिततत्तद्धर्मनिष्ठसंसर्गतानिरूपिततद्धर्मनिष्ठप्रकारताकल्पनस्य तुल्यतया भवतां संसर्गतायां प्रकारतात्वादिकल्पनस्याधिक्यात्। न च भवन्मतेपि तादृशप्रकारतायाः पारतन्त्र्यनिर्वाहाय तत्र प्रतियोगिनिष्ठविशेष्यतानिरूपितप्रकारतावच्छिन्नत्वकल्पनमधिकमिति वाच्यम्। भवन्मतेऽपि तत्तद्धर्मनिष्ठप्रकारताविशेषात्मकसंसर्गतायामवच्छिन्नत्वानुयोगिकसम्बन्धविशेषावच्छिन्नत्वस्याधिकस्य कल्पनीयतया साम्यात्।

अथवा किमेतावता सूक्ष्मगवेषणायासेन, अस्तु संसर्गताविशेषाणां प्रकारतादिविशेषरूपता, नैतावतापि संसर्गस्य विशिष्टधीविषयतासि-

ङ्किः । झटिति विघटितनिर्युक्तिकसिद्धान्तानुरोधनिस्सङ्ख्यशृङ्खलानां विषयतात्वस्य प्रकारतात्वादिव्यापकताभङ्गभीरुतया दुरभिभवत्वात् इति वदन्ति ॥

संसर्गतया च समं प्रकारताया विशेष्यतायाश्च निरूप्यनिरूपकभावाख्यस्सम्बन्धविशेषोऽभ्युपगन्तव्यः । स च सम्बन्धः कार्य्यत्वकारणत्वाधेयत्वाधारत्वप्रतियोगित्वानुयोगित्वादीनां मिथस्तादृशसम्बन्ध इव स्वरूपविशेषः पदार्थान्तरमेव वा, अन्यथा तत्र तेन सम्बन्धेन तत्प्रकारकमित्येतदर्थस्य दुर्वचत्वात् ।

न च तत्संसर्गकत्वे सति तन्निष्ठविशेष्यतानिरूपिततत्प्रकारताकत्वमेव तत्र तेन सम्बन्धेन तत्प्रकारकत्वमिति वाच्यम् । तथासति भूतलादौ संयोगेन घटादिकं समवायेन च रूपादिकमवगाहमानाया धियो भूतलांशे संयोगेन रूपादिप्रकारकत्वस्य समवायेन च घटादिप्रकारकत्वस्यापत्तेः । एवं समवायेन कपालांशे संयोगेन च भूतलांशे घटमवगाहमानाया बुद्धेस्समवायेन भूतलांशे संयोगेन च कपालांशे घटप्रकारकत्वापत्तेः । तत्स्वीकारे च तन्निष्ठविशेष्यतानिरूपिततदीयसंसर्गतानिरूपिता या तदीयप्रकारता तत्प्रतियोगित्वमेव तदंशे तेन सम्बन्धेन तत्प्रकारकत्वम्, यस्य यः सम्बन्धो यत्र भासते तदीयविशेष्यतातदीयप्रकारताभ्यामेव तदीयसंसर्गताया निरूप्यनिरूपकभावान्नोक्तातिप्रसङ्गः । न च प्रकारतायाः संसर्गविशेषावच्छिन्नतया तत्संसर्गावच्छिन्नतदीयप्रकारतानिरूपिततदीयविशेष्यताकत्वमेव तेन सम्बन्धेन तदंशे तत्प्रकारकत्वमस्तु, किमुक्तनिरूप्यनिरूपकभावोपगमेनेति वाच्यम् । संसर्गनिष्ठावच्छेदकतानिरूपकत्वरूपसंसर्गावच्छिन्नत्वस्य प्रकारतायां स्वीकृतावेव संसर्गताप्रकारतयोर्निरूप्यनिरूपकभावसिद्धेः, संसर्गतायास्संसर्गनिष्ठावच्छेदकतारूपत्वात् । न चैवमपि प्रकारतयैव समं तस्या निरूप्यनिरूपकभावोऽस्तु, न तु विशेष्यतयापि सममुक्तबुद्धिनिरूपितायाः समवायनिष्ठसंसर्गतानिरूपितघटप्रकारताया भूतलविशेष्यतानिरूपितत्वविरहात्, संयोगनिष्ठसंसर्गतानिरूपिततत्प्रकारतायाश्च कपालविशेष्यतानिरूपितत्वविरहादुक्तातिप्रसङ्गवारणादिति वाच्यम् । विनिगमनाविरहेणैव विशेष्यतयापि समं तस्या निरूप्यनिरूपकभावसिद्धेर्निष्प्रत्यूहत्वात् । एवञ्च विशेष्यताप्रकारतयोस्साक्षान्निरूप्यनिरूपकभावोऽप्रामाणिकः, किन्तु प्रकारतायां विशेष्यतानिरूपितसंसर्गतानिरूपितत्वमेव विशेष्यतानिरूपितत्वम्, विशेष्यतायां प्रकारतानिरूपितसंसर्गतानिरूपितत्वमेव च प्रकारतानिरूपितत्वम् । कार्य्यकारणभावावच्छेदककोटौ यत्र प्रकारताविशेष्यतयोर्निवेशस्तत्र संसर्गस्याप्यवश्यं निवेशात्, तयोर्निरू-

प्यनिरूपकभावानभ्युपगमेऽपि गौरवानवकाशादिति तु ध्येयम्(१)।

प्रकारता च द्विविधा-निरवच्छिन्ना विशेषणान्तरावच्छिन्ना च । तत्र निरवच्छिन्ना घट इत्याद्याकारकज्ञानीयघटत्वादिप्रकारता तत्र स्वरूपत एव घटत्वादेर्भानात् । तादृशी च प्रकारता जात्यखण्डोपाधिभिन्ने न स्वीक्रियते। सावच्छिन्ना च घटवदित्यादिज्ञानीयघटादिप्रकारता तत्र घटत्वादेरवच्छेदकत्वात् । न च तादृशप्रकारताया घटत्वादिना सममवच्छेद्यावच्छेदकभावो निर्युक्तिकः द्रव्यवदित्यादिज्ञानात्तादृशज्ञानस्य घटांशे विभिन्नप्रकारकतयैव वैलक्षण्योपपत्तेरिति वाच्यम् । तादृशज्ञानीयघटादिप्रकारताया घटत्वाद्यवच्छिन्नत्वानुपगमे द्रव्यवद्भूतलं घटश्चेत्याद्याकारकसमूहालम्बनात्मकज्ञानात् घटवत् भूतलं द्रव्यञ्चेति समूहालम्बनज्ञानस्यैव वैलक्षण्यानुपपत्तेः, उभयोरेव घटांशे द्रव्यत्वघटत्वोभयप्रकारकत्वाद्भूतलांशे घटप्रकारकत्वाच्च, मन्मते पुनराद्ये द्रव्यत्वावच्छिन्ना घटीया प्रकारता अन्त्ये च घटत्वावच्छिन्ना सेति प्रकारतावैलक्षण्यात्तयोर्वैलक्षण्यम् ।

वस्तुतस्तु घटत्वादिनिष्ठप्रकारतानिरूपितत्वमेव घटादिप्रकारतायां घटत्वाद्यवच्छिन्नत्वम् । न च प्रकारताविशेष्यतयोरेव निरूप्यनिरूपकभावो न तु प्रकारतयोरपीति वाच्यम् । तत्र घटादिनिष्ठायाः भूतलादिनिष्ठविशेष्यतानिरूपितप्रकारताया एव घटत्वादिप्रकारतानिरूपितविशेष्यतात्मकत्वात् तादृशप्रकारतयोर्निरूप्यनिरूपकभावोपपत्तेः ।

केचित्तु—घटत्वप्रकारतानिरूपितविशेष्यतावच्छेदेन भूतलांशे घटस्य प्रकारता घटवदित्येतादृशज्ञाने स्वीक्रियते, अत एवोक्तज्ञानयोर्भेदः-इत्याहुः ।

तच्चिन्त्यम् ।

परे तु—घटवदित्याद्याकारकं विशिष्टविशेषणकज्ञानं द्विविधं विशिष्टवैशिष्ट्यबोधात्मकं, केवलं विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति रीत्या घटत्वाद्यवगाहि च । तत्र प्रथमे घटत्वादेः प्रकारतावच्छेदकत्वम् । द्वितीये तु प्रकारतात्मकविशेष्यतानिरूपितं प्रकारत्वं न तु प्रकारतावच्छेदकत्वमपि-इत्याहुः ।

स च विशिष्टवैशिष्ट्यविचारे स्फुटीभविष्यति ।

विशेष्यता च क्वचिन्निरवच्छिन्ना क्वचिच्च विशेषणान्तरावच्छिन्ना।

(१) विनिगमनाविरहादेव तयोरपि साक्षान्निरूप्यनिरूपकभावसिद्धिरिति केचित् । वस्तुतस्तु संयोगेनावृत्तिर्गुण इति निश्चयप्रतिबध्यतावच्छेदकलाघवात्संसर्गत्वप्रकारतयोः, संयोगेनानधिकरणं गुण इति निश्चयप्रतिबध्यतावच्छेदकलाघवात्संसर्गत्वविशेष्यतयोः, सम्बन्धसामान्येन घटासम्बद्धम्भूतलमितिनिश्चयप्रतिबध्यतावच्छेदकलाघवात्प्रकारत्वविशेष्यतयोर्निरूप्यनिरूपकभाव आवश्यक इति ।

तत्र निर्धर्मितावच्छेदके घट इत्याद्याकारकज्ञाने घटत्वादिप्रकारतानिरूपित-विशेष्यता निरवच्छिन्ना। अयं घट इत्याद्याकारकसधर्मितावच्छेदकघट-त्वादिविशिष्टबुद्धौ च घटत्वादिप्रकारतानिरूपितविशेष्यता इदन्त्वाद्यवच्छि-न्ना। अत एव इदन्त्वादिकं तत्र धर्मितावच्छेदकमित्युच्यते, विशेष्यताव-च्छेदकताया एव धर्मितावच्छेदकतापदार्थत्वात्॥ विशेष्यतानिरूपितमव-च्छेदकत्वं च न तन्निरूपितप्रकारत्वम्, तथासति घट इत्यादिज्ञानेऽयं घट इत्यादिज्ञाने च घटत्वस्य धर्मितावच्छेदकत्वापत्तेः, निर्धर्मितावच्छे-दककविशिष्टबुद्धिविलोपप्रसङ्गाच्च, किन्तु प्रतियोगित्वादिनिरूपिताव-च्छेदकत्ववत् स्वरूपविशेषः पदार्थान्तरमेव वा।

अथवा प्रकारताविशेष एव तत्, अन्यथा सधर्मितावच्छेदकज्ञा-नस्य धर्मितावच्छेदकप्रकारकत्वोपपत्तये तन्निष्ठतज्ज्ञानीयप्रकारतान्तर-कल्पने गौरवात्। न च ज्ञानान्तरक्लृप्ततद्धर्मनिष्ठप्रकारतयैवोपपत्तेर्ना-तिरिक्तप्रकारताकल्पनमिति वाच्यम्। एवमपि तद्धर्मितावच्छेदकस-मानविषयताकानन्तज्ञानेषु तादृशप्रकारताप्रतियोगित्वकल्पनापेक्षया तावत्साधारणकधर्मितावच्छेदकतायां प्रकारतात्वकल्पने लाघवात्। न चैवमयं घट इत्यादिज्ञाने इदन्त्वादेः स्वस्यापि धर्मितावच्छेदक-त्वापत्तिरिति ततोऽयमयमित्याद्याकारकस्मरणप्रसङ्ग इति वाच्यम्। यतस्तदीयप्रकारतानिरूपिताया धर्मितावच्छेदकताया आश्रय एव तदीयधर्मितावच्छेदकः, उक्तस्थले चेदन्त्वनिष्ठधर्मितावच्छेदकतायाः स्वात्मकप्रकारतायां निरूप्यनिरूपकभावविरहान्नातिप्रसङ्गः। न चैवम-पीदन्त्वादिकं घटत्वादेरपि धर्मितावच्छेदकं न स्यात्, तन्निष्ठधर्मिता-तावच्छेदकतया घटत्वादिप्रकारताया अपि निरूप्यनिरूपकभावे माना-वात्, परम्परया निरूप्यनिरूपकभावस्य च प्रकृतेऽपि सत्त्वादिति वाच्यम्। एतदनुरोधेनैव धर्मितावच्छेदकत्वविशेषणीयप्रकारत्व-योरपि निरूप्यनिरूपकभावोपगमात्। यत्प्रकारतानिरूपितत्वावच्छेदेन विशेष्यताया यदवच्छेद्यत्वं स एव तद्धर्मितावच्छेदकः, उक्तस्थले च स्वप्रकारतानिरूपितत्वावच्छेदेन न विशेष्यतायास्स्वावच्छेद्यत्वमतो न स्वांशे स्वस्य धर्मितावच्छेदकत्वापत्तिरित्यप्याहुः॥

विशेष्यता च समूहालम्बने प्रकारभेदाद्भिद्यते समूहालम्बनस्य प्रत्येकप्रकारकज्ञानसामग्रीसमाजनियततया प्रत्येकप्रकारकज्ञानीयनाना-विशेष्यताप्रतियोगित्वस्यैव तत्र सत्त्वात्। अयं घटो दण्डी कुण्डलीत्या-द्याकारकैकधर्मितावच्छेदकापरधर्मप्रकारकज्ञाने धर्मितावच्छेदकतायाः प्रकारताविशेषत्वमते उभयप्रकारतानिरूपिता एकैव विशेष्यता। धर्मि-तावच्छेदके ज्ञानान्तरसाधारणप्रकारतास्वीकारकल्पे तु प्रकारभेदेन

विशेष्यताभेदः । यदि च समूहालम्बनविलक्षणो विशेषणविशेष्यतावच्छेदकभावानापन्नखड्गकुण्डलाद्युभयविशिष्टविषयकः खड्गी कुण्डली चैत्र इत्याद्याकारकबोधोऽनुभवसिद्धस्तदा तत्राप्युभयप्रकारतानिरूपितैकविशेष्यता, अन्यथा समूहालम्बनात्तद्वैलक्षण्यानुपपत्तेः । एवं मिथो विशेषणविशेष्यतावच्छेदकभावानापन्नखड्गकुण्डलोभयादिकं यत्र शौर्य्यादिधर्मितावच्छेदकतया भासते, खड्गी कुण्डली चैत्रश्शूर इत्याद्याकारके तादृशबोधे च खड्गकुण्डलोभयादिप्रकारतानिरूपितैकविशेष्यता, तादृशविशेष्यता च तादृशोभयाद्यवच्छिन्नशौर्य्यादिप्रकारतानिरूपितविशेष्यतातो भिन्नाऽभिन्ना वेति तु पूर्वोक्तवदूहनीयम् । एवं खड्गाद्येकतरधर्मितावच्छेदकतापन्नस्यैवापरस्य कुण्डलादेर्विधेयधर्मितातावच्छेदकत्वं यत्र तत्र खड्गादिप्रकारतानिरूपितकुण्डलाद्यवच्छिन्नविशेष्यताविधेयप्रकारतानिरूपितोभयधर्मावच्छिन्नविशेष्यतयोरभेदः, अन्यथा मिथो विशेषणविशेष्यतावच्छेदकभावानापन्नखड्गकुण्डलोभयधर्मावच्छिन्नविशेष्यकशौर्य्यादिविधेयकबोध एव यत्र स्वातन्त्र्येण कुण्डलस्य खड्गधर्मितावच्छेदकतया भानं तादृशसमूहालम्बनात्तस्य वैलक्षण्यानुपपत्तेः । एवञ्च सति खड्गादेः खड्गादिप्रकारतानिरूपितविशेष्यताया अवच्छेदकत्वेऽपि यथा न तस्य स्वधर्मितावच्छेदकत्वं तथोपपादितं प्रागेव ॥ तत्रोक्तविशेष्यते भिन्ने एव, किन्त्वेकविशेष्यताऽपरविशेष्यतावच्छेदकभावापन्नेति समूहालम्बनाद्विशेष इत्यप्याहुः ॥

इत्थं प्रकारतादिवत् विधेयत्वमपि विषयतान्तरं न तूक्तप्रकारत्वमेव तत्, धर्मितावच्छेदकस्यापि तथात्वापत्तेः ।

अथ विशेष्यतावच्छेदकताभिन्नमुख्यविशेष्यतानिरूपितप्रकारतैव विधेयता, पर्वतो वन्हिमानित्यादौ च पर्वतत्वादिरूपधर्मितावच्छेदकनिष्ठप्रकारता धर्मितावच्छेदकतात्मिकैव, धर्मितावच्छेदकतायाः प्रकारतात्वस्य व्यवस्थापितत्वादतो न तत्र पर्वतत्वादेर्विधेयतापत्तिः । तादृशज्ञाने वह्न्यादेरिव वन्हित्वादेर्वन्हिमत्पर्वतवान्देश इत्यादौ च वह्नेर्विधेयतावारणाय मुख्यविशेष्यतानिरूपितत्वं विशेषणम् । मुख्यत्वञ्च विशेष्यतायां प्रकारतानवच्छिन्नत्वं, प्रकारताभिन्नत्वं वा । न च विशेष्यतावच्छेदकताभिन्नत्वाद्युपस्थितिं विनापि पर्वतो वह्निमानित्याद्यनुमित्यनन्तरं पर्वते वन्हिमनुमिनोमीत्याद्याकारकस्य वह्न्यादिविधेयकत्वावगाहिनोऽनुव्यवसायस्योत्पत्त्या निरुक्तप्रकारताया विधेयतात्मकत्वं नोपपद्यत इति वाच्यम् । वन्हिप्रकारकानुमितित्वस्यैव तादृशानुव्यवसायविषयत्वोपगमात् । न चैवं वन्हिमान्पर्वतो घटवानित्यनुमित्यनन्तरमपि तादृशानुव्यवसायापत्तिरिति वाच्यम् । निरुक्तनिष्ठप्रकारताक-

त्वस्य तत्प्रकारकानुमितित्वव्यञ्जकतया तादृशापत्त्यसम्भवात्(१) । भवन्मतेऽपि तद्विधेयकानुमितौ यथाकथञ्चिदुपस्थिततद्विधेयकत्वग्रहवारणाय तत्र तद्विधेयकत्वस्य हेतुताया आवश्यकत्वात् । न च तादृशानुव्यवसाये तन्निष्ठविलक्षणविषयतारूपविधेयतायाः प्रतियोगितासम्बन्धेन हेतुकत्वकल्पनापेक्षया निरुक्ततन्निष्ठप्रकारताया गुरुशरीरायास्तत्संबन्धेन हेतुताकल्पने गौरवाद्विलक्षणविषयतासिद्धिरिति वाच्यम् । कार्यकारणभावलाघवानुरोधेन जात्यतिरिक्त पदार्थसिद्धेः सिद्धान्तविरुद्धत्वादन्यथा धूमादिपरामर्शजन्यतावच्छेदकतयाऽव्यालोकादिलिङ्गकानुमितिव्यावृत्तेर्विलक्षणविषयतासिद्धिप्रसङ्गात्(२) । न च निरुक्तप्रकारतातोऽतिरिक्तैव विधेयताख्यविषयता, अन्यथा धर्मितावच्छेदकताभिन्नत्वाद्यनुपस्थितिदशायां वन्हिमान्पर्वतो घटवानित्याद्यनुमित्यनन्तरं पर्वते घटमनुमिनोमि न वह्निमित्याद्याकारकस्य वह्निविधेयकत्वाभावावगाहिनोऽनुव्यवसायस्यापलापप्रसङ्गात्, वह्न्यादिप्रकारकाऽनुमितिविषयकस्य तस्य वह्निप्रकारकत्वसामान्याभावावलम्बनत्वासम्भवादिति वाच्यम् । धर्मितावच्छेदकताभिन्नत्वाद्यनुपस्थितिदशायां तादृशप्रतीतेः प्रामाणिकत्वे निरुक्तप्रकारतायामेव विधेयतात्वाख्यधर्मविशेषं स्वीकृत्य तेन रूपेण निरुक्तप्रकारतायाः प्रतियोगितासम्बन्धावच्छिन्नाभावस्यैव तादृशप्रतीतिविषयतायाः स्वीकरणीयत्वात् । भवन्मतेऽपि संबन्धादिभेदभिन्नविधेयतानामनुगमाय तादृशातिरिक्तधर्मस्वीकारस्यावश्यकत्वात् । अन्यथा विधेयतानामननुगतसामान्यधर्मावच्छिन्नाभावासम्भवेन तत्तद्व्यक्तित्वावच्छिन्नाभावकूटस्यैव तादृशप्रतीतिविषयतायाः स्वीकरणीयतयाऽभावकूटस्य विशिष्य युगसहस्रेणापि ग्रहीतुमशक्यतया तादृशप्रतीतेरेवानुपपत्तेः । विधेयताप्रतियोगिकाभावत्वेन तावदभावानां तद्विषयत्वोपगमे तादृशप्रतीतेः प्रतियोगितावच्छेदकतानवगाहितया वह्निमनुमिनोमीत्यादिप्रतीतेर्विरोधित्वानुपपत्तेरिति चेन्न ।

निरुक्तप्रकारताया एव विधेयतात्वे पृथिव्यां जलादिभेदो, ह्रदे धूमाभाव इत्याद्याकारकसाध्यविशेष्यकानुमितीनां तद्विधेयकत्वानुपपत्तेः । तथाविधानुमितिविशेष्यतायां विधेयतात्वोपगमान्नेयमनुपप-

---

(१) विषयतासम्बन्धेन तादृशानुव्यवसायम्प्रति स्वरूपतस्तस्य कारणत्वान्नोक्तदोषः ॥

(२) व्यभिचारवारणाय कार्य्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशनं व्यर्थमिति भावः ॥

त्तिरिति चेत् । तर्हि तादृशानुमितिविशेष्यतायास्तत्समानप्रकारकस-मानविशेष्यकपृथिव्यादिसाध्यकानुमितावपि सत्त्वेन तस्या अपि इतर-भेदादिविधेयकत्वापत्तेः ।

अथ पृथिव्यादिपक्षकतादृशानुमितितत्साध्यकतादृशानुमित्योर्भिन्न-भिन्नैव तादृशी विशेष्यता, एवञ्च साध्यविशेष्यकानुमितिविशेष्यता-यामेव विधेयतात्वमभ्युपेयत इति नोक्तातिप्रसङ्ग इति चेन्न ।

साध्यविशेष्यकानुमितावतिरिक्तविधेयतात्मकविशेष्यतोपगमे इतर-भेदः पृथिव्यामित्याद्याकारकपृथिवीसाध्यकानुमितौ विधेयतानात्मकं विशेष्यतान्तरं, तथाविधप्रत्यक्षे चाऽन्यद्विशेष्यत्वमिति तिसृणां विशेष्य-तानां कल्पनापेक्षया प्रत्यक्षानुमितिसाधारणया एकविशेष्यतायाः साध्य-विशेष्यकसाध्यविशेषणकानुमितिसाधारण्या एकस्या विधेयतायाश्च कल्पनस्यैवोचितत्वात् । न चास्मन्मतेऽनुमितौ या विधेयतानात्मिका विशेष्यता सैव प्रत्यक्षेऽपीति न विशेष्यतात्रयकल्पनमिति वाच्यम् । प्रत्यक्षे विधेयतात्मिका तदनात्मिका वा विशेष्यता कल्प्यत इत्यत्र विनिगमनाविरहात् ॥

यत्तु साध्यविशेषणकानुमितौ कॢप्तनिरुक्तप्रकारतैव विधेयता, अतिरिक्तविधेयता तु साध्यविशेष्यकानुमितावेव, अनन्तसाध्यविशेष-कानुमितिव्यक्तिषु अतिरिक्तविधेयतासम्बन्धकल्पनापेक्षया तन्निरूपि-तस्वल्पतरनिरुक्तप्रकारतासु विधेयतात्वकल्पने लाघवादिति ।

तदपि न चारु । तादृशप्रकारताया विधेयतात्वोपगमे पर्वतो वन्हि-मान्, पर्वतो निर्धूमस्स्यादित्याकारकसमूहालम्बनापत्त्यात्मकज्ञानस्य वह्न्यादिविधेयकत्वापत्तेः । न चेष्टापत्तिः । तथासति तादृज्ञापत्त्यन-न्तरं पर्वते धूमाभावमापादयामि न तु वन्हिमित्याकारकवन्हिविधेयक-त्वाभावप्रतीतेरनुपपत्तेः । एतेन साध्यविशेष्यकानुमितिरेवाऽप्रामा-णिकी, अप्रसिद्धसाध्यकस्थले(१) विशेष्ये विशेषणमिति रीत्या साध्य विशेषणकानुमितिरेवोत्पद्यते विशिष्टबुद्धिसामान्ये विशेषणज्ञानहेतुताया निर्युक्तिकत्वात्, तथाच निरुक्तप्रकारतैव विधेयता, भावसाध्यकस्थ ले तु साध्यविशेष्यकानुमितेरत्यन्ताप्रामाणिकतया तत्र सुतरामेवेत्यपि निरस्तम् ॥

यत्तु मनुमितावापत्तौ च तद्व्याप्यवत्ताज्ञानजन्यत्वमेव तद्वि-धेयकत्वमिति ।

तदसत् । यतोऽतिरिक्तविधेयतानभ्युपगमे तद्व्याप्यवत्ताज्ञानस्य स्वानन्तरोत्पन्नतत्प्रकारकानुमितित्वादिकमेव जन्यतावच्छेदकं वाच्यम्,

(१) साध्यज्ञानं विना व्यतिरेकपरामर्शोत्पत्तिस्थले ॥

न तु तत्र तद्विधेयतानिवेशसंभवः, आत्माश्रयप्रसङ्गात् । तथाच सिद्ध्यभावाऽऽपाद्यव्यतिरेकनिश्चयरूपकारणासमवहितवन्हिव्याप्यवत्ताज्ञानानन्तरोत्पन्नयोर्वन्हिमत्पर्वतत्वावच्छिन्नपक्षकघटादिविधेयकानुमित्याप-त्योरपि तादृशज्ञानजन्यतया वन्हिविधेयकत्वप्रसङ्ग इति पक्षताविशेषादिजन्यत्वस्य विधेयताशरीरघटकत्वे पक्षताद्युपस्थितिविरहकालेऽपि सर्वानुभवसिद्धाया वन्हिं नानुमिनोमीत्याद्याकारकप्रतीतेरपलापप्रसङ्गात् । न च पक्षताविशेषादिजन्यत्वविशिष्टस्वव्याप्यवत्ताज्ञानजन्यत्वसम्बन्धेन वह्न्यादिमदन्यत्वमेव तादृशप्रतीतिविषयोऽस्तु, तत्र च न पक्षताद्युपस्थितेरपेक्षा सम्बन्धज्ञानस्य विशिष्टबुद्धावहेतुत्वादिति वाच्यम् । अनन्तपदार्थघटिततादृशधर्मस्य सम्बन्धत्वे मानाभावात् ।

एवमेतन्मते शाब्दबोधस्य सविधेयकत्वानुपपत्तिः, तस्य व्याप्यवत्ताज्ञानाजन्यत्वात् । न च तत्र निरुक्तप्रकारतैव विधेयतेति वाच्यम् । पर्वते वन्हिरित्यादिवाक्यजन्यशाब्दबोधे वह्न्यादेर्विधेयत्वानुपपत्तेः । न च तत्र वह्न्यंशे पर्वताधेयत्वमेव विधेयं, न तु पर्वतांशे वन्हिरिति वाच्यम् । शाब्दबोधे चरमनिर्दिष्टपदार्थस्यैव विधेयत्वात्(१) । अत एव "न्यक्कारो ह्ययमेव मे यदरयः" इत्यादौ विधेयत्वेन तात्पर्यविषयस्य न्यक्कारादेः प्राङ्निर्दिष्टपदोपस्थाप्यतया तद्विधेयकान्वयबोधासम्भवादालङ्कारिका विधेयाविमर्श(२)दोषमुदाहरन्ति । अत एव "गुणानां गुणत्वमि"त्यादौ गुणत्वस्यैवोद्देश्यतावच्छेदकतया विधेयतया चान्वयबोधानुपपत्तिराशङ्किता, वर्द्धमानोपाध्यायैः । विशेष्यस्य विधेयत्वे तत्र गुणत्वस्य तदनुपपत्त्या तादृशाशङ्कानासङ्गतेः । न च परार्थानुमाने गुणत्वरूपलक्ष्यतावच्छेदकधर्मावच्छिन्ने इतरभेदसाधनाय प्रयुक्तादितरव्यापकीभूताभावप्रतियोगिगुणत्ववानयमित्येतादृशोपनयावयवादन्वयबोधानुपपत्तिरेव तैराशङ्कितेति वाच्यम् । तत्र दण्डवान् रक्तदण्डवानित्यादाविव विधेयांशे व्याप्तिभानाधिक्येन गुणत्वसम्बन्धिन एवाभेदसम्बन्धेन विधेयतया चाऽन्वयबोधानुपपत्तिविरहात् । न च नामार्थयोः साक्षादन्वयस्याव्युत्पन्नतया पर्वते वह्निरित्यादौ पर्वताद्यंशे कथं विधेयतयाऽन्वय इति वाच्यम् । साक्षाद्विशेषणविशेष्यभावेनान्वयस्यैव नामार्थयोरनभ्युपगमात्, अत्र परम्परयैव विशेष्यविशेषणभावागमात् ।

अथ शाब्दबोधे चरमनिर्दिष्टपदार्थस्य विधेयत्वे "वपुर्विरूपाक्षमि"-

---

(१) तदुद्देश्यतानिरूपितविधेयतासम्बन्धेन शाब्दं प्रति तत्पदोत्तरपदोपस्थाप्यत्वं तन्त्रमिति भावः । (२) अविमर्शः अप्रतिपत्तिः ॥

त्यादा(१)वदत्तो वैरूप्यस्य विधेयत्वानुपपत्तिः। वैरूप्यविशिष्टस्याक्ष्ण एव तत्र वपुरंशे विधेयत्वे "अलक्ष्यजन्मते"त्यत्रापि अलक्ष्यजन्मताया एव विधेयतया तात्पर्यविषयत्वमित्यस्य वक्तुं शक्यतया अलक्ष्यताया अविधेयत्वेनाऽविमृष्टविधेयांशोदाहरणताया अनुपपत्तेः। यदि च तत्र शुद्धस्य जन्मनो विवक्षितमहादेवापकर्षासंपादकतया न विधेयत्वेन विवक्षितत्वमपि तु जन्मनोऽलक्ष्यताया एवेति मन्यते, तदा तुल्यं प्रकृतेऽपि इति चेन्न।

समासातिरिक्तस्थले चरमनिर्देशस्य विधेयता नियामकत्वात्।

एवं निरुक्तप्रकारताया विधेयतात्वे "द्वितीयमौर्वीमिवे"त्यादौ(२) विधेयत्वेन विवक्षितस्य समासघटकपूर्वपदेन प्रतिपादने विधेयाविमर्शः, "मौर्वीं द्वितीयामिवे"त्यसमस्तपदेन प्रतिपादने दोषोद्धार इत्यालङ्कारिकप्रवादविरोधश्चेति। विधेयतावत् तन्निरूपितोद्देश्यतापि प्रकारतादिभिन्नविषयताविशेष एव। न चैवं विशेष्यतैवोद्देश्यता पर्वते वह्निरित्यादिवाक्यजन्यशाब्दबोधे साध्यविशेष्यकानुमितेः प्रामाणिकत्वेन तत्र च पर्वतस्योद्देश्यतानुपपत्तेः। न च विधेयतानिरूपकत्वमुद्देश्यत्वं, तच्च तदंशे विधेयत्वं, तस्य विशेष्यत्वे प्रकारत्वे चाक्षतमेवेति किमुद्देश्यताख्यातिरिक्तविषयत्वोपगमेनेति वाच्यम्। उद्देश्यत्वमेवाऽतिरिक्तं तन्निरूपकत्वमेव विधेयत्वमित्यस्यापि वक्तुं शक्यतया विनिगमनाविरहेणोभयस्यैवातिरिक्ततासिद्धेः॥

इदन्त्ववधेयम्। अस्तु विधेयत्वमुद्देश्यत्वञ्चातिरिक्तं, तयोर्विषयतात्वे मानाभावः। पर्वतो वह्निमानित्यनुमितौ पर्वतवह्न्यादिषु तथाविधप्रत्यक्षसाधारणविशेष्यताप्रकारतास्वीकारस्यावश्यकतया तत एव तादृशज्ञानस्य तद्विषयकत्वोपपत्तेः। प्रकारतादीनां तत्रानुपगमे तादृशानुमित्यादीनां बाधाद्यप्रतिबध्यत्वप्रसङ्गः, विरोधिज्ञानाप्रतिबन्धकत्वप्रसङ्गश्च, प्रकारतादीनामेव तादृशप्रतिबध्यप्रतिबन्धकभावावच्छेदकत्वादिति दिक्(३)॥

इति महामहोपाध्यायगदाधरभट्टाचार्यकृतो विषयतावादः (३७) वीचिः समाप्तः।

---

(१) वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु। वरेषु यद्बालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने॥ इति कुमारसम्भवीयः॥

(२) स्रस्तां नितम्बादवलम्बमानां पुनःपुनः केसरपुष्पकाञ्चीम्। न्यासीकृतां स्थानविदा स्मरेण द्वितीयमौर्वीमिव कार्मुकस्य॥ इति कुमारसम्भवीयः॥

(३) तत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यताकबुद्धितत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यताकनिश्चययोः प्रतिबध्यप्रतिबन्धकभावादिति भावः॥

श्रीगणेशायनमः।

अथ प्रतिबध्यप्रतिबन्धकभाववाद (३८) वीचिः।

तद्धर्मावच्छिन्नविशेष्यताकतदभाववत्तानिर्णयकाले तद्धर्मावच्छिन्न विशेष्यताकतद्विशिष्टबुद्धेरनुदयात् पर्वतत्वावच्छिन्नविशेष्यताकसंयोगादिसंसर्गकवह्नित्वावच्छिन्नप्रकारताकालौकिकज्ञानत्वावच्छिन्नं प्रति पर्वतत्वावच्छिन्नविशेष्यताकदैशिकविशेषणतासंसर्गकसंयोगादिसंसर्गावच्छिन्नवह्नित्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रकारकानाहार्याप्रामाण्यज्ञानानास्कन्दितनिर्णयत्वेन प्रतिबन्धकत्वं कल्प्यते। पर्वतत्वावच्छिन्नविशेष्यताकतदभाववत्तानिर्णयकालेऽन्यधर्मावच्छिन्नविशेष्यताकतद्विशिष्टबुद्ध्युदयात् प्रतिबध्यतावच्छेदककोटौ पर्वतत्वावच्छिन्नविशेष्यताकत्वनिवेशः। संयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानकाले समवायादिसंसर्गकविशिष्टबुद्ध्युदयात् संयोगादिसंसर्गकत्वनिवेशः।

अथ संयुक्तसंयोगादिसंसर्गकज्ञानस्यापि संयोगसंसर्गकतया संयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकाभाववत्तानिर्णयदशायां तदनुदयप्रसङ्गः। किञ्चित्सांसर्गिकविषयतानवच्छिन्नसंयोगादिसांसर्गिकविषयताकत्वं निवेश्य तद्वारणे चावच्छेदकावच्छेदेन वह्निमत्ताज्ञानाद्यसंग्रहः, तत्र विशेष्यतावच्छेदकावच्छिन्नसंयोगादीनामेव संसर्गतया किञ्चित्सांसर्गिकविषयतानवच्छिन्नसंयोगादिसांसर्गिकविषयताकत्वाभावात्। पर्वतत्वाद्यवच्छिन्नत्वनिरूपितसांसर्गिकविषयत्वानवच्छिन्नसंयोगादिसांसर्गिकविषयतानिवेशेऽपि कालिकविशेषणताविशिष्टसंयोगादिसंसर्गकज्ञानं दुःसंग्रहमेवेति चेन्न।

पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपिता या संयोगादिसांसर्गिकविषयता तन्निरूपितवह्नित्वावच्छिन्नप्रकारताकत्वनिवेशनात्, संयुक्तसंयोगादिसंसर्गस्थले च पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितसंयोगादिनिष्ठसांसर्गिकविषयताया वह्न्यादिप्रकारतानिरूपितसांसर्गिकविषयताभिन्नतयाऽनुपपत्त्यभावात्। पर्वतो वह्न्यभाववानित्यादिबाधनिर्णयकाले पर्वतो द्रव्यवानित्याद्याकारकज्ञानोदयात् वह्नित्वाद्यवच्छिन्नप्रकारताकत्वनिवेशः। आनुमानिकभिन्नेन्द्रियजन्यबाधबुद्धिदशायां लौकिकसन्निकर्षजन्यविशिष्टबुद्ध्युदयात् अलौकिकत्वनिवेशः। अलौकिकत्वञ्च न सामान्यतो लौकिकसन्निकर्षजन्यज्ञानभिन्नत्वम् अन्यांशे लौकिकवह्न्याद्युपनीतज्ञानासंग्रहप्रसङ्गात्, किन्तु वह्न्यादिवृत्तिलौकिकसन्निकर्षजन्य-

ज्ञानभिन्नत्वं वह्न्याद्यभाववत्तानिर्णयप्रतिबध्यतावच्छेदककोटौ निवेश्यम्। न च चक्षुःसंयोगत्वकुसंयोगसाधारणलौकिकसन्निकर्षत्वस्य दुर्वचत्वात् कथं लौकिकसन्निकर्षजन्यभिन्नत्वस्य तथात्वमिति वाच्यम्। वह्न्यादिसंयोगजन्यभिन्नत्वस्यैव तथात्वात्, उपनीतज्ञानस्य च वह्न्यादिसंयोगाजन्यत्वेनानुत्पत्त्यसंभवात्। लौकिकसन्निकर्षजन्यज्ञाने उपनीतभानादिविषयताविलक्षणलौकिकविषयताविशेषस्वीकारे तु वह्न्यादिवृत्तिलौकिकविषयताकान्यत्वं ज्ञानांशे, वह्न्यादिप्रकारतायां वा लौकिकविषयताभिन्नत्वं निवेश्यं, न तु लौकिकसन्निकर्षजन्यभिन्नत्वं गौरवात्।

अथ लौकिकसन्निकर्षजन्यज्ञाने व्यभिचारवारणाय अलौकिकत्वनिवेशे बाधकाले लौकिकसन्निकर्षजन्यसंशयापत्तिः। न च संशयस्यार्थसमाजग्रस्ततया कस्यचिज्जन्यतानवच्छेदकत्वात् तदवच्छिन्नस्यापादनमशक्यम्, तद्विशिष्टबुद्धित्वावच्छिन्नं तु निर्णयात्मकं जायत एवेति वाच्यम्। पर्वतत्वावच्छिन्नविशेष्यकवह्निविशिष्टबुद्धित्वे तथाविधवह्न्यभावविशिष्टबुद्धित्वाद्यवच्छिन्नस्यापत्त्यैव फलतः संशयापत्तेः।

यत्तु लौकिकसन्निकर्षजन्यसंशयसाधारणं लौकिकनिर्णयान्यज्ञानत्वमेव प्रतिबध्यतावच्छेदकमतो न बाधकाले लौकिकसन्निकर्षजन्यसंशयापत्तिरिति।

तदसत्। संशयसाधारणतादृशधर्मस्य बाधप्रतिबध्यतावच्छेदकत्वेऽपि उपदर्शितस्थले लौकिकसन्निकर्षादिसामान्यसामग्रीबलात् वह्निविशिष्टबुद्धित्ववह्न्यभावविशिष्टबुद्धित्वावच्छिन्नोत्पत्तौ बाधकाभावेन फलतः संशयापत्तेर्वारयितुमशक्यत्वात्, सामान्यसामग्र्या तादृशप्रतिबध्यतावच्छेदकानाक्रान्तस्य निर्णयस्यैव जनने बाधाभावरूपविशेषसामग्रीविरहस्याकिञ्चित्करत्वात्। निर्णयस्थले च विशेषसामग्र्यन्तराभावात्।

एतेन संशये लौकिकविषयताऽनभ्युपगमेन लौकिकसन्निकर्षकालीनसंशयोऽपि लौकिकविषयताशून्यज्ञानत्वरूपबाधप्रतिबध्यतावच्छेदकाक्रान्त एवेति न बाधकाले तदापत्तिः। अथ लौकिकविषयतायाः संशयेऽनभ्युपगमे तस्य लौकिकसन्निकर्षजन्यतावच्छेदकानाक्रान्तत्वप्रसंग इति चेत्। का क्षतिः, ज्ञानसन्निकर्षादेव तदुत्पत्तेः, अत एव वह्निसंशयानन्तरं न वह्निं साक्षात्करोमीत्याकारकसाक्षात्कारित्वग्रहः लौकिकविषयतायाः साक्षात्कारित्वव्यञ्जकत्वादिति। न च लौकिकसन्निकर्षादिकालीनसंशयस्य लौकिकविषयतावत्त्वे बाधकाभाव इति वाच्यम्। तल्लौकिकत्वावच्छिन्नं प्रति तत्कोटिकसंशयसामग्र्याः

अनायत्या प्रतिबन्धकत्वकल्पनात्, संशयसामग्रीदशायां लौकिकविषयताशालिज्ञानसामग्र्यभावस्यैव बाधकत्वात् । अथवा लौकिकान्यविषयतैव बाधप्रतिबध्यतावच्छेदिका, लौकिकसन्निकर्षजन्यसंशये लौकिकालौकिकोभयविषयतैव स्वीक्रियते, अतो भवति सोऽपि बाधप्रतिबध्यः, युज्यते चैतदेव, पूर्वकल्पे लौकिकविषयताकज्ञानं प्रति संशयसामग्र्याः प्रतिबन्धककत्वकल्पने गौरवात् । न च संशये लौकिकविषयतास्वीकारे तत्र साक्षात्कारत्वधीः कथं न स्यादिति वाच्यम् । साक्षात्कारित्वग्रहं प्रति निर्णयत्वेन हेतुत्वं स्वीकृत्यैव संशये साक्षात्कारित्वग्रहवारणसम्भवेनान्यथानुपपत्त्यभावात्, सामग्रीप्रतिबन्धकत्वकल्पनापेक्षया च निर्णयत्वेन हेतुतायां लाघवस्यातिस्फुटत्वादित्यादिकमपास्तम् ।

एतावतापि वह्न्यभावादिनिर्णयानन्तरं लौकिकसन्निकर्षादिघटितसामग्रीबलात् वह्न्यादिबोधे बाधकाभावेनार्थिकसंशयस्य दुर्वारत्वात् इति चेत् ।

मैवम्, पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितवह्न्यादिलौकिकप्रकारताशालिज्ञानं प्रति पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितवह्न्यभावादिप्रकारताशालिज्ञानत्वेन प्रतिबन्धकता कल्प्यते । न चैवमपि समुच्चये व्यभिचार इति वाच्यम् । तदंशेऽव्याप्यवृत्तित्वज्ञानाभावविशिष्टतदभावप्रकारकज्ञानसामग्र्यभावस्य सहकारित्वाभ्युपगमेनापत्त्यभावादिति । एवञ्च वह्न्यभाववत्तानिर्णयानन्तरं वह्नितदभावोभयज्ञानसामग्रीकाले वह्न्यादिलौकिकप्रकारताशालिज्ञानं नापादयितुं शक्यते, एतादृशप्रतिबन्धकस्य प्राक् सत्त्वात्, नापि अलौकिकवह्न्यादिप्रकारताज्ञानम्, तत्प्रतिबन्धकबाधबुद्धेः सत्त्वात्, अन्यादृशतद्विषयताशालिज्ञानं त्वलौकमेवेति नानुपपत्तिगन्धोऽपि । लौकिकसन्निकर्षजन्यज्ञानस्य बाधसामान्याप्रतिबध्यतया तदिन्द्रियजन्यबाधकाले तदिन्द्रियजन्यज्ञानवारणाय लौकिकान्यत्वमनिवेश्य चाक्षुषादिविशिष्टबुद्धौ चाक्षुषादिबाधबुद्धेः पृथगेव प्रतिबन्धकत्वं कल्पनीयम् । पर्वतत्वावच्छिन्नविशेष्यतानिरूपिता या विशेषणताविशिष्टनिष्ठा सांसर्गिकविषयता तन्निरूपितवह्न्यभावनिष्ठप्रकारताशालिचाक्षुषत्वेन प्रतिबन्धकता पर्वतो वह्निमानितिचाक्षुषत्वेन प्रतिबध्यता कल्पनीया इत्यर्थः । शङ्खो न पीतः अयं नोरग इत्यादिबुद्धिदशायां मण्डूकवसाञ्जनादिदोषवशात् शङ्खवंशादौ पीतिमोरगत्वारोपोदयात् तत्र तादृशदोषविशेषाजन्यत्वमपि बाधसामान्याभावकार्यतावच्छेदककोटौ निवेशनीयम् ।

केचित्तु दोषविशेषजन्यज्ञानेऽपि लौकिकविषयतया एवाभ्युपगमात् अलौकिकत्वनिवेशेनैव तत्र व्यभिचारवारणसंभवात् दोषविशेषजन्यत्वस्य न प्रतिबध्यतावच्छेदककोटिप्रवेशः । न च लौकिकसन्निकर्षं विनैव तादृशस्मर्यमाणारोपोदयात् कथं लौकिकविषयताशालित्वं तस्येति वाच्यम् । लौकिकसन्निकर्षवद्दोषविशेषस्यापि तादृशविषयतानियामकत्वाभ्युपगमात् । न चैवमपि तत्र लौकिकसन्निकर्षस्य व्यभिचार इति वाच्यम् । तादृशारोपानन्तरं पीतं साक्षात्करोमीत्याकारकानुव्यवसायोदयेन तत्र तादृशविषयतायाः प्रामाणिकत्वात्, व्यभिचारवारणाय अनायत्या दोषविशेषाजन्यत्वस्य कारणाव्यवहितोत्तरत्वस्यैव वा सन्निकर्षजन्यतावच्छेदककोटौ निवेशनीयत्वादित्याहुः ।

प्रतिबन्धकतावच्छेदककोटौ विशेष्यतावच्छेदकधर्मस्य विशिष्य निवेशात् द्रव्यं न वह्निमदित्यादिबुद्धेः न पर्वतो वह्निमानित्यादिज्ञानविरोधिता । कालिकसम्बन्धेन तदभाववत्ताज्ञानस्याविरोधितया दैशिकविशेषणताकत्वनिवेशः । उद्देश्यतावच्छेदकसामानाधिकरण्यमात्रावगाहिन्या बाधबुद्धेस्तादृशविशिष्टबुद्ध्यविरोधितया पर्वतत्वाद्यवच्छिन्नत्वीयसांसर्गिकविषयतावच्छिन्नत्वं विशेषणताविशेषीयसांसर्गिकविषयतायां निवेशनीयम्, एवञ्च पर्वतत्वावच्छिन्नविशेषणतया महानसत्वाद्यवच्छिन्नविशेष्यताकविशिष्टबुद्धौ संसर्गत्वानभ्युपगमे पर्वतत्वाद्यवच्छिन्नत्वं विशेष्यतायां न निवेशनीयम् प्रयोजनाभावात्, किन्तु पर्वतत्वावच्छिन्नविशेषणतावत्संयोगित्वादिरूपपरंपरासम्बन्धित्वावगाहिज्ञानवारणाय विशेष्यतानिरूपितत्वमात्रं तादृशविशेषणताविशेषीयसांसर्गिकविषयतायां निवेशनीयम् ।

वस्तुतस्तु वास्तवपर्वतत्वव्यापकत्वविषयतानिवेशे यत्र पर्वतवृत्त्यभावप्रतियोगितावच्छेदकत्वाभावत्वेनाभावान्तरावगाहि ज्ञानं तदसंग्रहः तादृशज्ञानस्य पर्वतवृत्त्यभावप्रतियोगितावच्छेदकत्वाभावघटितव्यापकत्वानवगाहित्वात्, एवं यत्र पर्वतत्वादिना महानसादिकमेव संसर्गघटकतया भातं तस्याप्यसंग्रह इति पर्वतत्वावच्छिन्नसांसर्गिकविषयतावच्छिन्ना या आधेयत्वसांसर्गिकविषयता इत्येवंरीत्या व्यापकताघटकपदार्थकूटविषयता एव निवेशनीयाः । इत्थञ्च तादृशसांसर्गिकविषयतायां विशेष्यतायां वा पर्वतत्वावच्छिन्नत्वं निवेश्यत इत्यत्र विनिगमकाभावेन उभयत्रैव तन्निवेश इति ध्येयम् ।

नीलपर्वतत्वावच्छेदेन वह्न्यभाववत्तानिर्णयस्य शुद्धपर्वतत्वसामानाधिकरण्येन विशिष्टबुद्धिं प्रति अविरोधितया पर्वतत्वान्यधर्मानवच्छि-

न्नत्वं तादृशसांसर्गिकविषयतायां विशेष्यतायां वा निवेशनीयम् । न चैवं सामानाधिकरण्यमात्रावगाहिवह्न्यभाववत्ताज्ञानस्यैतादृशप्रतिबन्धकतावच्छेदकानाक्रान्ततया तादृशज्ञानदशायाम् अवच्छेदकावच्छेदेन वह्न्यादिविशिष्टबुद्ध्यापत्तिरिति वाच्यम् । अवच्छेदकावच्छेदेन वह्निविशिष्टबुद्धिं प्रति सामानाधिकरण्यावगाहिबाधनिर्णयस्य प्रतिबन्धकान्तरस्य कल्पनीयत्वात् । संयोगादिसंसर्गकविशिष्टबुद्धौ समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकाभाववतो निर्णयस्य वह्नित्वादिना वह्न्यादिविशिष्टबुद्धौ वह्निघटोभयाभाववत्तानिर्णयस्य चाविरोधितया संयोगादिसंसर्गावच्छिन्नप्रतियोगिताकत्वनिवेशः । द्रव्यत्वावच्छिन्नाभाववत्तानिर्णयस्य तदभावव्याप्यवत्तानिर्णयमुद्रयैव वह्नित्वादिना वह्न्यादिविशिष्टबुद्धिविरोधिता । न च महानसीयवह्नित्वाद्यवच्छिन्नप्रतियोगिताया अपि वह्नित्वाद्यवच्छिन्नत्वेन महानसीयवह्न्यभाववानित्याकारकज्ञानस्यापि वह्निमानित्याकारकज्ञानविरोधित्वापत्तिरिति वाच्यम् । वह्नित्वावच्छिन्नेत्यस्यैव वह्नित्वातिरिक्तधर्मानवच्छिन्नेत्यर्थकत्वात् । न च वह्न्यभावत्वादिना घटाभावावगाहिनो ज्ञानस्य वह्न्यादिविशिष्टबुद्धिं प्रति अविरोधित्वप्रसंगः, तस्य वह्नित्वाद्यवच्छिन्नप्रतियोगिताकाभावाप्रकारकत्वादिति वाच्यम् । वह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वसंसर्गावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारताया एव प्रतिबन्धकतावच्छेदकघटकत्वात्, तादृशप्रकारताशालिभ्रमात्मकबाधबुद्धेर्वास्तवतादृशाभावानवगाहित्वेऽपि क्षतिविरहात् । वह्नित्वाद्यवच्छिन्नतया घटत्वाद्यवच्छिन्नप्रतियोगितायाः संसर्गतया भानाभ्युपगमे तु तत्संग्रहाय वह्नित्वविषयतावच्छिन्नावच्छिन्नत्वविषयतावच्छिन्नप्रतियोगित्वविषयतात्वेनैव तादृशप्रतियोगित्वविषयता निवेशनीया, न तु वास्तववह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वविषयतात्वेन, अत एव कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताया अप्रसिद्धावपि कम्बुग्रीवादिमत्त्वादिना घटादिविशिष्टबुद्धौ कम्बुग्रीवादिमान्नास्तीत्याकारकबाधबुद्धिप्रतिबन्धकतायां नानुपपत्तिः । आहार्यत्वबुद्धेरविरोधितया अनाहार्यत्वनिवेशः । न चाहार्यज्ञानस्यापि विरोधितया कथमनाहार्यत्वनिवेश इति वाच्यम् । यत आहार्यज्ञानस्य विरोधित्वे आत्मतत्त्वविवेकटिप्पण्यां प्रतियोग्यारोपहेतुताखण्डने अनाहार्यारोपस्य हेतुतां खण्डयित्वा आहार्यज्ञानस्याविरोधितया तद्धेतुत्वं स्यादित्याशंक्य, आहार्यस्याभावबुद्धेः प्रागसंभवादित्यनेन तद्धेतुत्वखण्डनमसङ्गतं स्यात् ।

अथ किन्तावदाहार्यत्वं वह्न्यभाववत्ताबुद्धेः ? न तावद् स्वाव्यवहि-

तोत्तरोत्पत्तिकत्वस्वसामानाधिकरण्योभयसम्बन्धेन वह्न्यादिनिर्णयवत्त्वम्, वह्निव्याप्यवत्तानिर्णयकालीनेच्छाधीनवह्न्यभाववत्ताज्ञानस्यानाहार्यत्वापत्तेः। नापि तादृशसम्बन्धेन वह्न्यभाववत्ताज्ञानविरोधिज्ञानवत्त्वम्, इच्छाविरहविशिष्टवह्न्यादिमत्ताज्ञानस्यैव वह्न्यभाववत्ताज्ञानविरोधितया इच्छाकालीनवह्न्यादिमत्ताज्ञानस्यातथात्वेनाहार्यवह्न्यभावादिमत्ताज्ञानस्यापि विरोधिज्ञानवत्त्वाभावात्। परोक्षज्ञानप्रतिबन्धकतायामिच्छाया अनुत्तेजकतया इच्छाकालीनज्ञानस्यापि परोक्षवह्न्यभाववत्ताज्ञानविरोधित्वान्नानुपपत्तिरिति चेत्। एवमपि बाधतदभावव्याप्यवत्ताज्ञाननिष्ठानामवच्छेदकभेदेन भिन्नानां विरोधितानामनुगमकरूपाभावेनानुगमकरूपेण निवेशनमशक्यमेव। न च बाधतदभावव्याप्यवत्ताज्ञानकालीनज्ञाननिष्ठाहार्यत्वस्य दुर्वचत्वेऽपि अप्रामाण्यज्ञानानास्कन्दितवह्निमत्तानिर्णयविशिष्टतादृशतद्व्याप्यवत्ताप्रकारकनिर्णयविशिष्टत्वाद्यवच्छिन्नप्रतियोगिताकभेदकूटवत्त्वस्य प्रतिबन्धकतावच्छेदकत्वात् न दोष इति वाच्यम्। एवमपि आनुमानिकबाधतदभावव्याप्यवत्ताज्ञानकालीनलौकिकसन्निकर्षजन्यज्ञानस्याविरोधित्वप्रसङ्गः। तादृशबाधादिविशिष्टलौकिकज्ञानभिन्नत्वनिवेशे तदिन्द्रियजन्यबाधकालीनलौकिकसन्निकर्षजन्यज्ञानस्यापि प्रतिबन्धकत्वापत्तिः, तस्यालौकिकज्ञानभिन्नत्वात्। तदिन्द्रियजन्यबाधविशिष्टतदिन्द्रियजन्यज्ञानभेदस्यापि स्वातन्त्र्येण निवेशान्नेयमनुपपत्तिरिति चेत्। एवमपि आहार्यवह्न्यादिनिर्णयकालीनवह्न्यभाववत्ताज्ञानस्याविरोधित्वप्रसङ्गो दुर्वार एव। न चानाहार्यनिर्णयविशिष्टान्यत्वनिवेशान्न दोष इति वाच्यम्। वह्निमत्ताज्ञाननिष्ठानाहार्यत्वस्यानाहार्यवह्न्यभावादिनिर्णयविशिष्टान्यत्वरूपं विनाऽन्यधर्मस्य दुर्वचत्वात्, तत्र तादृशानाहार्यत्वस्यैव निवेशनीयतया तस्य वह्न्यभाववत्ताज्ञानीयानाहार्यत्वघटितत्वेनान्योन्याश्रयप्रसङ्गात्।

यत्तु आहार्यज्ञाने इच्छाया हेतुत्वोपगमात् जन्यतासम्बन्धेनेच्छावत्त्वमेवाहार्यत्वमिति। तदसत्। इच्छाविरहविशिष्टानुमितिसामग्रीवादिना भिन्नविषयकप्रत्यक्षादिकं प्रति प्रतिबन्धकत्वापेक्षया तादृशसामग्रीकालीनप्रत्यक्षादौ इच्छाया हेतुत्वस्यैव लाघवेनाङ्गीकारात्, भिन्नविषयकानुमितिसामग्रीकालीनेच्छाधीनवह्न्यादिप्रत्यक्षस्यापीच्छाजन्यतया आहार्यत्वप्रसङ्गात्। एवमिच्छाजन्यतावच्छेदकं यदि इच्छाविशिष्टवह्न्यभावादिप्रकारकप्रत्यक्षत्वं तदा बाधशून्यकालीनेच्छाविशिष्टज्ञानस्यापि तदाक्रान्तत्वेनेच्छाजन्यतया तस्यापि आहार्यत्वप्रसङ्गः। एवं बाधविशिष्टत्वस्य जन्यतावच्छेदककोटिप्रवेशेऽप्याहार्यवह्निमत्तानि-

र्णयकालीनेच्छाविशिष्टज्ञानस्य तथात्वं दुर्वारमिति। अनाहार्यवह्न्यादिमत्तानिर्णयविशिष्टज्ञानत्वं वह्न्यभावप्रत्यक्षेच्छाजन्यतावच्छेदकं वाच्यम्। वह्निमत्ताज्ञानविशिष्टानाहार्यत्वमपि जन्यतासम्बन्धेनेच्छाविशिष्टभिन्नत्वरूपमेव निवेश्यम्, तादृशज्ञानगोचरेच्छाया अपि कार्यतावच्छेदकमनाहार्यवह्न्यभावादिनिर्णयविशिष्टवह्न्यादिप्रत्यक्षत्वं वाच्यम्; अन्यथा उक्तरीत्या अनुपपत्तितादवस्थ्यात्, एवञ्च वह्निमत्ताज्ञाननिष्ठानाहार्यत्वज्ञाने तद्घटितधर्मावच्छेदेन वह्न्यभावज्ञानेच्छाजन्यत्वग्रहः, तद्ग्रहे च वह्न्यभाववत्ताज्ञानीयानाहार्यत्वग्रहः, तद्ग्रहे च तद्घटितधर्मावच्छेदेन वह्निमत्ताज्ञानेच्छाजन्यत्वग्रह इति दुर्वार एव दुर्ज्ञेयतादोष इति।

यत्तु आहार्यवह्न्यभाववत्ताज्ञानादौ वह्न्यादेरपि भाने बाधकाभावात् सर्वत्र संशयात्मकमेवाहार्यज्ञानम्, एवञ्च निर्णयत्वनिवेशेनैवाहार्यज्ञानवारणसम्भवात् अनाहार्यत्वनिवेश एव नास्ति, किन्तन्निर्वचनेनेति।

तदप्यसत्, यत्र भिन्नेन्द्रियजन्यापेक्षाबुध्यात्मकवह्न्यभाववत्तानिर्णयद्वितीयक्षणे वह्निमत्तानिर्णयो लौकिकसन्निकर्षजन्यः, तदनन्तरञ्च वह्न्यभावज्ञानं जायतामितीच्छा तदनन्तरं वह्न्यभावप्रत्यक्षं तत्पूर्वक्षणे वह्न्यभाववत्तानिर्णयरूपप्रतिबन्धकसत्त्वेन वह्निभानासम्भवात्, निर्णयात्मकस्यैवाहार्यज्ञानस्य सम्भवेनानाहार्यत्वनिवेशस्यावश्यकत्वात्। न चात्राहार्यवह्न्यभाववत्ताज्ञानमपि नेष्यत एवेति वाच्यम्। इच्छारूपोत्तेजकसत्त्वे तदुक्तौ बाधकाभावात्। न च बाधप्रतिबन्धकतायामिच्छाया उत्तेजकत्वं न स्वीक्रियते, किन्तु इच्छाजन्यभिन्नत्वमेव प्रतिबध्यतावच्छेदककोटौ निवेश्यते, इच्छायाश्च जन्यतावच्छेदकमिच्छाविशिष्टसंशयत्वमित्यते एककोटिज्ञानस्य प्रतिबध्यतावच्छेदकाक्रान्ततया न तदा एककोटिज्ञानमुत्पत्तुमर्हतीति वाच्यम्। जन्यतायाश्चाक्षुषत्वादिरूपावच्छेदकभेदभिन्नत्वेनेच्छाजन्यत्वावच्छिन्नप्रतियोगिताकैकभेदनिवेशासम्भवेन भेदकूटस्यैव निवेशनीयतया विनिगमनाविरहेण कार्यकारणभावबाहुल्यात्, इच्छाया उत्तेजकत्वकल्पस्यैवान्यत्र व्यवस्थापितत्वादुपदर्शितस्थलेऽनुभवसिद्धस्यापलापासम्भवाच्चेति, तस्मादाहार्यस्य दुर्वचतया कथमनाहार्यत्वेन प्रतिबन्धकत्वमिति।

मैवम्, अनुगताहार्यत्वस्य दुर्वचत्वेऽपि आहार्यज्ञानानां तत्तद्व्यक्तित्वेनैव भेदकूटस्यैव प्रतिबन्धकताकुक्षौ निवेशनीयत्वात्।

केचित्तु आहार्यज्ञाने यावदप्रामाण्यं न गृह्यते न भवत्येव तावद्विशिष्टबुद्धिरिति आहार्यत्वस्य निवेश एव नास्तीत्याहुः।

अप्रामाण्यज्ञानास्कन्दितज्ञानस्याविरोधितया अप्रामाण्यज्ञानानास्कन्दितत्वनिवेशः। तच्च सामानाधिकरण्यविशेष्यतोभयसम्बन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभाववत्त्वम्। भाविज्ञानादिविशेष्यकाप्रामाण्यग्रहकालीनज्ञानस्य विरोधित्वोपपत्तये विशेष्यतानिवेशः। विशेष्यता चाप्रामाण्यप्रकारतानिरूपिता ग्राह्या, अन्यथा पर्वतो वह्न्यभाववानिति विज्ञानं प्रमा, भाविवह्न्यभावज्ञानञ्च वह्निमनि वह्न्यभावप्रकारकमित्यप्रामाण्यज्ञानं तदा वह्निविशिष्टबुद्ध्यापत्तिः। न चैवं दीधितिग्रन्थविरोधः, युक्तिनिर्णीतेऽर्थे तस्याप्रयोजकत्वेन हेयत्वात्। पुरुषान्तरीयप्रामाण्यग्रहविषयीभूतस्य ज्ञानस्य विरोधित्वोपपत्तये सामानाधिकरण्यनिवेशः। न चाप्रामाण्यज्ञानाभावस्य प्रतिबन्धकतावच्छेदककोटिनिवेशे आहार्यज्ञानभेदकूटैः सह विशेषणविशेष्यभावे विनिगमनाविरहप्रसङ्गादप्रामाण्यग्रहानुत्तरत्वस्य प्रतिबध्यतावच्छेदककोटौ निवेशनमेवोचितमिति वाच्यम्। तथासति अप्रामाण्यग्रहविशिष्टस्याप्रामाण्यग्रहानास्कन्दितबाधबुद्धिदशायामापत्तिवारणाय तत्राप्रामाण्यग्रहहेतुताकल्पनाप्रसङ्गात्। अप्रामाण्यग्रहानास्कन्दितबाधबुद्धिद्वितीयक्षणे तदनास्कन्दितबाधबुद्धौ सत्यां तदनन्तरमप्रामाण्यग्रहरूपकारणसत्त्वात्तद्विशिष्टबुद्ध्यापत्तेश्च, तस्मादुत्तेजकत्वमावश्यकमेव। अप्रामाण्यग्रहवदव्याप्यवृत्तित्वग्रहस्याप्युत्तेजकत्वं स्वीकरणीयम्, अत एव समुच्चयोत्तरसमुच्चये न व्यभिचारः। न च संशयोत्तरसंशये व्यभिचारवारणाय वह्न्याद्यप्रकारकत्वरूपनिर्णयत्वस्य प्रतिबन्धकतावच्छेदककोटौ अवश्यनिवेशनीयतया समुच्चयात्मकबाधबुद्धेश्च वह्निप्रकारवत्तया तदुत्तरोत्पन्नसमुच्चयात्मकवह्न्यादिविशिष्टबुद्धौ न व्यभिचार इति वाच्यम्। विनश्यदवस्थाव्याप्यवृत्तित्वज्ञानजन्यसमुच्चयानन्तरं संशयादिवारणाय विरोधसंसर्गावच्छिन्नवह्न्यादिप्रकारताशून्यत्वस्यैव प्रतिबन्धकतावच्छेदककोटौ निवेशनीयतया समुच्चयोत्तरसमुच्चये व्यभिचारस्य दुर्वारत्वात्।

केचित्तु समुच्चयोत्तरसमुच्चये व्यभिचारवारणाय विरोधिविषयता बाधाभावजन्यतावच्छेदककोटौ विवेशनीया न तु प्रतिबन्धकतावच्छेदककोटौ अव्याप्यवृत्तित्वज्ञानाभावः, गौरवात्। नचैवं संशयात्मकविशिष्टबुद्धेरेव प्रतिबध्यत्वमापद्यते, न तु निश्चयस्य विरोधाविषयकत्वादिति वाच्यम्। निर्णयात्मकज्ञानेऽपि वह्न्यभाववदवृत्तिसंयोगादीनामेव संसर्गतया भानाभ्युपगमेन तस्यापि विरोधविषयकत्वात्। न च प्रत्यक्षात्मकनिर्णयस्याविरोधसंसर्गकत्वसम्भवेऽपि शुद्धसंयोगादिघटितव्या-

अस्मत् प्रकाशित ग्रन्थानां संक्षिप्त-सूचीपत्रम् ।